# Uddhava Gita

# ઉદ્ધવગીતા

## Document Information

Text title : Uddhava Gita from Shrimad Bhagavata

File name : uddhavagiitaa.itx

Category : gItA, giitaa, vyAsa

Location : doc_giitaa

Author : Vyasa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Portion of adhyAyas 7, 8 and 9 are also known as avadhUtagItam

Source : Bhagavatam

Latest update : September 13, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# ઉદ્ધવગીતા

શ્રીરાધાકૃષ્ણાભ્યાં નમઃ ।
શ્રીમદ્ભાગવતપુરાણમ્ ।
એકાદશઃ સ્કન્ધઃ । ઉદ્ધવ ગીતા ।
અથ પ્રથમોઽધ્યાયઃ ।
શ્રીબાદરાયણિઃ ઉવાચ ।
કૃત્વા દૈત્યવધં કૃષ્ણઃ સરમઃ યદુભિઃ વૃતઃ ।
ભુવઃ અવતારવત્ ભારં જવિષ્ઠન્ જનયન્ કલિમ્ ॥ ૧॥

યે કોપિતાઃ સુબહુ પાણ્ડુસુતાઃ સપત્નૈઃ
દુર્દ્યૂતહેલનકચગ્રહણ આદિભિઃ તાન્ ।
કૃત્વા નિમિત્તમ્ ઇતર ઇતરતઃ સમેતાન્
હત્વા નૃપાન્ નિરહરત્ ક્ષિતિભારમ્ ઈશઃ ॥ ૨॥

ભૂભારરાજપૃતના યદુભિઃ નિરસ્ય
ગુપ્તૈઃ સ્વબાહુભિઃ અચિન્તયત્ અપ્રમેયઃ ।
મન્યે અવનેઃ નનુ ગતઃ અપિ અગતં હિ ભારમ્
યત્ યાદવં કુલમ્ અહો હિ અવિષહ્યમ્ આસ્તે ॥ ૩॥

ન એવ અન્યતઃ પરિભવઃ અસ્ય ભવેત્ કથઞ્ચિત્
મત્ સંશ્રયસ્ય વિભવ ઉન્નહન્ અસ્ય નિત્યમ્ ।
અન્તઃકલિમ્ યદુકુલસ્ય વિધ્હાય વેણુઃ
તમ્બસ્ય વહ્નિમ્ ઇવ શાન્તિમ્ ઉપૈમિ ધામ ॥ ૪॥

એવં વ્યવસિતઃ રાજન્ સત્યસઙ્કલ્પઃ ઈશ્વરઃ ।
શાપવ્યાજેન વિપ્રાણાં સઞ્જહ્રે સ્વકુલં વિભુઃ ॥ ૫॥

સ્વમૂર્ત્યા લોકલાવણ્યનિર્મુક્ત્યા લોચનં નૃણામ્ ।
ગીર્ભિઃ તાઃ સ્મરતાં ચિત્તં પદૈઃ તાન્ ઈક્ષતાં ક્રિયા ॥ ૬॥

આચ્છિદ્ય કીર્તિં સુશ્લોકાં વિતત્ય હિ અઞ્જસા નુ કૌ ।
તમઃ અનયા તરિષ્યન્તિ ઇતિ અગાત્ સ્વં પદમ્ ઈશ્વરઃ ॥ ૭॥

રાજા ઉવાચ ।
બ્રહ્મણ્યાનાં વદાન્યાનાં નિત્યં વૃદ્ધૌપસેવિનામ્ ।
વિપ્રશાપઃ કથમ્ અભૂત્ વૃષ્ણીનાં કૃષ્ણચેતસામ્ ॥ ૮॥

યત્ નિમિત્તઃ સઃ વૈ શાપઃ યાદૃશઃ દ્વિજસત્તમ ।
કથમ્ એકાત્મનાં ભેદઃ એતત્ સર્વં વદસ્વ મે ॥ ૯॥

શ્રીશુકઃ ઉવાચ ।
બિભ્રત્ વપુઃ સકલસુન્દરસંનિવેશમ્
કર્માચરન્ ભુવિ સુમઙ્ગલમ્ આપ્તકામઃ ।
આસ્થાય ધામ રમમાણઃ ઉદારકીર્તિઃ
સંહર્તુમ્ ઐચ્છત કુલં સ્થિતકૃત્યશેષઃ ॥ ૧૦॥

કર્માણિ પુણ્યનિવહાનિ સુમઙ્ગલાનિ
ગાયત્ જગત્ કલિમલાપહરાણિ કૃત્વા ।
કાલ આત્મના નિવસતા યદુદેવગેહે
પિણ્ડારકં સમગમન્ મુનયઃ નિસૃષ્ટાઃ ॥ ૧૧॥

વિશ્વામિત્રઃ અસિતઃ કણ્વઃ દુર્વાસાઃ ભૃગુઃ અઙ્ગિરાઃ ।
કશ્યપઃ વામદેવઃ અત્રિઃ વસિષ્ઠઃ નારદ આદયઃ ॥ ૧૨॥

ક્રીડન્તઃ તાન્ ઉપવ્રજ્ય કુમારાઃ યદુનન્દનાઃ ।
ઉપસઙ્ગૃહ્ય પપ્રચ્છુઃ અવિનીતા વિનીતવત્ ॥ ૧૩॥

તે વેષયિત્વા સ્ત્રીવેષૈઃ સામ્બં જામ્બવતીસુતમ્ ।
એષા પૃચ્છતિ વઃ વિપ્રાઃ અન્તર્વત્ન્યસિત ઈક્ષણા ॥ ૧૪॥

પ્રષ્ટું વિલજ્જતિ સાક્ષાત્ પ્રબ્રૂત અમોઘદર્શનાઃ ।
પ્રસોષ્યન્તિ પુત્રકામા કિંસ્વિત્ સઞ્જનયિષ્યતિ ॥ ૧૫॥

એવં પ્રલબ્ધ્વા મુનયઃ તાન્ ઊચુઃ કુપિતા નૃપ ।
જનયિષ્યતિ વઃ મન્દાઃ મુસલં કુલનાશનમ્ ॥ ૧૬॥

તત્ શ્ૃત્વા તે અતિસન્ત્રસ્તાઃ વિમુચ્ય સહસોદરમ્ ।
સામ્બસ્ય દદૃશુઃ તસ્મિન્ મુસલં ખલુ અયસ્મયમ્ ॥ ૧૭॥

કિં કૃતં મન્દભાગ્યૈઃ કિં વદિષ્યન્તિ નઃ જનાઃ ।
ઇતિ વિહ્વલિતાઃ ગેહાન્ આદાય મુસલં યયુઃ ॥ ૧૮॥

તત્ ચ ઉપનીય સદસિ પરિમ્લાનમુખશ્રિયઃ ।
રાજ્ઞઃ આવેદયાન્ ચક્રુઃ સર્વયાદવસંનિધૌ ॥ ૧૯॥

શ્રુત્વા અમોઘં વિપ્રશાપં દૃષ્ટ્વા ચ મુસલં નૃપ ।
વિસ્મિતાઃ ભયસન્ત્રસ્તાઃ બભૂવુઃ દ્વારકૌકસઃ ॥ ૨૦॥

તત્ ચૂર્ણયિત્વા મુસલં યદુરાજઃ સઃ આહુકઃ ।
સમુદ્રસલિલે પ્રાસ્યત્ લોહં ચ અસ્ય અવશેષિતમ્ ॥ ૨૧॥

કશ્ચિત્ મત્સ્યઃ અગ્રસીત્ લોહં ચૂર્ણાનિ તરલૈઃ તતઃ ।
ઉહ્યમાનાનિ વેલાયાં લગ્નાનિ આસન્ કિલ ઐરિકાઃ ॥ ૨૨॥

મત્સ્યઃ ગૃહીતઃ મત્સ્યઘ્નૈઃ જાલેન અન્યૈઃ સહ અર્ણવે ।
તસ્ય ઉદરગતં લોહં સઃ શલ્યે લુબ્ધકઃ અકરોત્ ॥ ૨૩॥

ભગવાન્ જ્ઞાતસર્વાર્થઃ ઈશ્વરઃ અપિ તદન્યથા ।
કર્તું ન ઐચ્છત્ વિપ્રશાપં કાલરૂપી અન્વમોદત ॥ ૨૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે વિપ્રશાપો નામ પ્રથમોઽધ્યાયઃ ॥ ૧॥

અથ દ્વિતીયોઽધ્યાયઃ ।
શ્રીશુકઃ ઉવાચ ।
ગોવિન્દભુજગુપ્તાયાં દ્વારવત્યાં કુરૂદ્વહ ।
અવાત્સીત્ નારદઃ અભીક્ષ્ણં કૃષ્ણોપાસનલાલસઃ ॥ ૧॥

કો નુ રાજન્ ઇન્દ્રિયવાન્ મુકુન્દચરણામ્બુજમ્ ।
ન ભજેત્ સર્વતઃ મૃત્યુઃ ઉપાસ્યમ્ અમરોત્તમૈઃ ॥ ૨॥

તમ્ એકદા દેવર્ષિં વસુદેવઃ ગૃહ  આગતમ્ ।
અર્ચિતં સુખમ્ આસીનમ્ અભિવાદ્ય ઇદમ્ અબ્રવીત્ ॥ ૩॥

વસુદેવઃ ઉવાચ ।
ભગવન્ ભવતઃ યાત્રા સ્વસ્તયે સર્વદેહિનામ્ ।
કૃપણાનાં યથા પિત્રોઃ ઉત્તમશ્લોકવર્ત્મનામ્ ॥ ૪॥

ભૂતાનાં દેવચરિતં દુઃખાય ચ સુખાય ચ ।

સુખાય એવ હિ સાધૂનાં ત્વાદૃશામ્ અચ્યુત આત્મનામ્ ॥ ૫॥

ભજન્તિ યે યથા દેવાન્ દેવાઃ અપિ તથા એવ તાન્ ।
છાયા ઇવ કર્મસચિવાઃ સાધવઃ દીનવત્સલાઃ ॥ ૬॥

બ્રહ્મન્ તથા અપિ પૃચ્છામઃ ધર્માન્ ભાગવતાન્ તવ ।
યાન્ શ્રુત્વા શ્રદ્ધયા મર્ત્યઃ મુચ્યતે સર્વતઃ ભયાત્ ॥ ૭॥

અહં કિલ પુરા અનન્તં પ્રજાર્થઃ ભુવિ મુક્તિદમ્ ।
અપૂજયં ન મોક્ષાય મોહિતઃ દેવમાયયા ॥ ૮॥

યયા વિચિત્રવ્યસનાત્ ભવદ્ભિઃ વિશ્વતઃ ભયાત્ ।
મુચ્યેમ હિ અઞ્જસા એવ અદ્ધા તથા નઃ શાધિ સુવ્રત ॥ ૯॥

શ્રીશુકઃ ઉવાચ ।
રાજન્ એવં કૃતપ્રશ્નઃ વસુદેવેન ધીમતા ।
પ્રીતઃ તમ્ આહ દેવર્ષિઃ હરેઃ સંસ્મારિતઃ ગુણૈઃ ॥ ૧૦॥

નારદઃ ઉવાચ ।
સમ્યક્ એતત્ વ્યવસિતં ભવતા સાત્વતર્ષભ ।
યત્ પૃચ્છસે ભાગવતાન્ ધર્માન્ ત્વં વિશ્વભાવનાન્ ॥

૧૧॥

શ્રુતઃ અનુપઠિતઃ ધ્યાતઃ આદૃતઃ વા અનુમોદિતઃ ।
સદ્યઃ પુનાતિ સદ્ધર્મઃ દેવવિશ્વદ્રુહઃ અપિ ॥ ૧૨॥

ત્વયા પરમકલ્યાણઃ પુણ્યશ્રવણકીર્તનઃ ।
સ્મારિતઃ ભગવાન્ અદ્ય દેવઃ નારાયણઃ મમ ॥ ૧૩॥

અત્ર અપિ ઉદાહરન્તિ ઇમમ્ ઇતિહાસં પુરાતનમ્ ।
આર્ષભાણાં ચ સંવાદં વિદેહસ્ય મહાત્મનઃ ॥ ૧૪॥

પ્રિયવ્રતઃ નામ સુતઃ મનોઃ સ્વાયમ્ભુવસ્ય યઃ ।
તસ્ય અગ્નીધ્રઃ તતઃ નાભિઃ ઋષભઃ તત્ સુતઃ સ્મૃતઃ ॥ ૧૫॥

તમ્ આહુઃ વાસુદેવાંશં મોક્ષધર્મવિવક્ષયા ।
અવતીર્ણં સુતશતં તસ્ય આસીત્ વેદપારગમ્ ॥ ૧૬॥

તેષાં વૈ ભરતઃ જ્યેષ્ઠઃ નારાયણપરાયણઃ ।
વિખ્યાતં વર્ષમ્ એતત્ યત્ નામ્ના ભારતમ્ અદ્ભુતમ્ ॥ ૧૭॥

સઃ ભુક્તભોગાં ત્યક્ત્વા ઇમાં નિર્ગતઃ તપસા હરિમ્ ।
ઉપાસીનઃ તત્ પદવીં લેભે વૈ જન્મભિઃ ત્રિભિઃ ॥ ૧૮॥

તેષાં નવ નવદ્વીપપતયઃ અસ્ય સમન્તતઃ ।
કર્મતન્ત્રપ્રણેતારઃ એકાશીતિઃ દ્વિજાતયઃ ॥ ૧૯॥

નવ અભવન્ મહાભાગાઃ મુનયઃ હિ અર્થશંસિનઃ ।
શ્રમણાઃ વાતઃ અશનાઃ આત્મવિદ્યાવિશારદાઃ ॥ ૨૦॥

કવિઃ હરિઃ અન્તરિક્ષઃ પ્રબુદ્ધઃ પિપ્પલાયનઃ ।
આવિર્હોત્રઃ અથ દ્રુમિલઃ ચમસઃ કરભાજનઃ ॥ ૨૧॥

એતે વૈ ભગવદ્રૂપં વિશ્વં સદસદ્ આત્મકમ્ ।
આત્મનઃ અવ્યતિરેકેણ પશ્યન્તઃ વ્યચરત્ મહીમ્ ॥ ૨૨॥

અવ્યાહત ઇષ્ટગતયાઃ સુરસિદ્ધસિદ્ધસાધ્ય
　　ગન્ધર્વયક્ષનરકિન્નરનાગલોકાન્ ।
મુક્તાઃ ચરન્તિ મુનિચારણભૂતનાથ
　　વિદ્યાધરદ્વિજગવાં ભુવનાનિ કામમ્ ॥ ૨૩॥

તઃ એકદા નિમેઃ સત્રમ્ ઉપજગ્મુઃ યત્ ઋચ્છયા ।
વિતાયમાનમ્ ઋષિભિઃ અજનાભે મહાત્મનઃ ॥ ૨૪॥

તાન્ દૃષ્ટ્વા સૂર્યસઙ્કાશાન્ મહાભગવતાન્ નૃપઃ ।
યજમાનઃ અગ્નયઃ વિપ્રાઃ સર્વઃ એવ ઉપતસ્થિરે ॥ ૨૫॥

વિદેહઃ તાન્ અભિપ્રેત્ય નારાયણપરાયણાન્ ।
પ્રીતઃ સમ્પૂજયાન્ ચક્રે આસનસ્થાન્ યથા અર્હતઃ ॥ ૨૬॥

તાન્ રોચમાનાન્ સ્વરુચા બ્રહ્મપુત્રૌપમાન્ નવ ।
પપ્રચ્છ પરમપ્રીતઃ પ્રશ્રય અવનતઃ નૃપઃ ॥ ૨૭॥

વિદેહઃ ઉવાચ ।
મન્યે ભગવતઃ સાક્ષાત્ પાર્ષદાન્ વઃ મધુદ્વિષઃ ।
વિષ્ણોઃ ભૂતાનિ લોકાનાં પાવનાય ચરન્તિ હિ ॥ ૨૮॥

દુર્લભઃ માનુષઃ દેહઃ દેહિનાં ક્ષણભઙ્ગુરઃ ।
તત્ર અપિ દુર્લભં મન્યે વૈકુણ્ઠપ્રિયદર્શનમ્ ॥ ૨૯॥

અતઃ આત્યન્તિકં કહેમં પૃચ્છામઃ ભવતઃ અનઘાઃ ।
સંસારે અસ્મિન્ ક્ષણાર્ધઃ અપિ સત્સઙ્ગઃ શેવધિઃ નૃણામ્ ॥

૩૦॥

ધર્માન્ ભાગવતાન્ બ્રૂત યદિ નઃ શ્રુતયે ક્ષમમ્ ।
યૈઃ પ્રસન્નઃ પ્રપન્નાય દાસ્યતિ આત્માનમ્ અપિ અજઃ ॥ ૩૧॥

શ્રીનારદઃ ઉવાચ ।
એવં તે નિમિના પૃષ્ટા વસુદેવ મહત્તમાઃ ।
પ્રતિપૂજ્ય અબ્રુવન્ પ્રીત્યા સસદસિ ઋત્વિજં નૃપમ્ ॥ ૩૨॥

કવિઃ ઉવાચ ।
મન્યે અકુતશ્ચિત્ ભયમ્ અચ્યુતસ્ય
 પાદામ્બુજૌપાસનમ્ અત્ર નિત્યમ્ ।
ઉદ્વિગ્નબુદ્ધેઃ અસત્ આત્મભાવાત્
 વિશ્વાત્મના યત્ર નિવર્તતે ભીઃ ॥ ૩૩॥

યે વૈ ભગવતા પ્રોક્તાઃ ઉપાયાઃ હિ આત્મલબ્ધયે ।
અઞ્જઃ પુંસામ્ અવિદુષાં વિદ્ધિ ભાગવતાન્ હિ તાન્ ॥ ૩૪॥

યાન્ આસ્થાય નરઃ રાજન્ ન પ્રમાદ્યેત કર્હિચિત્ ।
ધાવન્ નિમીલ્ય વા નેત્રે ન સ્ખલેન પતેત્ ઇહ ॥ ૩૫॥

કાયેન વાચા મનસા ઇન્દ્રિયૈઃ વા
 બુદ્ધ્યા આત્મના વા અનુસૃતસ્વભાવાત્ ।
કરોતિ યત્ યત્ સકલં પરસ્મૈ
 નારાયણાય ઇતિ સમર્પયેત્ તત્ ॥ ૩૬॥

ભયં દ્વિતીયાભિનિવેશતઃ સ્યાત્
 ઈશાત્ અપેતસ્ય વિપર્યયઃ અસ્મૃતિઃ ।
તત્ માયયા અતઃ બુધઃ આભજેત્ તં
 ભક્ત્યા એક ઈશં ગુરુદેવતાત્મા ॥ ૩૭।
અવિદ્યમાનઃ અપિ અવભાતિ હિ દ્વયોઃ
 ધ્યાતુઃ ધિયા સ્વપ્નમનોરથૌ યથા ।
તત્ કર્મસઙ્કલ્પવિકલ્પકં મનઃ
 બુધઃ નિરુન્ધ્યાત્ અભયં તતઃ સ્યાત્ ॥ ૩૮॥

શ્રુણ્વન્ સુભદ્રાણિ રથાઙ્ગપાણેઃ
    જન્માનિ કર્માણિ ચ યાનિ લોકે ।
ગીતાનિ નામાનિ તત્ અર્થકાનિ
    ગાયન્ વિલજ્જઃ વિચરેત્ અસઙ્ગઃ ॥ ૩૯॥

એવં વ્રતઃ સ્વપ્રિયનામકીર્ત્યા
    જાતાનુરાગઃ દ્રુતચિત્તઃ ઉચ્ચૈઃ ।
હસતિ અથઃ રોદિતિ રૌતિ ગાયતિ
    ઉન્માદવત્ નૃત્યતિ લોકબાહ્યઃ ॥ ૪૦॥

ખં વાયુમ્ અગ્નિં સલિલં મહીં ચ
    જ્યોતીંષિ સત્ત્વાનિ દિશઃ દ્રુમાદીન્ ।
સરિત્ સમુદ્રાન્ ચ હરેઃ શરીરં
    યત્કિઞ્ચ ભૂતં પ્રણમેત્ અનન્યઃ ॥ ૪૧॥

ભક્તિઃ પરેશ અનુભવઃ વિરક્તિઃ
    અન્યત્ર એષ ત્રિકઃ એકકાલઃ ।
પ્રપદ્યમાનસ્ય યથા અશ્નતઃ સ્યુઃ
    તુષ્ટિઃ પુષ્ટિઃ ક્ષુત્ અપાયઃ અનુઘાસમ્ ॥ ૪૨॥

ઇતિ અચ્યુત અઙ્ઘ્રિં ભજતઃ અનુવૃત્ત્યા
    ભક્તિઃ વિરક્તિઃ ભગવત્ પ્રબોધઃ ।
ભવન્તિ વૈ ભાગવતસ્ય રાજન્
    તતઃ પરાં શાન્તિમ્ ઉપૈતિ સાક્ષાત્ ॥ ૪૩॥

રાજા ઉવાચ ।
અથ ભાગવતં બ્રૂત યત્ ધર્મઃ યાદૃશઃ નૃણામ્ ।
યથા ચરતિ યત્ બ્રૂતે યૈઃ લિઙ્ગૈઃ ભગવત્ પ્રિયઃ ॥ ૪૪॥

હરિઃ ઉવાચ ।
સર્વભૂતેષુ યઃ પશ્યેત્ ભગવત્ ભાવ આત્મનઃ ।
ભૂતાનિ ભાગવતિ આત્મનિ એષ ભાગવતૌત્તમઃ ॥ ૪૫॥

ઈશ્વરે તત્ અધીનેષુ બાલિશેષુ દ્વિષત્સુ ચ ।
પ્રેમમૈત્રીકૃપાઉપેક્ષા યઃ કરોતિ સ મધ્યમઃ ॥ ૪૬॥

અર્ચાયામ્ એવ હરયે પૂજાં યઃ શ્રદ્ધયા ઈહતે ।

ન તત્ ભક્તેષુ ચ અન્યેષુ સઃ ભક્તઃ પ્રાકૃતઃ સ્મૃતઃ ॥

૪૭ ॥

ગૃહીત્વા અપિ ઇન્દ્રિયૈઃ અર્થાન્યઃ ન દ્વેષ્ટિ ન હૃષ્યતિ ।
વિષ્ણોઃ માયામ્ ઇદં પશ્યન્ સઃ વૈ ભાગવત ઉત્તમઃ ॥ ૪૮ ॥

દેહેન્દ્રિયપ્રાણમનઃધિયાં યઃ
    જન્માપિઅયક્ષુત્ ભયતર્ષકૃચ્છ્રૈઃ ।
સંસારધર્મૈઃ અવિમુહ્યમાનઃ
    સ્મૃત્યા હરેઃ ભાગવતપ્રધાનઃ ॥ ૪૯ ॥

ન કામકર્મબીજાનાં યસ્ય ચેતસિ સમ્ભવઃ ।
વાસુદેવએકનિલયઃ સઃ વૈ ભાગવત ઉત્તમઃ ॥ ૫૦ ॥

ન યસ્ય જન્મકર્મભ્યાં ન વર્ણાશ્રમજાતિભિઃ ।
સજ્જતે અસ્મિન્ અહમ્ભાવઃ દેહે વૈ સઃ હરેઃ પ્રિયઃ ॥ ૫૧ ॥

ન યસ્ય સ્વઃ પરઃ ઇતિ વિત્તેષુ આત્મનિ વા ભિદા ।
સર્વભૂતસમઃ શાન્તઃ સઃ વૌ ભાગવત ઉત્તમઃ ॥ ૫૨ ॥

ત્રિભુવનવિભવહેતવે અપિ અકુણ્ઠસ્મૃતિઃ
    અજિતાત્મસુરાદિભિઃ વિમૃગ્યાત્ ।
ન ચલતિ ભગવત્ પદ અરવિન્દાત્
    લવનિમિષ અર્ધમ્ અપિ યઃ સઃ વૈષ્ણવ અગ્ર્યઃ ॥ ૫૩ ॥

ભગવતઃ ઉરુવિક્રમ અઙ્ઘ્રિશાખા
    નખમણિચન્દ્રિકયા નિરસ્તતાપે ।
હૃદિ કથમ્ ઉપસીદતાં પુનઃ સઃ
    પ્રભવતિ ચન્દ્રઃ ઇવ ઉદિતે અર્કતાપઃ ॥ ૫૪ ॥

વિસૃજતિ હૃદયં ન યસ્ય સાક્ષાત્
    હરિઃ અવશ અભિહિતઃ અપિ અઘૌઘનાશઃ ।
પ્રણયઃ અશનયા ધૃત અઙ્ઘ્રિપદ્મઃ
    સઃ ભવતિ ભાગવતપ્રધાનઃ ઉક્તઃ ॥ ૫૫ ॥

ઇતિ શ્રીમત્ ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં એકાદશસ્કન્ધે નિમિજાયન્તસંવાદે દ્વિતીયઃ
અધ્યાયઃ ॥ ૨ ॥

અથ તૃતીયોઽધ્યાયઃ ।
પરસ્ય વિષ્ણોઃ ઈશસ્ય માયિનામ અપિ મોહિનીમ્ ।
માયાં વેદિતુમ્ ઇચ્છામઃ ભગવન્તઃ બ્રુવન્તુ નઃ ॥ ૧॥

ન અનુતૃપ્યે જુષન્ યુષ્મત્ વચઃ હરિકથા અમૃતમ્ ।
સંસારતાપનિઃતપ્તઃ મર્ત્યઃ તત્ તાપ ભેષજમ્ ॥ ૨॥

અન્તરિક્ષઃ ઉવાચ ।
એભિઃ ભૂતાનિ ભૂતાત્મા મહાભૂતૈઃ મહાભુજ ।
સસર્જોત્ ચ અવચાનિ આદ્યઃ સ્વમાત્રપ્રસિદ્ધયે ॥ ૩॥

એવં સૃષ્ટાનિ ભૂતાનિ પ્રવિષ્ટઃ પઞ્ચધાતુભિઃ ।
એકધા દશધા આત્માનં વિભજન્ જુષતે ગુણાન્ ॥ ૪॥

ગુણૈઃ ગુણાન્ સઃ ભુઞ્જાનઃ આત્મપ્રદ્યોદિતૈઃ પ્રભુઃ ।
મન્યમાનઃ ઇદં સૃષ્ટમ્ આત્માનમ્ ઇહ સજ્જતે ॥ ૫॥

કર્માણિ કર્મભિઃ કુર્વન્ સનિમિત્તાનિ દેહભૃત્ ।
તત્ તત્ કર્મફલં ગૃહ્ણન્ ભ્રમતિ ઇહ સુખૈતરમ્ ॥ ૬॥

ઇત્થં કર્મગતીઃ ગચ્છન્ બહ્વભદ્રવહાઃ પુમાન્ ।
આભૂતસમ્પ્લવાત્ સર્ગપ્રલયૌ અશ્નુતે અવશઃ ॥ ૭॥

ધાતુ ઉપપ્લવઃ આસન્ને વ્યક્તં દ્રવ્યગુણાત્મકમ્ ।
અનાદિનિધનઃ કાલઃ હિ અવ્યક્તાય અપકર્ષતિ ॥ ૮॥

શતવર્ષાઃ હિ અનાવૃષ્ટિઃ ભવિષ્યતિ ઉલ્બણા ભુવિ ।
તત્ કાલ ઉપચિત ઉષ્ણ અર્કઃ લોકાન્ ત્રીન્ પ્રતપિષ્યતિ ॥ ૯॥

પાતાલતલમ્ આરભ્ય સઙ્કર્ષણમુખ અનલઃ ।
દહન્ ઊર્ધ્વશિખઃ વિષ્વક્ વર્ધતે વાયુના ઈરિતઃ ॥ ૧૦॥

સાંવર્તકઃ મેઘગણઃ વર્ષતિ સ્મ શતં સમાઃ ।
ધારાભિઃ હસ્તિહસ્તાભિઃ લીયતે સલિલે વિરાટ્ ॥ ૧૧॥

તતઃ વિરાજમ્ ઉત્સૃજ્ય વૈરાજઃ પુરુષઃ નૃપ ।
અવ્યક્તં વિશતે સૂક્ષ્મં નિરિન્ધનઃ ઇવ અનલઃ ॥ ૧૨॥

વાયુના હૃતગન્ધા ભૂઃ સલિલત્વાય કલ્પતે ।

સલિલં તત્ ધૃતરસં જ્યોતિષ્ટ્વાય ઉપકલ્પતે ॥ ૧૩॥

હૃતરૂપં તુ તમસા વાયૌ જ્યોતિઃ પ્રલીયતે ।
હૃતસ્પર્શઃ અવકાશેન વાયુઃ નભસિ લીયતે ।
કાલાત્મના હૃતગુણં નવઃ આત્મનિ લીયતે ॥ ૧૪॥

ઇન્દ્રિયાણિ મનઃ બુદ્ધિઃ સહ વૈકારિકૈઃ નૃપ ।
પ્રવિશન્તિ હિ અહઙ્કારં સ્વગુણૈઃ અહમ્ આત્મનિ ॥ ૧૫॥

એષા માયા ભગવતઃ સર્ગસ્થિતિ અન્તકારિણી ।
ત્રિવર્ણા વર્ણિતા અસ્માભિઃ કિં ભૂયઃ શ્રોતુમ્ ઇચ્છસિ ॥ ૧૬॥

રાજા ઉવાચ ।
યથા એતામ્ ઐશ્વરીં માયાં દુસ્તરામ્ અકૃતાત્મભિઃ ।
તરન્તિ અઞ્જઃ સ્થૂલધિયઃ મહર્ષઃ ઇદમ્ ઉચ્યતામ્ ॥ ૧૭॥

પ્રબુદ્ધઃ ઉવાચ ।
કર્માણિ આરભમાણાનાં દુઃખહત્યૈ સુખાય ચ ।
પશ્યેત્ પાકવિપર્યાસં મિથુનીચારિણાં નૃણામ્ ॥ ૧૮॥

નિત્યાર્તિદેન વિત્તેન દુર્લભેન આત્મમૃત્યુના ।
ગૃહ અપત્યાપ્તપશુભિઃ કા પ્રીતિઃ સાધિતૈઃ ચલૈઃ ॥

૧૯॥

એવં લોકં પરં વિદ્યાત્ નશ્વરં કર્મનિર્મિતમ્ ।
સતુલ્ય અતિશય ધ્વંસં યથા મણ્ડલવર્તિનામ્ ॥ ૨૦॥

તસ્માત્ ગુરું પ્રપદ્યેત જિજ્ઞાસુઃ શ્રેયઃ ઉત્તમમ્ ।
શાબ્દે પરે ચ નિષ્ણાતં બ્રહ્મણિ ઉપશમાશ્રયમ્ ॥ ૨૧॥

તત્ર ભાગવતાન્ ધર્માન્ શિક્ષેત્ ગુરુઆત્મદૈવતઃ ।
અમાયયા અનુવૃત્યા યૈઃ તુષ્યેત્ આત્મા આત્મદઃ હરિઃ ॥ ૨૨॥

સર્વતઃ મનસઃ અસઙ્ગમ્ આદૌ સઙ્ગં ચ સાધુષુ ।
દયાં મૈત્રીં પ્રશ્રયં ચ ભૂતેષુ અદ્ધા યથા ઉચિતમ્ ॥ ૨૩॥

શૌચં તપઃ તિતિક્ષાં ચ મૌનં સ્વાધ્યાયમ્ આર્જવમ્ ।
બ્રહ્મચર્યં અહિંસાં ચ સમત્વં દ્વન્દ્વસઞ્જ્ઞયોઃ ॥ ૨૪॥

સર્વત્ર આત્મેશ્વર અન્વીક્ષાં કૈવલ્યમ્ અનિકેતતામ્ ।

વિવિક્તચીરવસનં સન્તોષં યેન કેનચિત્ ॥ ૨૫॥

શ્રદ્ધાં ભાગવતે શાસ્ત્રે અનિન્દામ્ અન્યત્ર ચ અપિ હિ ।
મનોવાક્ કર્મદણ્ડં ચ સત્યં શમદમૌ અપિ ॥ ૨૬॥

શ્રવણં કીર્તનં ધ્યાનં હરેઃ અદ્ભુતકર્મણઃ ।
જન્મકર્મગુણાનાં ચ તદર્થે અખિલચેષ્ટિતમ્ ॥ ૨૭॥

ઇષ્ટં દત્તં તપઃ જપ્તં વૃત્તં યત્ ચ આત્મનઃ પ્રિયમ્ ।
દારાન્ સુતાન્ ગૃહાન્ પ્રાણાન્ યત્ પરસ્મૈ નિવેદનમ્ ॥ ૨૮॥

એવં કૃષ્ણાત્મનાથેષુ મનુષ્યેષુ ચ સૌહૃદમ્ ।
પરિચર્યાં ચ ઉભયત્ર મહત્સુ નૃષુ સાધુષુ ॥ ૨૯॥

પરસ્પર અનુકથનં પાવનં ભગવત્ યશઃ ।
મિથઃ રતિઃ મિથઃ તુષ્ટિઃ નિવૃત્તિઃ મિથઃ આત્મનઃ ॥ ૩૦॥

સ્મરન્તઃ સ્મારયન્તઃ ચ મિથઃ અઘૌઘહરં હરિમ્ ।
ભક્ત્યા સઞ્જાતયા ભક્ત્યા બિભ્રતિ ઉત્પુલકાં તનુમ્ ॥ ૩૧॥

ક્વચિત્ રુદન્તિ અચ્યુતચિન્તયા ક્વચિત્
    હસન્તિ નન્દન્તિ વદન્તિ અલૌકિકાઃ ।
નૃત્યન્તિ ગાયન્તિ અનુશીલયન્તિ
    અજં ભવન્તિ તૂષ્ણીં પરમ્ એત્ય નિર્વૃતાઃ ॥ ૩૨॥

ઇતિ ભાગવતાન્ ધર્માન્ શિક્ષન્ ભક્ત્યા તદુત્થયા ।
નારાયણપરઃ માયમ્ અઞ્જઃ તરતિ દુસ્તરામ્ ॥ ૩૩॥

રાજા ઉવાચ ।
નારાયણ અભિધાનસ્ય બ્રહ્મણઃ પરમાત્મનઃ ।
નિષ્ઠામ્ અર્હથ નઃ વક્તું યૂયં હિ બ્રહ્મવિત્તમાઃ ॥ ૩૪॥

પિપ્પલાયનઃ ઉવાચ ।
સ્થિતિ ઉદ્ભવપ્રલયહેતુઃ અહેતુઃ અસ્ય
    યત્ સ્વપ્નજાગરસુષુપ્તિષુ સત્ બહિઃ ચ ।
દેહ ઇન્દ્રિયાસુહૃદયાનિ ચરન્તિ યેન
    સઞ્જીવિતાનિ તત્ અવેહિ પરં નરેન્દ્ર ॥ ૩૫॥

ન એતત્ મનઃ વિશતિ વાગુત ચક્ષુઃ આત્મા

પ્રાણેન્દ્રિયાણિ ચ યથા અનલમ્ અર્ચિષઃ સ્વાઃ ।
શબ્દઃ અપિ બોધકનિષેધતયા આત્મમૂલમ્
અર્થ ઉક્તમ્ આહ યદૃતે ન નિષેધસિદ્ધિઃ ॥ ૩૬॥

સત્વમ્ રજઃ તમઃ ઇતિ ત્રિવૃદેકમ્ આદૌ
સૂત્રં મહાન્ અહમ્ ઇતિ પ્રવદન્તિ જીવમ્ ।
જ્ઞાનક્રિયા અર્થફલરૂપતયોઃ ઉશક્તિ
બ્રહ્મ એવ ભાતિ સત્ અસત્ ચ તયોઃ પરં યત્ ॥ ૩૭॥

ન આત્મા જજાન ન મરિષ્યતિ ન એધતે અસૌ
ન ક્ષીયતે સવનવિત્ વ્યભિચારિણાં હિ ।
સર્વત્ર શસ્વદનપાયિ ઉપલબ્ધિમાત્રં
પ્રાણઃ યથા ઇન્દ્રિયવલેન વિકલ્પિતં સત્ ॥ ૩૮॥

અણ્ડેષુ પેશિષુ તરુષુ અવિનિશ્ચિતેષુ
પ્રાણઃ હિ જીવમ્ ઉપધાવતિ તત્ર તત્ર ।
સન્ને યત્ ઇન્દ્રિયગણે અહમિ ચ પ્રસુપ્તે
કૂટસ્થઃ આશયમૃતે તત્ અનુસ્મૃતિઃ નઃ ॥ ૩૯॥

યઃ હિ અબ્જ નાભ ચરણ એષણયોઃ ઉભક્ત્યા
ચેતોમલાનિ વિધમેત્ ગુણકર્મજાનિ ।
તસ્મિન્ વિશુદ્ધઃ ઉપલભ્યતઃ આત્મતત્ત્વમ્
સાક્ષાત્ યથા અમલદૃશઃ સવિતૃપ્રકાશઃ ॥ ૪૦॥

કર્મયોગં વદત નઃ પુરુષઃ યેન સંસ્કૃતઃ ।
વિધૂય ઇહ આશુ કર્માણિ નૈષ્કર્મ્યં વિન્દતે પરમ્ ॥ ૪૧॥

એવં પ્રશ્નમ્ ઋષિન્ પૂર્વમ્ અપૃચ્છં પિતુઃ અન્તિકે ।
ન અબ્રુવન્ બ્રહ્મણઃ પુત્રાઃ તત્ર કારણમ્ ઉચ્યતામ્ ॥ ૪૨॥

આવિર્હોત્રઃ ઉવાચ ।
કર્મ અકર્મવિકર્મ ઇતિ વેદવાદઃ ન લૌકિકઃ ।
વેદસ્ય ચ ઈશ્વરાત્મત્વાત્ તત્ર મુહ્યન્તિ સૂરયઃ ॥ ૪૩॥

પરોક્ષવાદઃ વેદઃ અયં બાલાનામ્ અનુશાસનમ્ ।
કર્મમોક્ષાય કર્માણિ વિધત્તે હિ અગદં યથા ॥ ૪૪॥

ન આચરેત્ યઃ તુ વેદ ઉક્તં સ્વયમ્ અજ્ઞઃ અજિતેન્દ્રિયઃ ।

વિકર્મણા હિ અધર્મેણ મૃત્યોઃ મૃત્યુમ્ ઉપૈતિ સઃ ॥ ૪૫॥

વેદ ઉક્તમ્ એવ કુર્વાણઃ નિઃસઙ્ગઃ અર્પિતમ્ ઈશ્વરે ।
નૈષ્કર્મ્યાં લભતે સિદ્ધિં રોચનાર્થા ફલશ્રુતિઃ ॥ ૪૬॥

યઃ આશુ હૃદયગ્રન્થિં નિર્જિહીષુઃ પરાત્મનઃ ।
વિધિના ઉપચરેત્ દેવં તન્ત્ર ઉક્તેન ચ કેશવમ્ ॥ ૪૭॥

લબ્ધ અનુગ્રહઃ આચાર્યાત્ તેન સન્દર્શિતાગમઃ ।
મહાપુરુષમ્ અભ્યર્ચેત્ મૂર્ત્યા અભિમતયા આત્મનઃ ॥ ૪૮॥

શુચિઃ સંમુખમ્ આસીનઃ પ્રાણસંયમનાદિભિઃ ।
પિણ્ડં વિશોધ્ય સંન્યાસકૃતરક્ષઃ અર્ચયેત્ હરિમ્ ॥ ૪૯॥

અર્ચાદૌ હૃદયે ચ અપિ યથાલબ્ધ ઉપચારકૈઃ ।
દ્રવ્યક્ષિતિઆત્મલિઙ્ગાનિ નિષ્પાદ્ય પ્રોક્ષ્ય ચ આસનમ્ ॥ ૫૦॥

પાદ્યાદીન્ ઉપકલ્પ્યા અથ સંનિધાપ્ય સમાહિતઃ ।
હૃત્ આદિભિઃ કૃતન્યાસઃ મૂલમન્ત્રેણ ચ અર્ચયેત્ ॥ ૫૧॥

સાઙ્ગોપાઙ્ગાં સપાર્ષદાં તાં તાં મૂર્તિં સ્વમન્ત્રતઃ ।
પાદ્ય અર્ઘ્યાચમનીયાદ્યૈઃ સ્નાનવાસઃવિભૂષણૈઃ ॥ ૫૨॥

ગન્ધમાલ્યાક્ષતસ્રગ્ભિઃ ધૂપદીપહારકૈઃ ।
સાઙ્ગં સમ્પૂજ્ય વિધિવત્ સ્તવૈઃ સ્તુત્વા નમેત્ હરિમ્ ॥ ૫૩॥

આત્માં તન્મયં ધ્યાયન્ મૂર્તિં સમ્પૂજયેત્ હરેઃ ।
શેષામ્ આધાય શિરસિ સ્વધામ્નિ ઉદ્વાસ્ય સત્કૃતમ્ ॥ ૫૪॥

એવમ્ અગ્નિ અર્કતોયાદૌ અતિથૌ હૃદયે ચ યઃ ।
યજતિ ઈશ્વરમ્ આત્માનમ્ અચિરાત્ મુચ્યતે હિ સઃ ॥ ૫૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે નિમિજાયન્તસંવાદે
માયાકર્મબ્રહ્મનિરૂપણં તૃતીયોઽધ્યાયઃ ॥ ૩॥

અથ ચતુર્થોઽધ્યાયઃ ।
રાજા ઉવાચ ।
યાનિ યાનિ ઇહ કર્માણિ યૈઃ યૈઃ સ્વચ્છન્દજન્મભિઃ ।
ચક્રે કરોતિ કર્તા વા હરિઃ તાનિ બ્રુવન્તુ નઃ ॥ ૧॥

દ્રુમિલઃ ઉવાચ ।
યઃ વા અનન્તસ્ય ગુણાન્ અનન્તાન્
    અનુક્રમિષ્યન્ સઃ તુ બાલબુદ્ધિઃ ।
રજાંસિ ભૂમેઃ ગણયેત્ કથઞ્ચિત્
    કાલેન ન એવ અખિલશક્તિધામ્નઃ ॥ ૨॥

ભૂતૈઃ યદા પઞ્ચભિઃ આત્મસૃષ્ટૈઃ
    પુરં વિરાજં વિરચય્ય તસ્મિન્ ।
સ્વાંશેન વિષ્ટઃ પુરુષાભિધાન
    મવાપ નારાયણઃ આદિદેવઃ ॥ ૩॥

યત્ કાયઃ એષઃ ભુવનત્રયસંનિવેશઃ
    યસ્ય ઇન્દ્રિયૈઃ તનુભૃતામ્ ઉભયૈન્દ્રિયાણિ ।
જ્ઞાનં સ્વતઃ શ્વસનતઃ બલમ્ ઓજઃ ઈહા
    સત્ત્વાદિભિઃ સ્થિતિલયૌદ્ભવઃ આદિકર્તા ॥ ૪॥

આદૌ અભૂત્ શતધૃતી રજસ અસ્ય સર્ગે
    વિષ્ણુ સ્થિતૌ ક્રતુપતિઃ દ્વિજધર્મસેતુઃ ।
રુદ્રઃ અપિ અયાય તમસા પુરુષઃ સઃ આદ્યઃ
    ઇતિ ઉદ્ભવસ્થિતિલયાઃ સતતં પ્રજાસુ ॥ ૫॥

ધર્મસ્ય દક્ષદુહિતર્યજનિષ્ટઃ મૂર્ત્યા
    નારાયણઃ નરઃ ઋષિપ્રવરઃ પ્રશાન્તઃ ।
નૈષ્કર્મ્યલક્ષણમ્ ઉવાચ ચચાર કર્મ
    યઃ અદ્ય અપિ ચ આસ્ત ઋષિવર્યનિષેવિતાઙ્ઘ્રિઃ ॥ ૬॥

ઇન્દ્રઃ વિશઙ્ક્ય મમ ધામ જિઘૃક્ષતિ ઇતિ
    કામં ન્યયુઙ્ક્ત સગણં સઃ બદરિઉપાખ્યમ્ ।
ગત્વા અપ્સરોગણવસન્તસુમન્દવાતૈઃ
    સ્ત્રીપ્રેક્ષણ ઇષુભિઃ અવિધ્યતત્ મહિજ્ઞઃ ॥ ૭॥

વિજ્ઞાય શક્રકૃતમ્ અક્રમમ્ આદિદેવઃ
    પ્રાહ પ્રહસ્ય ગતવિસ્મયઃ એજમાનાન્ ।
મા ભૈષ્ટ ભો મદન મારુત દેવવધ્વઃ
    ગૃહ્ણીત નઃ બલિમ્ અશૂન્યમ્ ઇમં કુરુધ્વમ્ ॥ ૮॥

ઇત્થં બ્રુવતિ અભયદે નરદેવ દેવાઃ

સવ્રીડનમ્રશિરસઃ સઘૃણમ્ તમ્ ઊચુઃ ।
ન એતત્ વિભો ત્વયિ પરે અવિકૃતે વિચિત્રમ્
સ્વારામધીઃ અનિકરાનતપાદપદ્મે ॥ ૯॥

ત્વાં સેવતાં સુરકૃતા બહવઃ અન્તરાયાઃ
સ્વૌકો વિલઙ્ઘ્ય પરમં વ્રજતાં પદં તે ।
ન અન્યસ્ય બર્હિષિ બલીન્ દદતઃ સ્વભાગાન્
ધત્તે પદં ત્વમ્ અવિતા યદિ વિઘ્નમૂર્ધ્નિ ॥ ૧૦॥

ક્ષુત્ તૃટ્ત્રિકાલગુણમારુતજૈહ્વ્યશૈશ્ન્યાન્
અસ્માન્ અપારજલધીન્ અતિતીર્ય કેચિત્ ।
ક્રોધસ્ય યાન્તિ વિફલસ્ય વશ પદે ગોઃ
મજ્જન્તિ દુશ્ચરતપઃ ચ વૃથા ઉત્સૃજન્તિ ॥ ૧૧॥

ઇતિ પ્રગૃણતાં તેષાં સ્ત્રિયઃ અતિ અદ્ભુતદર્શનાઃ ।
દર્શયામાસ શુશ્રૂષાં સ્વર્ચિતાઃ કુર્વતીઃ વિભુઃ ॥ ૧૨॥

તે દેવ અનુચરાઃ દૃષ્ટ્વા સ્ત્રિયઃ શ્રીઃ ઇવ રૂપિણીઃ ।
ગન્ધેન મુમુહુઃ તાસાં રૂપ ઔદાર્યહતશ્રિયઃ ॥ ૧૩॥

તાન્ આહ દેવદેવ ઈશઃ પ્રણતાન્ પ્રહસન્ ઇવ ।
આસામ્ એકતમાં વૃઙ્ગ્ધ્વં સવર્ણાં સ્વર્ગભૂષણામ્ ॥

૧૪॥

ઓમ્ ઇતિ આદેશમ્ આદાય નત્વા તં સુરવન્દિનઃ ।
ઉર્વશીમ્ અપ્સરઃશ્રેષ્ઠાં પુરસ્કૃત્ય દિવં યયુઃ ॥ ૧૫॥

ઇન્દ્રાય આનમ્ય સદસિ શ્રુણ્વતાં ત્રિદિવૌકસામ્ ।
ઊચુઃ નારાયણબલં શક્રઃ તત્ર આસ વિસ્મિતઃ ॥ ૧૬॥

હંસસ્વરૂપી અવદદત્ અચ્યુતઃ આત્મયોગમ્
દત્તઃ કુમાર ઋષભઃ ભગવાન્ પિતા નઃ ।
વિષ્ણુઃ શિવાય જગતાં કલયા અવતીર્ણઃ
તેન આહૃતાઃ મધુભિદા શ્રુતયઃ હયાસ્યે ॥ ૧૭॥

ગુપ્તઃ અપિ અયે મનુઃ ઇલા ઓષધયઃ ચ માત્સ્યે
ક્રૌડે હતઃ દિતિજઃ ઉદ્ધરતા અમ્ભસઃ ક્ષ્મામ્ ।
કૌર્મે ધૃતઃ અદ્રિઃ અમૃત ઉન્મથને સ્વપૃષ્ઠે

ગ્રાહાત્ પ્રપન્નમિભરાજમ્ અમુઞ્ચત્ આર્તમ્ ॥ ૧૮॥

સંસ્તુન્વતઃ અબ્ધિપતિતાન્ શ્રમણાન્ ઋષીં ચ
શક્રં ચ વૃત્રવધતઃ તમસિ પ્રવિષ્ટમ્ ।
દેવસ્ત્રિયઃ અસુરગૃહે પિહિતાઃ અનાથાઃ
જઘ્ને અસુરેન્દ્રમ્ અભયાય સતાં નૃસિંહે ॥ ૧૯॥

દેવ અસુરે યુધિ ચ દૈત્યપતીન્ સુરાર્થે
હત્વા અન્તરેષુ ભુવનાનિ અદધાત્ કલાભિઃ ।
ભૂત્વા અથ વામનઃ ઇમામ્ અહરત્ બલેઃ ક્ષ્મામ્
યાઞ્ચાચ્છલેન સમદાત્ અદિતેઃ સુતેભ્યઃ ॥ ૨૦॥

નિઃક્ષત્રિયામ્ અકૃત ગાં ચ ત્રિઃસપ્તકૃત્વઃ
રામઃ તુ હૈહયકુલ અપિ અયભાર્ગવ અગ્નિઃ ।
સઃ અબ્ધિં બબન્ધ દશવક્ત્રમ્ અહન્ સલઙ્કમ્
સીતાપતિઃ જયતિ લોકમ્ અલઘ્નકીર્તિઃ ॥ ૨૧॥

ભૂમેઃ ભર અવતરણાય યદુષિ અજન્મા જાતઃ
કરિષ્યતિ સુરૈઃ અપિ દુષ્કરાણિ ।
વાદૈઃ વિમોહયતિ યજ્ઞકૃતઃ અતદર્હાન્
શૂદ્રાં કલૌ ક્ષિતિભુજઃ ન્યહનિષ્યદન્તે ॥ ૨૨॥

એવંવિધાનિ કર્માણિ જન્માનિ ચ જગત્ પતેઃ ।
ભૂરીણિ ભૂરિયશસઃ વર્ણિતાનિ મહાભુજ ॥ ૨૩॥

ઇતિ શ્રીમદ્ભગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે નિમિજાયન્તસંવાદે
ચતુર્થોઽધ્યાયઃ ॥ ૪॥

અથ પઞ્ચમોઽધ્યાયઃ ।
રાજા ઉવાચ ।
ભગવન્તં હરિં પ્રાયઃ ન ભજન્તિ આત્મવિત્તમાઃ ।
તેષામ્ અશાન્તકામાનાં કા નિષ્ઠા અવિજિતાત્મનામ્ ॥ ૧॥

ચમસઃ ઉવાચ ।
મુખબાહૂરુપાદેભ્યઃ પુરુષસ્ય આશ્રમૈઃ સહ ।
ચત્વારઃ જજ્ઞિરે વર્ણાઃ ગુણૈઃ વિપ્રાદયઃ પૃથક્ ॥ ૨॥

યઃ એષાં પુરુષં સાક્ષાત્ આત્મપ્રભવમ્ ઈશ્વરમ્ ।
ન ભજન્તિ અવજાનન્તિ સ્થાનાત્ ભ્રષ્ટાઃ પતન્તિ અધઃ ॥ ૩॥

દૂરે હરિકથાઃ કેચિત્ દૂરે ચ અચ્યુતકીર્ત્તનાઃ ।
સ્ત્રિયઃ શૂદ્રાદયઃ ચ એવ તે અનુકમ્પ્યા ભવાદૃશામ્ ॥ ૪॥

વિપ્રઃ રાજન્યવૈશ્યૌ ચ હરેઃ પ્રાપ્તાઃ પદાન્તિકમ્ ।
શ્રૌતેન જન્મના અથ અપિ મુહ્યન્તિ આમ્નાયવાદિનઃ ॥ ૫॥

કર્મણિ અકોવિદાઃ સ્તબ્ધાઃ મૂર્ખાઃ પણ્ડિતમાનિનઃ ।
વદન્તિ ચાટુકાત્ મૂઢાઃ યયા માધ્વ્યા ગિર ઉત્સુકાઃ ॥ ૬॥

રજસા ઘોરસઙ્કલ્પાઃ કામુકાઃ અહિમન્યવઃ ।
દામ્ભિકાઃ માનિનઃ પાપાઃ વિહસન્તિ અચ્યુતપ્રિયાન્ ॥ ૭॥

વદન્તિ તે અન્યોન્યમ્ ઉપાસિતસ્ત્રિયઃ
ગૃહેષુ મૈથુન્યસુખેષુ ચ આશિષઃ ।
યજન્તિ અસૃષ્ટાન્ અવિધાન્ અદક્ષિણમ્
વૃત્ત્યૈ પરં ઘ્નન્તિ પશૂન્ અતદ્વિદઃ ॥ ૮॥

શ્રિયા વિભૂત્યા અભિજનેન વિદ્યયા
ત્યાગેન રૂપેણ બલેન કર્મણા
સતઃ અવમન્યન્તિ હરિપ્રિયાન્ ખલાઃ ॥ ૯॥

સર્વેષુ શશ્વત્ તનુભૃત્ સ્વવસ્થિતમ્
યથા સ્વમ્ આત્માનમ્ અભીષ્ટમ્ ઈશ્વરમ્ ।
વેદોપગીતં ચ ન શ્રૃણ્વતે અબુધાઃ
મનોરથાનાં પ્રવદન્તિ વાર્તયા ॥ ૧૦॥

લોકે વ્યવાય આમિષમ્ અદ્યસેવા
નિત્યાઃ તુ જન્તોઃ ન હિ તત્ર ચોદના ।
વ્યવસ્થિતિઃ તેષુ વિવાહયજ્ઞ
સુરાગ્રહૈઃ આસુ નિવૃત્તિઃ ઇષ્ટા ॥ ૧૧॥

ધનં ચ ધર્મએકફલં યતઃ વૈ
જ્ઞાનં સવિજ્ઞાનમ્ અનુપ્રશાન્તિ ।
ગૃહેષુ યુઞ્જન્તિ કલેવરસ્ય
મૃત્યું ન પશ્યન્તિ દુરન્તવીર્યમ્ ॥ ૧૨॥

યત્ ઘ્રાણભક્ષઃ વિહિતઃ સુરાયાઃ
    તથા પશોઃ આલભનં ન હિંસા ।
એવં વ્યવાયઃ પ્રજયા ન રત્યા
    ઇઅમં વિશુદ્ધં ન વિદુઃ સ્વધર્મમ્ ॥ ૧૩॥

યે તુ અનેવંવિદઃ અસન્તઃ સ્તબ્ધાઃ સત્ અભિમાનિનઃ ।
પશૂન્ દ્રુહ્યન્તિ વિસ્રબ્ધાઃ પ્રેત્ય ખાદન્તિ તે ચ તાન્ ॥ ૧૪॥

દ્વિષન્તઃ પરકાયેષુ સ્વાત્માનં હરિમ્ ઈશ્વરમ્ ।
મૃતકે સાનુબન્ધે અસ્મિન્ બદ્ધસ્નેહાઃ પતન્તિ અધઃ ॥ ૧૫॥

યે કૈવલ્યમ્ અસમ્પ્રાપ્તાઃ યે ચ અતીતાઃ ચ મૂઢતામ્ ।
ત્રૈવર્ગિકાઃ હિ અક્ષણિકાઃ આત્માનં ઘાતયન્તિ તે ॥ ૧૬॥

એતઃ આત્મહનઃ અશાન્તાઃ અજ્ઞાને જ્ઞાનમાનિનઃ ।
સીદન્તિ અકૃતકૃત્યાઃ વૈ કાલધ્વસ્તમનોરથાઃ ॥ ૧૭॥

હિત્વા આત્યાય અસરચિતાઃ ગૃહ અપત્યસુહૃત્ શ્રિયઃ ।
તમઃ વિશન્તિ અનિચ્છન્તઃ વાસુદેવપરાઙ્મુખાઃ ॥ ૧૮॥

રાજા ઉવાચ ।
કસ્મિન્ કાલે સઃ ભગવાન્ કિં વર્ણઃ કીદૃશઃ નૃભિઃ ।
નામ્ના વા કેન વિધિના પૂજ્યતે તત્ ઇહ ઉચ્યતામ્ ॥ ૧૯॥

કરભાજનઃ ઉવાચ ।
કૃતં ત્રેતા દ્વાપરં ચ કલિઃ ઇત્યેષુ કેશવઃ ।
નાનાવર્ણ અભિધાકારઃ નાના એવ વિધિના ઇજ્યતે ॥ ૨૦॥

કૃતે શુક્લઃ ચતુર્બાહુઃ જટિલઃ વલ્કલામ્બરઃ ।
કૃષ્ણાજિનૌપવીતાક્ષાન્ બિભ્રત્ દણ્ડકમણ્ડલૂન્ ॥ ૨૧॥

મનુષ્યાઃ તુ તદા શાન્તાઃ નિર્વૈરાઃ સુહૃદઃ સમાઃ ।
યજન્તિ તપસા દેવં શમેન ચ દમેન ચ ॥ ૨૨॥

હંસઃ સુપર્ણઃ વૈકુણ્ઠઃ ધર્મઃ યોગેશ્વરઃ અમલઃ ।
ઈશ્વરઃ પુરુષઃ અવ્યક્તઃ પરમાત્મા ઇતિ ગીયતે ॥ ૨૩॥

ત્રેતાયાં રક્તવર્ણઃ અસૌ ચતુર્બાહુઃ ત્રિમેખલઃ ।
હિરણ્યકેશઃ ત્રયી આત્મા સ્રુક્સ્રુવાદિ ઉપલક્ષણઃ ॥ ૨૪॥

તં તદા મનુજા દેવં સર્વદેવમયં હરિમ્ ।
યજન્તિ વિદ્યયા ત્રય્યા ધર્મિષ્ઠાઃ બ્રહ્મવાદિનઃ ॥ ૨૫॥

વિષ્ણુઃ યજ્ઞઃ પૃષ્ણિગર્ભઃ સર્વદેવઃ ઉરુક્રમઃ ।
વૃષાકપિઃ જયન્તઃ ચ ઉરુગાય ઇતિ ઈર્યતે ॥ ૨૬॥

દ્વાપરે ભગવાન્ શ્યામઃ પીતવાસા નિજાયુધઃ ।
શ્રીવત્સાદિભિઃ અઙ્કૈઃ ચ લક્ષણૈઃ ઉપલક્ષિતઃ ॥ ૨૭॥

તં તદા પુરુષં મર્ત્યા મહારાજોપલક્ષણમ્ ।
યજન્તિ વેદતન્ત્રાભ્યાં પરં જિજ્ઞાસવઃ નૃપ ॥ ૨૮॥

નમઃ તે વાસુદેવાય નમઃ સઙ્કર્ષણાય ચ ।
પ્રદ્યુમ્નાય અનિરુદ્ધાય તુભ્યં ભગવતે નમઃ ॥ ૨૯॥

નારાયણાય ઋષયે પુરુષાય મહાત્મને ।
વિશ્વેશ્વરાય વિશ્વાય સર્વભૂતાત્મને નમઃ ॥ ૩૦॥

ઇતિ દ્વાપરઃ ઉર્વીશ સ્તુવન્તિ જગદીશ્વરમ્ ।
નાનાતન્ત્રવિધાનેન કલૌ અપિ યથા શ્રુણુ ॥ ૩૧॥

કૃષ્ણવર્ણં ત્વિષાકૃષ્ણં સાઙ્ગોપાઙ્ગાસ્ત્ર
પાર્ષદમ્ ।
યજ્ઞૈઃ સઙ્કીર્તનપ્રાયૈઃ યજન્તિ હિ સુમેધસઃ ॥ ૩૨॥

ધ્યેયં સદા પરિભવઘ્નમ્ અભીષ્ટદોહમ્
    તીર્થાસ્પદં શિવવિરિઞ્ચિનુતં શરણ્યમ્ ।
ભૃત્યાર્તિહન્ પ્રણતપાલ ભવાબ્ધિપોતમ્
    વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥ ૩૩॥

ત્યક્ત્વા સુદુસ્ત્યજસુરેપ્સિતરાજ્યલક્ષ્મીમ્
    ધર્મિષ્ઠઃ આર્યવચસા યત્ અગાત્ અરણ્યમ્ ।
માયામૃગં દયિતયા ઇપ્સિતમ્ અન્વધાવત્
    વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥ ૩૪॥

એવં યુગાનુરૂપાભ્યાં ભગવાન્ યુગવર્તિભિઃ ।
મનુજૈઃ ઇજ્યતે રાજન્ શ્રેયસામ્ ઈશ્વરઃ હરિઃ ॥ ૩૫॥

કલિં સભાજયન્તિ આર્યા ગુણજ્ઞાઃ સારભાગિનઃ ।

યત્ર સઙ્કીર્તનેન એવ સર્વઃ સ્વાર્થઃ અભિલભ્યતે ॥ ૩૬॥

ન હિ અતઃ પરમઃ લાભઃ દેહિનાં ભ્રામ્યતામ્ ઇહ ।
યતઃ વિન્દેત પરમાં શાન્તિં નશ્યતિ સંસૃતિઃ ॥ ૩૭॥

કૃતાદિષુ પ્રજા રાજન્ કલૌ ઇચ્છન્તિ સમ્ભવમ્ ।
કલૌ ખલુ ભવિષ્યન્તિ નારાયણપરાયણાઃ ॥ ૩૮॥

ક્વચિત્ ક્વચિત્ મહારાજ દ્રવિડેષુ ચ ભૂરિશઃ ।
તામ્રપર્ણી નદી યત્ર કૃતમાલા પયસ્વિની ॥ ૩૯॥

કાવેરી ચ મહાપુણ્યા પ્રતીચી ચ મહાનદી ।
યે પિબન્તિ જલં તાસાં મનુજા મનુજેશ્વર ।
પ્રાયઃ ભક્તાઃ ભગવતિ વાસુદેવઃ અમલ આશયાઃ ॥ ૪૦॥

દેવર્ષિભૂતાપ્તનૃણા પિતૃણાં
    ન કિઙ્કરઃ ન અયં ઋણી ચ રાજન્ ।
સર્વાત્મના યઃ શરણં શરણ્યમ્
    ગતઃ મુકુન્દં પરિહૃત્ય કર્તુમ્ ॥ ૪૧॥

સ્વપાદમૂલં ભજતઃ પ્રિયસ્ય
    ત્યક્તાન્યભાવસ્ય હરિઃ પરેશઃ ।
વિકર્મ યત્ ચ ઉત્પતિતં કથઞ્ચિત્
    ધુનોતિ સર્વં હૃદિ સંનિવિષ્ટઃ ॥ ૪૨॥

નારદઃ ઉવાચ ।
ધર્માન્ ભાગવતાન્ ઇત્થં શ્રુત્વા અથ મિથિલેશ્વરઃ ।
જાયન્ત ઇયાન્ મુનીન્ પ્રીતઃ સોપાધ્યાયઃ હિ અપૂજયત્ ॥ ૪૩॥

તતઃ અન્તઃ દધિરે સિદ્ધાઃ સર્વલોકસ્ય પશ્યતઃ ।
રાજા ધર્માન્ ઉપાતિષ્ઠન્ અવાપ પરમાં ગતિમ્ ॥ ૪૪॥

ત્વમ્ અપિ એતાન્ મહાભાગ ધર્માન્ ભાગવતાન્ શ્રુતાન્ ।
આસ્થિતઃ શ્રદ્ધયા યુક્તઃ નિઃસઙ્ગઃ યાસ્યસે પરમ્ ॥ ૪૫॥

યુવયોઃ ખલુ દમ્પત્યોઃ યશસા પૂરિતં જગત્ ।
પુત્રતામ્ અગમત્ યત્ વાં ભગવાન્ ઈશ્વરઃ હરિઃ ॥ ૪૬॥

દર્શનાલિઙ્ગનાલાપૈઃ શયનાસનભોજનૈઃ ।

આત્મા વાં પાવિતઃ કૃષ્ણે પુત્રસ્નેહ પ્રકુર્વતોઃ ॥ ૪૭॥

વૈરેણ યં નૃપતયઃ શિશુપાલપૌણ્ડ્ર
    શાલ્વાદયઃ ગતિવિલાસવિલોકનાદ્યૈઃ ।
ધ્યાયન્તઃ આકૃતધિયઃ શયનાસનાદૌ
    તત્ સામ્યમ્ આપુઃ અનુરક્તધિયાં પુનઃ કિમ્ ॥ ૪૮॥

મા અપત્યબુદ્ધિમ્ અકૃથાઃ કૃષ્ણે સર્વાત્મનઈશ્વરે ।
માયામનુષ્યભાવેન ગૂઢ ઐશ્વર્યે પરે અવ્યયે ॥ ૪૯॥

ભૂભારરાજન્યહન્તવે ગુપ્તયે સતામ્ ।
અવતીર્ણસ્ય નિર્વૃત્યૈ યશઃ લોકે વિતન્યતે ॥ ૫૦॥

શ્રીશુકઃ ઉવાચ ।
એતત્ શ્રુત્વા મહાભાગઃ વસુદેવઃ અતિવિસ્મિતઃ ।
દેવકી ચ મહાભાગાઃ જહતુઃ મોહમ્ આત્મનઃ ॥ ૫૧॥

ઇતિહાસમ્ ઇમં પુણ્યં ધારયેત્ યઃ સમાહિતઃ ।
સઃ વિધૂય ઇહ શમલં બ્રહ્મભૂયાય કલ્પતે ॥ ૫૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે વસુદેવનારદસંવાદે
પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

અથ ષષ્ઠોઽધ્યાયઃ ।
શ્રીશુકઃ ઉવાચ ।
અથ બ્રહ્મા આત્મજૈઃ દેવૈઃ પ્રજેશૈઃ આવૃતઃ અભ્યગાત્ ।
ભવઃ ચ ભૂતભવ્યઈશઃ યયૌ ભૂતગણૈઃ વૃતઃ ॥ ૧॥

ઇન્દ્રઃ મરુદ્ભિઃ ભગવાન્ આદિત્યાઃ વસવઃ અશ્વિનૌ ।
ઋભવઃ અઙ્ગિરસઃ રુદ્રાઃ વિશ્વે સાધ્યાઃ ચ દેવતાઃ ॥ ૨॥

ગન્ધર્વાપ્સરસઃ નાગાઃ સિદ્ધચારણગુહ્યકાઃ ।
ઋષયઃ પિતરઃ ચ એવ સવિદ્યાધરકિન્નરાઃ ॥ ૩॥

દ્વારકામ્ ઉપસઞ્જગ્મુઃ સર્વે કૃષ્ણાદિદૃક્ષવઃ ।
વપુષા યેન ભગવાન્ નરલોકમનોરમઃ ।
યશઃ વિતેને લોકેષુ સર્વલોકમલાપહમ્ ॥ ૪॥

તસ્યાં વિભ્રાજમાનાયાં સમૃદ્ધાયાં મહર્ધિભિઃ ।
વ્યચક્ષત અવિતૃપ્તાક્ષાઃ કૃષ્ણમ્ અદ્ભુતદર્શનમ્ ॥

૫॥

સ્વર્ગોદ્યાનૌઅપગૈઃ માલ્યૈઃ છાદયન્તઃ યદુ ઉત્તમમ્ ।
ગીર્ભિઃ ચિત્રપદાર્થાભિઃ તુષ્ટુવુઃ જગત્ ઈશ્વરમ્ ॥ ૬॥

દેવાઃ ઊચુઃ ।
નતાઃ સ્મ તે નાથ પદારવિન્દં
  બુદ્ધીન્દ્રિયપ્રાણમનોવચોભિઃ ।
યત્ ચિન્ત્યતે અન્તર્હૃદિ ભાવયુક્તૈઃ
  મુમુક્ષુભિઃ કર્મમય ઊરુપાશાત્ ॥ ૭॥

ત્વં માયયા ત્રિગુણયા આત્મનિ દુર્વિભાવ્યં
  વ્યક્તં સૃજસિ અવસિ લુમ્પસિ તત્ ગુણસ્થઃ ।
ન એતૈઃ ભવાન્ અજિત કર્મભિઃ અજ્યતે વૈ
  યત્ સ્વે સુખે અવ્યવહિતે અભિરતઃ અનવદ્યઃ ॥ ૮॥

શુદ્ધિઃ નૃણાં ન તુ તથા ઈડ્ય દુરાશયાનાં
  વિદ્યાશ્રુતાધ્યયનદાનતપક્રિયાભિઃ ।
સત્ત્વાત્મનામ્ ઋષભ તે યશસિ પ્રવૃદ્ધ
  સત્ શ્રદ્ધયા શ્રવણસમ્ભૃતયા યથા સ્યાત્ ॥ ૯॥

સ્યાત્ નઃ તવ અઙ્ઘ્રિઃ અશુભાશયધૂમકેતુઃ
  ક્ષેમાય યઃ મુનિભિઃ આર્દ્રહૃદૌહ્યમાનઃ ।
યઃ સાત્વતૈઃ સમવિભૂતયઃ આત્મવદ્ભિઃ
  વ્યૂહે અર્ચિતઃ સવનશઃ સ્વઃ અતિક્રમાય ॥ ૧૦॥

યઃ ચિન્ત્યતે પ્રયતપાણિભિઃ અધ્વરાગ્નૌ
  ત્રય્યા નિરુક્તવિધિના ઈશ હવિઃ ગૃહીત્વા ।
અધ્યાત્મયોગઃ ઉત યોગિભિઃ આત્મમાયાં
  જિજ્ઞાસુભિઃ પરમભાગવતૈઃ પરીષ્ટઃ ॥ ૧૧॥

પર્યુષ્ટયા તવ વિભો વનમાલયા ઇયં
  સંસ્પર્ધિની ભગવતી પ્રતિપત્નિવત્ શ્રીઃ ।
યઃ સુપ્રણીતમ્ અમુયાર્હણમ્ આદત્ અન્નઃ

ભૂયાત્ સદા અઙ્ઘ્રિઃ અશુભાશયધૂમકેતુઃ ॥ ૧૨॥

કેતુઃ ત્રિવિક્રમયુતઃ ત્રિપત્ પતાકઃ
યઃ તે ભયાભયકરઃ અસુરદેવચમ્વોઃ ।
સ્વર્ગાય સાધુષુ ખલુ એષુ ઇતરાય ભૂમન્
પાદઃ પુનાતુ ભગવન્ ભજતામ્ અઘં નઃ ॥ ૧૩॥

નસ્યોતગાવઃ ઇવ યસ્ય વશે ભવન્તિ
બ્રહ્માદયઃ અનુભૃતઃ મિથુરર્દ્યમાનાઃ ।
કાલસ્ય તે પ્રકૃતિપૂરુષયઓઃ પરસ્ય
શં નઃ તનોતુ ચરણઃ પુરુષોત્તમસ્ય ॥ ૧૪॥

અસ્ય અસિ હેતુઃ ઉદયસ્થિતિસંયમાનાં
અવ્યક્તજીવમહતામ્ અપિ કાલમ્ આહુઃ ।
સઃ અયં ત્રિણાભિઃ અખિલ અપચયે પ્રવૃત્તઃ
કાલઃ ગભીરરયઃ ઉત્તમપૂરુષઃ ત્વમ્ ॥ ૧૫॥

ત્વત્તઃ પુમાન્ સમધિગમ્ય યયા સ્વવીર્યં
ધત્તે મહાન્તમ્ ઇવ ગર્ભમ્ અમોઘવીર્યઃ ।
સઃ અયં તયા અનુગતઃ આત્મનઃ આણ્ડકોશં
હૈમં સસર્જ બહિઃ આવરણૈઃ ઉપેતમ્ ॥ ૧૬॥

તત્તસ્થુષઃ ચ જગતઃ ચ ભવાન્ અધીશઃ
યત્ માયયા ઉત્થગુણવિક્રિયયા ઉપનીતાન્ ।
અર્થાન્ જુષન્ અપિ હૃષીકપતે ન લિપ્તઃ
યે અન્યે સ્વતઃ પરિહૃતાત્ અપિ બિભ્યતિ સ્મ ॥ ૧૭॥

સ્માયા અવલોકલવદર્શિતભાવહારિ
ભ્રૂમણ્ડલપ્રહિતસૌરતમન્ત્રશૌણ્ડૈઃ ।
પત્ન્યઃ તુ ષોડશસહસ્રમ્ અનઙ્ગબાણૈઃ
યસ્ય ઇન્દ્રિયં વિમથિતું કરણૈઃ વિભ્વ્યઃ ॥ ૧૮॥

વિભ્વ્યઃ તવ અમૃતકથા ઉદવહાઃ ત્રિલોક્યાઃ
પાદૌ અનેજસરિતઃ શમલાનિ હન્તુમ્ ।
આનુશ્રવં શ્રુતિભિઃ અઙ્ઘ્રિજમ્ અઙ્ગસઙ્ગૈઃ
તીર્થદ્વયં શુચિષદસ્તઃ ઉપસ્પૃશન્તિ ॥ ૧૯॥

બાદરાયણિઃ ઉવાચ ।
ઇતિ અભિષ્ટૂય વિબુધૈઃ સેશઃ શતધૃતિઃ હરિમ્ ।
અભ્યભાષત ગોવિન્દં પ્રણમ્ય અમ્બરમ્ આશ્રિતઃ ॥ ૨૦॥

બ્રહ્મ ઉવાચ ।
ભૂમેઃ ભાર અવતારાય પુરા વિજ્ઞાપિતઃ પ્રભો ।
ત્વમ્ અસ્માભિઃ અશેષાત્મન્ તત્ તથા એવ ઉપપાદિતમ્ ॥ ૨૧॥

ધર્મઃ ચ સ્થાપિતઃ સત્સુ સત્યસન્ધેષુ વૈ ત્વયા ।
કીર્તિઃ ચ દિક્ષુ વિક્ષિપ્તા સર્વલોકમલાપહા ॥ ૨૨॥

અવતીર્ય યદોઃ વંશે બિભ્રત્ રૂપમ્ અનુત્તમમ્ ।
કર્માણિ ઉદ્દામવૃત્તાનિ હિતાય જગતઃ અકૃથાઃ ॥ ૨૩॥

યાનિ તે ચરિતાનિ ઈશ મનુષ્યાઃ સાધવઃ કલૌ ।
શ઼ૃણ્વન્તઃ કીર્તયન્તઃ ચ તરિષ્યન્તિ અઞ્જસા તમઃ ॥ ૨૪॥

યદુવંશે અવતીર્ણસ્ય ભવતઃ પુરુષોત્તમ ।
શરત્ શતં વ્યતીયાય પઞ્ચવિંશ અધિકં પ્રભોઃ ॥ ૨૫॥

ન અધુના તે અખિલ આધાર દેવકાર્ય અવશેષિતમ્ ।
કુલં ચ વિપ્રશાપેન નષ્ટપ્રાયમ્ અભૂત્ ઇદમ્ ॥ ૨૬॥

તતઃ સ્વધામ પરમં વિશસ્વ યદિ મન્યસે ।
સલોકાન્ લોકપાલાન્ નઃ પાહિ વૈકુણ્ઠકિઙ્કરાન્ ॥ ૨૭॥

શ્રી ભગવાન્ ઉવાચ ।
અવધારિતમ્ એતત્ મે યદાત્થ વિબુધેશ્વર ।
કૃતં વઃ કાર્યમ્ અખિલં ભૂમેઃ ભારઃ અવતારિતઃ ॥ ૨૮॥

તત્ ઇદં યાદવકુલં વીર્યશૌર્યશ્રિયોદ્ધતમ્ ।
લોકં જિઘૃક્ષત્ રુદ્ધં મે વેલયા ઇવ મહાર્ણવઃ ॥ ૨૯॥

યદિ અસંહૃત્ય દૃપ્તાનાં યદુનાં વિપુલં કુલમ્ ।
ગન્તાસ્મિ અનેન લોકઃ અયમ્ ઉદ્વેલેન વિનઙ્ક્ષ્યતિ ॥ ૩૦॥

ઇદાનીં નાશઃ આરબ્ધઃ કુલસ્ય દ્વિજશાપતઃ ।
યાસ્યામિ ભવનં બ્રહ્મન્ ન એતત્ અન્તે તવ આનઘ ॥ ૩૧॥

શ્રી શુકઃ ઉવાચ ।

ઇતિ ઉક્તઃ લોકનાથેન સ્વયમ્ભૂઃ પ્રણિપત્ય તમ્ ।
સહ દેવગણૈઃ દેવઃ સ્વધામ સમપદ્યત ॥ ૩૨॥

અથ તસ્યાં મહોત્પાતાન્ દ્વારવત્યાં સમુત્થિતાન્ ।
વિલોક્ય ભગવાન્ આહ યદુવૃદ્ધાન્ સમાગતાન્ ॥ ૩૩॥

શ્રી ભગવાન્ ઉવાચ ।
એતે વૈ સુમહોત્પાતાઃ વ્યુત્તિષ્ઠન્તિ ઇહ સર્વતઃ ।
શાપઃ ચ નઃ કુલસ્ય આસીત્ બ્રાહ્મણેભ્યઃ દુરત્યયઃ ॥ ૩૪॥

ન વસ્તવ્યમ્ ઇહ અસ્માભિઃ જિજીવિષુભિઃ આર્યકાઃ ।
પ્રભાસં સુમહત્ પુણ્યં યાસ્યામઃ અદ્ય એવ મા ચિરમ્ ॥ ૩૫॥

યત્ર સ્નાત્વા દક્ષશાપાત્ ગૃહીતઃ યક્ષ્મણોડુરાટ્ ।
વિમુક્તઃ કિલ્બિષાત્ સદ્યઃ ભેજે ભૂયઃ કલોદયમ્ ॥ ૩૬॥

વયં ચ તસ્મિન્ આપ્લુત્ય તર્પયિત્વા પિતૄન્સુરાન્ ।
ભોજયિત્વા ઉશિજઃ વિપ્રાન્ નાનાગુણવતા અન્ધસા ॥ ૩૭॥

તેષુ દાનાનિ પાત્રેષુ શ્રદ્ધયા ઉપ્ત્વા મહાન્તિ વૈ ।
વૃજિનાનિ તરિષ્યામઃ દાનૈઃ નૌભિઃ ઇવ અર્ણવમ્ ॥ ૩૮॥

શ્રી શુકઃ ઉવાચ ।
એવં ભગવતા આદિષ્ટાઃ યાદવાઃ કુલનન્દન ।
ગન્તું કૃતધિયઃ તીર્થં સ્યન્દનાન્ સમયૂયુજન્ ॥ ૩૯॥

તત્ નિરીક્ષ્ય ઉદ્ધવઃ રાજન્ શ્રુત્વા ભગવતા ઉદિતમ્ ।
દૃષ્ટ્વા અરિષ્ટાનિ ઘોરાણિ નિત્યં કૃષ્ણમ્ અનુવ્રતઃ ॥ ૪૦॥

વિવિક્તઃ ઉપસઙ્ગમ્ય જગતામ્ ઈશ્વરેશ્વરમ્ ।
પ્રણમ્ય શિરસા પાદૌ પ્રાઞ્જલિઃ તમ્ અભાષત ॥ ૪૧॥

ઉદ્ધવઃ ઉવાચ ।
દેવદેવેશ યોગેશ પુણ્યશ્રવણકીર્તન ।
સંહૃત્ય એતત્ કુલં નૂનં લોકં સન્ત્યક્ષ્યતે ભવાન્ ।
વિપ્રશાપં સમર્થઃ અપિ પ્રત્યહન્ ન યદિ ઈશ્વરઃ ॥ ૪૨॥

ન અહં તવ અઙ્ઘ્રિકમલં ક્ષણાર્ધમ્ અપિ કેશવ ।
ત્યક્તું સમુત્સહે નાથ સ્વધામ નય મામ્ અપિ ॥ ૪૩॥

તવ વિક્રીડિતં કૃષ્ણ નૃણાં પરમમઙ્ગલમ્ ।
કર્ણપીયૂષમ્ આસ્વાદ્ય ત્યજતિ અન્યસ્પૃહાં જનઃ ॥ ૪૪॥

શય્યાસનાટનસ્થાનસ્નાનક્રીડાશનાદિષુ ।
કથં ત્વાં પ્રિયમ્ આત્માનં વયં ભક્તાઃ ત્યજેમહિ ॥ ૪૫॥

ત્વયા ઉપભુક્તસ્રક્ગન્ધવાસઃ અલઙ્કારચર્ચિતાઃ ।
ઉચ્છિષ્ટભોજિનઃ દાસાઃ તવ માયાં જયેમહિ ॥ ૪૬॥

વાતાશનાઃ યઃ ઋષયઃ શ્રમણા ઊર્ધ્વમન્થિનઃ ।
બ્રહ્માખ્યં ધામ તે યાન્તિ શાન્તાઃ સંન્યાસિનઃ અમલાઃ ॥

૪૭॥

વયં તુ ઇહ મહાયોગિન્ ભ્રમન્તઃ કર્મવર્ત્મસુ ।
ત્વત્ વાર્તયા તરિષ્યામઃ તાવકૈઃ દુસ્તરં તમઃ ॥ ૪૮॥

સ્મરન્તઃ કીર્તયન્તઃ તે કૃતાનિ ગદિતાનિ ચ ।
ગતિઉત્સ્મિતઈક્ષણક્ષ્વેલિ યત્ નૃલોકવિડમ્બનમ્ ॥ ૪૯॥

શ્રી શુકઃ ઉવાચ ।
એવં વિજ્ઞાપિતઃ રાજન્ ભગવાન્ દેવકીસુતઃ ।
એકાન્તિનં પ્રિયં ભૃત્યમ્ ઉદ્ધવં સમભાષત ॥ ૫૦॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે દેવસ્તુત્યુદ્ધ્વવિજ્ઞાપનં નામ
ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

અથ સપ્તમોઽધ્યાયઃ ।
શ્રી ભગવાન્ ઉવાચ ।
યત્ આત્થ માં મહાભાગ તત્ ચિકીર્ષિતમ્ એવ મે ।
બ્રહ્મા ભવઃ લોકપાલાઃ સ્વર્વાસં મે અભિકાઙ્ક્ષિણઃ ॥ ૧॥

મયા નિષ્પાદિતં હિ અત્ર દેવકાર્યમ્ અશેષતઃ ।
યદર્થમ્ અવતીર્ણઃ અહમ્ અંશેન બ્રહ્મણાર્થિતઃ ॥ ૨॥

કુલં વૈ શાપનિર્દગ્ધં નઙ્ક્ષ્યતિ અન્યોન્યવિગ્રહાત્ ।
સમુદ્રઃ સપ્તમે અહ્ન્યેતાં પુરીં ચ પ્લાવયિષ્યતિ ॥ ૩॥

યઃ હિ એવ અયં મયા ત્યક્તઃ લોકઃ અયં નષ્ટમઙ્ગલઃ ।

ભવિષ્યતિ અચિરાત્ સાધો કલિનાઽપિ નિરાકૃતઃ ॥ ૪॥

ન વસ્તવ્યં ત્વયા એવ ઇહ મયા ત્યક્તે મહીતલે ।
જનઃ અધર્મરુચિઃ ભદ્રઃ ભવિષ્યતિ કલૌ યુગે ॥ ૫॥

ત્વં તુ સર્વં પરિત્યજ્ય સ્નેહં સ્વજનબન્ધુષુ ।
મયિ આવેશ્ય મનઃ સમ્યક્ સમદૃક્ વિચરસ્વ ગામ્ ॥ ૬॥

યત્ ઇદં મનસા વાચા ચક્ષુર્ભ્યાં શ્રવણાદિભિઃ ।
નશ્વરં ગૃહ્યમાણં ચ વિદ્ધિ માયામનોમયમ્ ॥ ૭॥

પુંસઃ અયુક્તસ્ય નાનાર્થઃ ભ્રમઃ સઃ ગુણદોષભાક્ ।
કર્માકર્મવિકર્મ ઇતિ ગુણદોષધિયઃ ભિદા ॥ ૮॥

તસ્માત્ યુક્તેન્દ્રિયગ્રામઃ યુક્તચિત્તઃ ઇદં જગત્ ।
આત્મનિ ઈક્ષસ્વ વિતતમ્ આત્માનં મયિ અધીશ્વરે ॥ ૯॥

જ્ઞાનવિજ્ઞાનસંયુક્તઃ આત્મભૂતઃ શરીરિણામ્ ।
આત્માનુભવતુષ્ટાત્મા ન અન્તરાયૈઃ વિહન્યસે ॥ ૧૦॥

દોષબુદ્ધ્યા ઉભયાતીતઃ નિષેધાત્ ન નિવર્તતે ।
ગુણબુદ્ધ્યા ચ વિહિતં ન કરોતિ યથા અર્ભકઃ ॥ ૧૧॥

સર્વભૂતસુહૃત્ શાન્તઃ જ્ઞાનવિજ્ઞાનનિશ્ચયઃ ।
પશ્યન્ મદાત્મકં વિશ્વં ન વિપદ્યેત વૈ પુનઃ ॥ ૧૨॥

શ્રી શુકઃ ઉવાચ ।
ઇતિ આદિષ્ટઃ ભગવતા મહાભાગવતઃ નૃપ ।
ઉદ્ધવઃ પ્રણિપત્ય આહ તત્ત્વજિજ્ઞાસુઃ અચ્યુતમ્ ॥ ૧૩॥

ઉદ્ધવઃ ઉવાચ ।
યોગેશ યોગવિન્યાસ યોગાત્મ યોગસમ્ભવ ।
નિઃશ્રેયસાય મે પ્રોક્તઃ ત્યાગઃ સંન્યાસલક્ષણઃ ॥ ૧૪॥

ત્યાગઃ અયં દુષ્કરઃ ભૂમન્ કામાનાં વિષયાત્મભિઃ ।
સુતરાં ત્વયિ સર્વાત્મન્ ન અભક્તૈઃ ઇતિ મે મતિઃ ॥ ૧૫॥

સઃ અહં મમ અહમ્ ઇતિ મૂઢમતિઃ વિગાઢઃ
    ત્વત્ માયયા વિરચિત આત્મનિ સાનુબન્ધે ।
તત્ તુ અઞ્જસા નિગદિતં ભવતા યથા અહમ્

સંસાધયામિ ભગવન્ અનુશાધિ ભૃત્યમ્ ॥ ૧૬॥

સત્યસ્ય તે સ્વદૃશઃ આત્મનઃ આત્મનઃ અન્યમ્
વક્તારમ્ ઈશ વિબુધેષુ અપિ ન અનુચક્ષે ।
સર્વે વિમોહિતધિયઃ તવ માયયા ઇમે
બ્રહ્માદયઃ તનુભૃતઃ બહિઃ અર્થભાવઃ ॥ ૧૭॥

તસ્માત્ ભવન્તમ્ અનવદ્યમ્ અનન્તપારમ્
સર્વજ્ઞમ્ ઈશ્વરમ્ અકુણ્ઠવિકુણ્ઠધિષ્ણિ અયમ્ ।
નિર્વિણ્ણધીઃ અહમ્ ઉ હ વૃજનાભિતપ્તઃ
નારાયણં નરસખં શરણં પ્રપદ્યે ॥ ૧૮॥

શ્રી ભગવાન્ ઉવાચ ।
પ્રાયેણ મનુજા લોકે લોકતત્ત્વવિચક્ષણાઃ ।
સમુદ્ધરન્તિ હિ આત્માનમ્ આત્મના એવ અશુભાશયાત્ ॥ ૧૯॥

આત્મનઃ ગુરુઃ આત્મા એવ પુરુષસ્ય વિશેષતઃ ।
યત્ પ્રત્યક્ષ અનુમાનાભ્યાં શ્રેયઃ અસૌ અનુવિન્દતે ॥ ૨૦॥

પુરુષત્વે ચ માં ધીરાઃ સાઙ્ખ્યયોગવિશારદાઃ ।
આવિસ્તરાં પ્રપશ્યન્તિ સર્વશક્તિ ઉપબૃંહિતમ્ ॥ ૨૧॥

એકદ્વિત્રિચતુષ્પાદઃ બહુપાદઃ તથા અપદઃ ।
બહ્વ્યઃ સન્તિ પુરઃ સૃષ્ટાઃ તાસાં મે પૌરુષી પ્રિયા ॥ ૨૨॥

અત્ર માં માર્ગયન્ત્યદ્ધાઃ યુક્તાઃ હેતુભિઃ ઈશ્વરમ્ ।
ગૃહ્યમાણૈઃ ગુણૈઃ લિઙ્ગૈઃ અગ્રાહ્યમ્ અનુમાનતઃ ॥ ૨૩॥

અત્ર અપિ ઉદાહરન્તિ ઇમમ્ ઇતિહાસં પુરાતનમ્ ।
અવધૂતસ્ય સંવાદં યદોઃ અમિતતેજસઃ ॥ ૨૪॥

(અથ અવધૂતગીતમ્ ।)
અવધૂતં દ્વિજં કઞ્ચિત્ ચરન્તમ્ અકુતોભયમ્ ।
કવિં નિરીક્ષ્ય તરુણં યદુઃ પપ્રચ્છ ધર્મવિત્ ॥ ૨૫॥

યદુઃ ઉવાચ ।
કુતઃ બુદ્ધિઃ ઇયં બ્રહ્મન્ અકર્તુઃ સુવિશારદા ।
યામ્ આસાદ્ય ભવાન્ લોકં વિદ્વાન્ ચરતિ બાલવત્ ॥ ૨૬॥

પ્રાયઃ ધર્માર્થકામેષુ વિવિત્સાયાં ચ માનવાઃ ।
હેતુના એવ સમીહન્તે આયુષઃ યશસઃ શ્રિયઃ ॥ ૨૭॥

ત્વં તુ કલ્પઃ કવિઃ દક્ષઃ સુભગઃ અમૃતભાષણઃ ।
ન કર્તા નેહસે કિઞ્ચિત્ જડોન્મત્તપિશાચવત્ ॥ ૨૮॥

જનેષુ દહ્યમાનેષુ કામલોભદવાગ્નિના ।
ન તપ્યસે અગ્નિના મુક્તઃ ગઙ્ગામ્ભસ્થઃ ઇવ દ્વિપઃ ॥ ૨૯॥

ત્વં હિ નઃ પૃચ્છતાં બ્રહ્મન્ આત્મનિ આનન્દકારણમ્ ।
બ્રૂહિ સ્પર્શવિહીનસ્ય ભવતઃ કેવલ આત્મનઃ ॥ ૩૦॥

શ્રી ભગવાન્ ઉવાચ ।
યદુના એવં મહાભાગઃ બ્રહ્મણ્યેન સુમેધસા ।
પૃષ્ટઃ સભાજિતઃ પ્રાહ પ્રશ્રય અવનતં દ્વિજઃ ॥ ૩૧॥

બ્રાહ્મણઃ ઉવાચ ।
સન્તિ મે ગુરવઃ રાજન્ બહવઃ બુદ્ધ્યા ઉપાશ્રિતાઃ ।
યતઃ બુદ્ધિમ્ ઉપાદાય મુક્તઃ અટામિ ઇહ તાન્ શ્રુણુ ॥ ૩૨॥

પૃથિવી વાયુઃ આકાશમ્ આપઃ અગ્નિઃ ચન્દ્રમા રવિઃ ।
કપોતઃ અજગરઃ સિન્ધુઃ પતઙ્ગઃ મધુકૃદ્ ગજઃ ॥ ૩૩॥

મધુહા હરિણઃ મીનઃ પિઙ્ગલા કુરરઃ અર્ભકઃ ।
કુમારી શરકૃત્ સર્પઃ ઊર્ણનાભિઃ સુપેશકૃત્ ॥ ૩૪॥

એતે મે ગુરવઃ રાજન્ ચતુર્વિંશતિઃ આશ્રિતાઃ ।
શિક્ષા વૃત્તિભિઃ એતેષામ્ અન્વશિક્ષમ્ ઇહ આત્મનઃ ॥ ૩૫॥

યતઃ યત્ અનુશિક્ષામિ યથા વા નાહુષાત્મજ ।
તત્ તથા પુરુષવ્યાઘ્ર નિબોધ કથયામિ તે ॥ ૩૬॥

ભૂતૈઃ આક્રમાણઃ અપિ ધીરઃ દૈવવશાનુગૈઃ ।
તત્ વિદ્વાન્ ન ચલેત્ માર્ગાત્ અન્વશિક્ષં ક્ષિતેઃ વ્રતમ્ ॥ ૩૭॥

શશ્વત્ પરાર્થસર્વેહઃ પરાર્થ એકાન્તસમ્ભવઃ ।
સાધુઃ શિક્ષેત ભૂભૃત્તઃ નગશિષ્યઃ પરાત્મતામ્ ॥

૩૮॥

પ્રાણવૃત્ત્યા એવ સન્તુષ્યેત્ મુનિઃ ન એવ ઇન્દ્રિયપ્રિયૈઃ ।

જ્ઞાનં યથા ન નશ્યેત ન અવકીર્યેત વાઙ્મનઃ ॥ ૩૯॥

વિષયેષુ આવિશન્ યોગી નાનાધર્મેષુ સર્વતઃ ।
ગુણદોષવ્યપેત આત્મા ન વિષજ્જેત વાયુવત્ ॥ ૪૦॥

પાર્થિવેષુ ઇહ દેહેષુ પ્રવિષ્ટઃ તત્ ગુણાશ્રયઃ ।
ગુણૈઃ ન યુજ્યતે યોગી ગન્ધૈઃ વાયુઃ ઇવ આત્મદૃક્ ॥ ૪૧॥

અન્તઃ હિતઃ ચ સ્થિરજઙ્ગમેષુ
    બ્રહ્મ આત્મભાવેન સમન્વયેન ।
વ્યાપ્ત્ય અવચ્છેદમ્ અસઙ્ગમ્ આત્મનઃ
    મુનિઃ નભઃ ત્વં વિતતસ્ય ભાવયેત્ ॥ ૪૨॥

તેજઃ અબન્નમયૈઃ ભાવૈઃ મેઘ આદ્યૈઃ વાયુના ઈરિતૈઃ ।
ન સ્પૃશ્યતે નભઃ તદ્વત્ કાલસૃષ્ટૈઃ ગુણૈઃ પુમાન્ ॥

૪૩॥

સ્વચ્છઃ પ્રકૃતિતઃ સ્નિગ્ધઃ માધુર્યઃ તીર્થભૂઃ નૃણામ્ ।
મુનિઃ પુનાતિ અપાં મિત્રમ્ ઈક્ષ ઉપસ્પર્શકીર્તનૈઃ ॥ ૪૪॥

તેજસ્વી તપસા દીપ્તઃ દુર્ધર્ષોદરભાજનઃ ।
સર્વભક્ષઃ અપિ યુક્ત આત્મા ન આદત્તે મલમ્ અગ્નિવત્ ॥ ૪૫॥

ક્વચિત્ શન્નઃ ક્વચિત્ સ્પષ્ટઃ ઉપાસ્યઃ શ્રેયઃ ઇચ્છતામ્ ।
ભુઙ્ક્તે સર્વત્ર દાતૃણાં દહન્ પ્રાક્ ઉત્તર અશુભમ્ ॥

૪૬॥

સ્વમાયયા સૃષ્ટમ્ ઇદં સત્ અસત્ લક્ષણં વિભુઃ ।
પ્રવિષ્ટઃ ઈયતે તત્ તત્ સ્વરૂપઃ અગ્નિઃ ઇવ એધસિ ॥ ૪૭॥

વિસર્ગાદ્યાઃ શ્મશાનાન્તાઃ ભાવાઃ દેહસ્ય ન આત્મનઃ ।
કલાનામ્ ઇવ ચન્દ્રસ્ય કાલેન અવ્યક્તવર્ત્મના ॥ ૪૮॥

કાલેન હિ ઓઘવેગેન ભૂતાનાં પ્રભવ અપિ અયૌ ।
નિત્યૌ અપિ ન દૃશ્યેતે આત્મનઃ અગ્નેઃ યથા અર્ચિષામ્ ॥ ૪૯॥

ગુણૈઃ ગુણાન્ ઉપાદત્તે યથાકાલં વિમુઞ્ચતિ ।
ન તેષુ યુજ્યતે યોગી ગોભિઃ ગાઃ ઇવ ગોપતિઃ ॥ ૫૦॥

બુધ્યતે સ્વેન ભેદેન વ્યક્તિસ્થઃ ઇવ તત્ ગતઃ ।
લક્ષ્યતે સ્થૂલમતિભિઃ આત્મા ચ અવસ્થિતઃ અર્કવત્ ॥ ૫૧॥

ન અતિસ્નેહઃ પ્રસઙ્ગઃ વા કર્તવ્યઃ ક્વ અપિ કેનચિત્ ।
કુર્વન્ વિન્દેત સન્તાપં કપોતઃ ઇવ દીનધીઃ ॥ ૫૨॥

કપોતઃ કશ્ચન અરણ્યે કૃતનીડઃ વનસ્પતૌ ।
કપોત્યા ભાર્યયા સાર્ધમ્ ઉવાસ કતિચિત્ સમાઃ ॥ ૫૩॥

કપોતૌ સ્નેહગુણિતહૃદયૌ ગૃહધર્મિણૌ ।
દૃષ્ટિં દૃષ્ટ્યાઙ્ગમ્ અઙ્ગેન બુદ્ધિં બુદ્ધ્યા બબન્ધતુઃ ॥

૫૪॥

શય્યાસનાટનસ્થાનવાર્તાક્રીડાશનાદિકમ્ ।
મિથુનીભૂય વિસ્રબ્ધૌ ચેરતુઃ વનરાજિષુ ॥ ૫૫॥

યં યં વાઞ્છતિ સા રાજન્ તર્પયન્તિ અનુકમ્પિતા ।
તં તં સમનયત્ કામં કૃચ્છ્રેણ અપિ અજિતૈન્દ્રિયઃ ॥ ૫૬॥

કપોતી પ્રથમં ગર્ભં ગૃહ્ણતિ કાલઃ આગતે ।
અણ્ડાનિ સુષુવે નીડે સ્વપત્યુઃ સંનિધૌ સતી ॥ ૫૭॥

તેષૂ કાલે વ્યજાયન્ત રચિતાવયવા હરેઃ ।
શક્તિભિઃ દુર્વિભાવ્યાભિઃ કોમલાઙ્ગતનૂરુહાઃ ॥ ૫૮॥

પ્રજાઃ પુપુષતુઃ પ્રીતૌ દમ્પતી પુત્રવત્સલૌ ।
શૃણ્વન્તૌ કૂજિતં તાસાં નિર્વૃતૌ કલભાષિતૈઃ ॥ ૫૯॥

તાસાં પતત્રૈઃ સુસ્પર્શૈઃ કૂજિતૈઃ મુગ્ધચેષ્ટિતૈઃ ।
પ્રત્યુદ્ગમૈઃ અદીનાનાં પિતરૌ મુદમ્ આપતુઃ ॥ ૬૦॥

સ્નેહાનુબદ્ધહૃદયૌ અન્યોન્યં વિષ્ણુમાયયા ।
વિમોહિતૌ દીનધિયૌ શિશૂન્ પુપુષતુઃ પ્રજાઃ ॥ ૬૧॥

એકદા જગ્મતુઃ તાસામ્ અન્નાર્થં તૌ કુટુમ્બિનૌ ।
પરિતઃ કાનને તસ્મિન્ અર્થિનૌ ચેરતુઃ ચિરમ્ ॥ ૬૨॥

દૃષ્ટ્વા તાન્ લુબ્ધકઃ કશ્ચિત્ યદૃચ્છ અતઃ વનેચરઃ ।
જગૃહે જાલમ્ આતત્ય ચરતઃ સ્વાલયાન્તિકે ॥ ૬૩॥

કપોતઃ ચ કપોતી ચ પ્રજાપોષે સદા ઉત્સુકૌ ।
ગતૌ પોષણમ્ આદાય સ્વનીડમ્ ઉપજગ્મતુઃ ॥ ૬૪॥

કપોતી સ્વાત્મજાન્ વીક્ષ્ય બાલકાન્ જાલસંવૃતાન્ ।
તાન્ અભ્યધાવત્ ક્રોશન્તી ક્રોશતઃ ભૃશદુઃખિતા ॥ ૬૫॥

સા અસકૃત્ સ્નેહગુણિતા દીનચિત્તા અજમાયયા ।
સ્વયં ચ અબધ્યત શિચા બદ્ધાન્ પશ્યન્તિ અપસ્મૃતિઃ ॥ ૬૬॥

કપોતઃ ચ આત્મજાન્ બદ્ધાન્ આત્મનઃ અપિ અધિકાન્ પ્રિયાન્ ।
ભાર્યાં ચ આત્મસમાં દીનઃ વિલલાપ અતિદુઃખિતઃ ॥ ૬૭॥

અહો મે પશ્યત અપાયમ્ અલ્પપુણ્યસ્ય દુર્મતેઃ ।
અતૃપ્તસ્ય અકૃતાર્થસ્ય ગૃહઃ ત્રૈવર્ગિકઃ હતઃ ॥ ૬૮॥

અનુરૂપા અનુકૂલા ચ યસ્ય મે પતિદેવતા ।
શૂન્યે ગૃહે માં સન્ત્યજ્ય પુત્રૈઃ સ્વર્યાતિ સાધુભિઃ ॥ ૬૯॥

સઃ અહં શૂન્યે ગૃહે દીનઃ મૃતદારઃ મૃતપ્રજઃ ।
જિજીવિષે કિમર્થં વા વિધુરઃ દુઃખજીવિતઃ ॥ ૭૦॥

તાન્ તથા એવ આવૃતાન્ શિગ્ભિઃ મૃત્યુગ્રસ્તાન્ વિચેષ્ટતઃ ।
સ્વયં ચ કૃપણઃ શિક્ષુ પશ્યન્ અપિ અબુધઃ અપતત્ ॥ ૭૧॥

તં લબ્ધ્વા લુબ્ધકઃ ક્રૂરઃ કપોતં ગૃહમેધિનમ્ ।
કપોતકાન્ કપોતીં ચ સિદ્ધાર્થઃ પ્રયયૌ ગૃહમ્ ॥ ૭૨॥

એવં કુટુમ્બી અશાન્ત આત્મા દ્વન્દ્વ આરામઃ પતત્ ત્રિવત્ ।
પુષ્ણન્ કુટુમ્બં કૃપણઃ સાનુબન્ધઃ અવસીદતિ ॥ ૭૩॥

યઃ પ્રાપ્ય માનુષં લોકં મુક્તિદ્વારમ્ અપાવૃતમ્ ।
ગૃહેષુ ખગવત્ સક્તઃ તમ્ આરૂઢચ્યુતં વિદુઃ ॥ ૭૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
યદ્વધૂતેતિહાસે સપ્તમોઽધ્યાયઃ ॥ ૭॥

અથાસ્ષ્ટમોઽધ્યાયઃ ।

સુખમ્ ઐન્દ્રિયકં રાજન્ સ્વર્ગે નરકઃ એવ ચ ।
દેહિનઃ યત્ યથા દુઃખં તસ્માત્ ન ઇચ્છેત તત્ બુધાઃ ॥ ૧॥

ગ્રાસં સુમૃષ્ટં વિરસં મહાન્તં સ્તોકમ્ એવ વા ।
યદૃચ્છયા એવ અપતિતં ગ્રસેત્ આજગરઃ અક્રિયઃ ॥ ૨॥

શયીત અહાનિ ભૂરીણિ નિરાહારઃ અનુપક્રમઃ ।
યદિ ન ઉપનમેત્ ગ્રાસઃ મહાહિઃ ઇવ દિષ્ટભુક્ ॥ ૩॥

ઓજઃ સહોબલયુતં બિભ્રત્ દેહમ્ અકર્મકમ્ ।
શયાનઃ વીતનિદ્રઃ ચ નેહેત ઇન્દ્રિયવાન્ અપિ ॥ ૪॥

મુનિઃ પ્રસન્નગમ્ભીરઃ દુર્વિગાહ્યઃ દુરત્યયઃ ।
અનન્તપારઃ હિ અક્ષોભ્યઃ સ્તિમિત ઉદઃ ઇવ અર્ણવઃ ॥ ૫॥

સમૃદ્ધકામઃ હીનઃ વા નારાયણપરઃ મુનિઃ ।
ન ઉત્સર્પેત ન શુષ્યેત સરિદ્ભિઃ ઇવ સાગરઃ ॥ ૬॥

દૃષ્ટ્વા સ્ત્રિયં દેવમાયાં તત્ ભાવૈઃ અજિતેન્દ્રિયઃ ।
પ્રલોભિતઃ પતતિ અન્ધે તમસિ અગ્નૌ પતઙ્ગવત્ ॥ ૭॥

યોષિત્ હિરણ્ય આભરણ અમ્બરાદિ
દ્રવ્યેષુ માયારચિતેષુ મૂઢઃ ।
પ્રલોભિતાત્મા હિ ઉપભોગબુદ્ધ્યા
પતઙ્ગવત્ નશ્યતિ નષ્ટદૃષ્ટિઃ ॥ ૮॥

સ્તોકં સ્તોકં ગ્રસેત્ ગ્રાસં દેહઃ વર્તેત યાવતા ।
ગૃહાન્ અહિંસત્ ન આતિષ્ઠેત્ વૃત્તિં માધુકરીં મુનિઃ ॥ ૯॥

અણુભ્યઃ ચ મહદ્ભ્યઃ ચ શાસ્ત્રેભ્યઃ કુશલઃ નરઃ ।
સર્વતઃ સારમ્ આદદ્યાત્ પુષ્પેભ્યઃ ઇવ ષટ્પદઃ ॥ ૧૦॥

સાયન્તનં શ્વસ્તનં વા ન સઙ્ગૃહ્ણીત ભિક્ષિતમ્ ।
પાણિપાત્ર ઉદરામત્રઃ મક્ષિકા ઇવ ન સઙ્ગ્રહી ॥ ૧૧॥

સાયન્તનં શ્વસ્તનં વા ન સઙ્ગૃહ્ણીત ભિક્ષુકઃ ।
મક્ષિકાઃ ઇવ સઙ્ગૃહ્ણન્ સહ તેન વિનશ્યતિ ॥ ૧૨॥

પદ અપિ યુવતીં ભિક્ષુઃ ન સ્પૃશેત્ દારવીમ્ અપિ ।
સ્પૃશન્ કરીવ બધ્યેત કરિણ્યા અઙ્ગસઙ્ગતઃ ॥ ૧૩॥

ન અધિગચ્છેત્ સ્ત્રિયં પ્રાજ્ઞઃ કર્હિચિત્ મૃત્યુમ્ આત્મનઃ ।
બલ અધિકૈઃ સ હન્યેત ગજૈઃ અન્યૈઃ ગજઃ યથા ॥ ૧૪॥

ન દેયં ન ઉપભોગ્યં ચ લુબ્ધૈઃ યત્ દુઃખ સઞ્ચિતમ્ ।
ભુઙ્ક્તે તત્ અપિ તત્ ચ અન્યઃ મધુહેવ અર્થવિત્ મધુ ॥ ૧૫॥

સુખ દુઃખ ઉપાર્જિતૈઃ વિત્તૈઃ આશાસાનાં ગૃહ આશિષઃ ।
મધુહેવ અગ્રતઃ ભુઙ્ક્તે યતિઃ વૈ ગૃહમેધિનામ્ ॥ ૧૬॥

ગ્રામ્યગીતં ન શ્રુણુયાત્ યતિઃ વનચરઃ ક્વચિત્ ।
શિખેત હરિણાત્ વદ્ધાત્ મૃગયોઃ ગીતમોહિતાત્ ॥ ૧૭॥

નૃત્યવાદિત્રગીતાનિ જુષન્ ગ્રામ્યાણિ યોષિતામ્ ।
આસાં ક્રીડનકઃ વશ્યઃ ઋષ્યશ◌ૃઙ્ગઃ મૃગીસુતઃ ॥ ૧૮॥

જિહ્વયા અતિપ્રમાથિન્યા જનઃ રસવિમોહિતઃ ।
મૃત્યુમ્ ઋચ્છતિ અસત્ બુદ્ધિઃ મીનઃ તુ બડિશૈઃ યથા ॥ ૧૯॥

ઇન્દ્રિયાણિ જયન્તિ આશુઃ નિરાહારાઃ મનીષિણઃ ।
વર્જયિત્વા તુ રસનં તત્ નિરન્નસ્ય વર્ધતે ॥ ૨૦॥

તાવત્ જિતેન્દ્રિયઃ ન સ્યાત્ વિજિતાનિ ઇન્દ્રિયઃ પુમાન્ ।
ન જયેત્ રસનં યાવત્ જિતં સર્વં જિતે રસે ॥ ૨૧॥

પિઙ્ગલા નામ વેશ્યા આસીત્ વિદેહનગરે પુરા ।
તસ્યા મે શિક્ષિતં કિઞ્ચિત્ નિબોધ નૃપનન્દન ॥ ૨૨॥

સા સ્વૈરિણ્યેકદા કાન્તં સઙ્કેત ઉપનેષ્યતી ।
અભૂત્કાલે બહિર્દ્વારિ બિભ્રતી રૂપમુત્તમમ્ ॥ ૨૩॥

માર્ગ આગચ્છતો વીક્ષ્ય પુરુષાન્પુરુષર્ષભ ।
તાન્ શુલ્કદાન્વિત્તવતઃ કાન્તાન્મેનેઽર્થકામુકા ॥ ૨૪॥

આગતેષ્વપયાતેષુ સા સઙ્કેતોપજીવની ।
અપ્યન્યો વિત્તવાન્કોઽપિ મામુપૈષ્યતિ ભૂરિદઃ ॥ ૨૫॥

એઅવં દુરાશયા ધ્વસ્તનિદ્રા દ્વાર્યવલમ્બતી ।
નિર્ગચ્છન્તી પ્રવિશતી નિશીથં સમપદ્યત ॥ ૨૬॥

તસ્યા વિત્તાશયા શુષ્યદ્વક્ત્રાયા દીનચેતસઃ ।
નિર્વેદઃ પરમો જજ્ઞે ચિન્તાહેતુઃ સુખાવહઃ ॥ ૨૭॥

તસ્યા નિર્વિણ્ણચિત્તાયા ગીતં શ્રુણુ યથા મમ ।
નિર્વેદ આશાપાશાનાં પુરુષસ્ય યથા હ્યસિઃ ॥ ૨૮॥

ન હિ અઙ્ગાજાતનિર્વેદઃ દેહબન્ધં જિહાસતિ ।
યથા વિજ્ઞાનરહિતઃ મનુજઃ મમતાં નૃપ ॥ ૨૯॥

પિઙ્ગલા ઉવાચ ।
અહો મે મોહવિતતિં પશ્યત અવિજિત આત્મનઃ ।
યા કાન્તાત્ અસતઃ કામં કામયે યેન બાલિશા ॥ ૩૦॥

સન્તં સમીપે રમણં રતિપ્રદં
 વિત્તપ્રદં નિત્યમ્ ઇમં વિહાય ।
અકામદં દુઃખભય આદિ શોક
 મોહપ્રદં તુચ્છમ્ અહં ભજે અજ્ઞા ॥ ૩૧॥

અહો મયાત્મા પરિતાપિતો વૃથા
 સાઙ્કેત્યવૃત્ત્યાઽતિવિગર્હ્યવાર્તયા ।
સ્ત્રૈણાન્નરાદ્યાઽર્થતૃષોઽનુશોચ્યા
 ત્ક્રીતેન વિત્તં રતિમાત્મનેચ્છતી ॥ ૩૨॥

યદસ્થિભિર્નિર્મિતવંશવંશ્ય
 સ્થૂણં ત્વચા રોમનખૈઃ પિનદ્ધમ્ ।
ક્ષરન્નવદ્વારમગારમેતદ્
 વિણ્મૂત્રપૂર્ણં મદુપૈતિ કાન્યા ॥ ૩૩॥

વિદેહાનાં પુરે હ્યસ્મિન્નહમેકૈવ મૂઢધીઃ ।
યાઽન્યસ્મિચ્છન્ત્યસત્યસ્માદાત્મદાત્કામમચ્યુતાત્ ॥ ૩૪॥

સુહૃત્પ્રેષ્ઠતમો નાથ આત્મા ચાયં શરીરિણામ્ ।
તં વિક્રીયાત્મનૈવાહં રમેઽનેન યથા રમા ॥ ૩૫॥

કિયત્પ્રિયં તે વ્યભજન્કામા યે કામદા નરાઃ ।
આદ્યન્તવન્તો ભાર્યાયા દેવા વા કાલવિદ્રુતાઃ ॥ ૩૬॥

નૂનં મે ભગવાન્ પ્રીતઃ વિષ્ણુઃ કેન અપિ કર્મણા ।
નિર્વેદઃ અયં દુરાશાયા યત્ મે જાતઃ સુખાવહઃ ॥ ૩૭॥

મૈવં સ્યુર્મન્દભગ્યાયાઃ ક્લેશા નિર્વેદહેતવઃ ।
યેનાનુબન્ધં નિહૃત્ય પુરુષઃ શમમૃચ્છતિ ॥ ૩૮॥

તેન ઉપકૃતમ્ આદાય શિરસા ગ્રામ્યસઙ્ગતાઃ ।

ત્યક્ત્વા દુરાશાઃ શરણં વ્રજામિ તમ્ અધીશ્વરમ્ ॥ ૩૯॥

સન્તુષ્ટા શ્રદ્દધત્યેતદ્યથાલાભેન જીવતી ।
વિહરામ્યમુનૈવાહમાત્મના રમણેન વૈ ॥ ૪૦॥

સંસારકૂપે પતિતં વિષયૈર્મુષિતેક્ષણમ્ ।
ગ્રસ્તં કાલાહિનાઽઽત્માનં કોઽન્યસ્ત્રાતુમધીશ્વરઃ ॥ ૪૧॥

આત્મા એવ હિ આત્મનઃ ગોપ્તા નિર્વિદ્યેત યદાખિલાત્ ।
અપ્રમત્તઃ ઇદં પશ્યત્ ગ્રસ્તં કાલાહિના જગત્ ॥ ૪૨॥

બ્રાહ્મણ ઉવાચ ।
એઅવં વ્યવસિતમતિર્દુરાશાં કાન્તતર્ષજામ્ ।
છિત્વોપશમમાસ્થાય શય્યામુપવિવેશ સા ॥ ૪૩॥

આશા હિ પરમં દુઃખં નૈરાશ્યં પરમં સુખમ્ ।
યથા સંછિદ્ય કાન્તાશાં સુખં સુષ્વાપ પિઙ્ગલા ॥ ૪૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે પિઙ્ગલોપાખ્યાઽનેષ્ટમોઽધ્યાયઃ ॥ ૮॥

અથ નવમોઽધ્યાયઃ ।
બ્રાહ્મણઃ ઉવાચ ।
પરિગ્રહઃ હિ દુઃખાય યત્ યત્ પ્રિયતમં નૃણામ્ ।
અનન્તં સુખમ્ આપ્નોતિ તત્ વિદ્વાન્ યઃ તુ અકિઞ્ચનઃ ॥ ૧॥

સામિષં કુરરં જઘ્નુઃ બલિનઃ યે નિરામિષાઃ ।
તત્ આમિષં પરિત્યજ્ય સઃ સુખં સમવિન્દત ॥ ૨॥

ન મે માનાવમાનૌ સ્તઃ ન ચિન્તા ગેહપુત્રિણામ્ ।
આત્મક્રીડઃ આત્મરતિઃ વિચરામિ ઇહ બાલવત્ ॥ ૩॥

દ્વૌ એવ ચિન્તયા મુક્તૌ પરમ આનન્દઃ આપ્લુતૌ ।
યઃ વિમુગ્ધઃ જડઃ બાલઃ યઃ ગુણેભ્યઃ પરં ગતઃ ॥ ૪॥

ક્વચિત્ કુમારી તુ આત્માનં વૃણાનાન્ ગૃહમ્ આગતાન્ ।
સ્વયં તાન્ અર્હયામાસ ક્વાપિ યાતેષુ બન્ધુષુ ॥ ૫॥

તેષમ્ અભ્યવહારાર્થં શાલીન્ રહસિ પાર્થિવ ।
અવઘ્નન્ત્યાઃ પ્રકોષ્ઠસ્થાઃ ચક્રુઃ શઙ્ખાઃ સ્વનં મહત્ ॥

૬॥

સા તત્ જુગુપ્સિતં મત્વા મહતી વ્રીડિતા તતઃ ।
બભઞ્જ એકૈકશઃ શઙ્ખાન્ દ્વૌ દ્વૌ પાણ્યોઃ અશેષયત્ ॥

૭॥

ઉભયોઃ અપિ અભૂત્ ઘોષઃ હિ અવઘ્નન્ત્યાઃ સ્મ શઙ્ખયોઃ ।
તત્ર અપિ એકં નિરભિદત્ એકસ્માન્ ન અભવત્ ધ્વનિઃ ॥ ૮॥

અન્વશિક્ષમ્ ઇમં તસ્યાઃ ઉપદેશમ્ અરિન્દમ ।
લોકાન્ અનુચરન્ એતાન્ લોકતત્ત્વવિવિત્સયા ॥ ૯॥

વાસે બહૂનાં કલહઃ ભવેત્ વાર્તા દ્વયોઃ અપિ ।
એકઃ એવ ચરેત્ તસ્માત્ કુમાર્યાઃ ઇવ કઙ્કણઃ ॥ ૧૦॥

મનઃ એકત્ર સંયુજ્યાત્ જિતશ્વાસઃ જિત આસનઃ ।
વૈરાગ્યાભ્યાસયોગેન ધ્રિયમાણમ્ અતન્દ્રિતઃ ॥ ૧૧॥

યસ્મિન્ મનઃ લબ્ધપદં યત્ એતત્
  શનૈઃ શનૈઃ મુઞ્ચતિ કર્મરેણૂન્ ।
સત્ત્વેન વૃદ્ધેન રજઃ તમઃ ચ
  વિધૂય નિર્વાણમ્ ઉપૈતિ અનિન્ધનમ્ ॥ ૧૨॥

તત્ એવમ્ આત્મનિ અવરુદ્ધચિત્તઃ
  ન વેદ કિઞ્ચિત્ બહિઃ અન્તરં વા ।
યથા ઇષુકારઃ નૃપતિં વ્રજન્તમ્
  ઇષૌ ગતાત્મા ન દદર્શ પાર્શ્વે ॥ ૧૩॥

એકચાર્યનિકેતઃ સ્યાત્ અપ્રમત્તઃ ગુહાશયઃ ।
અલક્ષ્યમાણઃ આચારૈઃ મુનિઃ એકઃ અલ્પભાષણઃ ॥ ૧૪॥

ગૃહારમ્ભઃ અતિદુઃખાય વિફલઃ ચ અધ્રુવાત્મનઃ ।
સર્પઃ પરકૃતં વેશ્મ પ્રવિશ્ય સુખમ્ એધતે ॥ ૧૫॥

એકો નારાયણો દેવઃ પૂર્વસૃષ્ટં સ્વમાયયા ।
સંહૃત્ય કાલકલયા કલ્પાન્ત ઇદમીશ્વરઃ ॥ ૧૬॥

એક એવાદ્વિતીયોઽભૂદાત્માધારોઽખિલાશ્રયઃ ।
કાલેનાત્માનુભાવેન સામ્યં નીતાસુ શક્તિષુ ।

સત્ત્વાદિષ્વાદિપુએરુષઃ પ્રધાનપુરુષેશ્વરઃ ॥ ૧૭॥

પરાવરાણાં પરમ આસ્તે કૈવલ્યસઞ્જ્ઞિતઃ ।
કેવલાનુભવાનન્દસન્દોહો નિરુપાધિકઃ ॥ ૧૮॥

કેવલાત્માનુભાવેન સ્વમાયાં ત્રિગુણાત્મિકામ્ ।
સંક્ષોભયન્સૃજત્યાદૌ તયા સૂત્રમરિન્દમ ॥ ૧૯॥

તામાહુસ્ત્રિગુણવ્યક્તિં સૃજન્તીં વિશ્વતોમુખમ્ ।
યસ્મિન્પ્રોતમિદં વિશ્વં યેન સંસરતે પુમાન્ ॥ ૨૦॥

યથા ઊર્ણનાભિઃ હૃદયાત્ ઊર્ણાં સન્તત્ય વક્ત્રતઃ ।
તયા વિહૃત્ય ભૂયસ્તાં ગ્રસતિ એવં મહેશ્વરઃ ॥ ૨૧॥

યત્ર યત્ર મનઃ દેહી ધારયેત્ સકલં ધિયા ।
સ્નેહાત્ દ્વેષાત્ ભયાત્ વા અપિ યાતિ તત્ તત્ સરૂપતામ્ ॥ ૨૨॥

કીટઃ પેશસ્કૃતં ધ્યાયન્ કુડ્યાં તેન પ્રવેશિતઃ ।
યાતિ તત્ સ્સત્મતાં રાજન્ પૂર્વરૂપમ્ અસન્ત્યજન્ ॥ ૨૩॥

એવં ગુરુભ્યઃ એતેભ્યઃ એષ મે શિક્ષિતા મતિઃ ।
સ્વાત્મા ઉપશિક્ષિતાં બુદ્ધિં શ્રુણુ મે વદતઃ પ્રભો ॥ ૨૪॥

દેહઃ ગુરુઃ મમ વિરક્તિવિવેકહેતુઃ
    બિભ્રત્ સ્મ સત્ત્વનિધનં સતત અર્ત્યુત્ અર્કમ્ ।
તત્ત્વાનિ અનેન વિમૃશામિ યથા તથા અપિ
    પારક્યમ્ ઇતિ અવસિતઃ વિચરામિ અસઙ્ગઃ ॥ ૨૫॥

જાયાત્મજાર્થપશુભૃત્યગૃહાપ્તવર્ગાન્
    પુષ્ણાતિ યત્ પ્રિયચિકીર્ષયા વિતન્વન્ ॥

સ્વાન્તે સકૃચ્છ્રમ્ અવરુદ્ધધનઃ સઃ દેહઃ
    સૃષ્ટ્વા અસ્ય બીજમ્ અવસીદતિ વૃક્ષધર્મા ॥ ૨૬॥

જિહ્વા એકતઃ અમુમ્ અવકર્ષતિ કર્હિ તર્ષા
    શિશ્નઃ અન્યતઃ ત્વક્ ઉદરં શ્રવણં કુતશ્ચિત્ ।
ઘ્રાણઃ અન્યતઃ ચપલદૃક્ ક્વ ચ કર્મશક્તિઃ
    બહ્વ્યઃ સપત્ન્યઃ ઇવ ગેહપતિં લુનન્તિ ॥ ૨૭॥

સૃષ્ટ્વા પુરાણિ વિવિધાનિ અજયા આત્મશક્ત્યા

    વૃક્ષાન્ સરીસૃપપશૂન્ખગદંશમત્સ્યાન્ ।
તૈઃ તૈઃ અતુષ્ટહૃદયઃ પુરુષં વિધાય
    બ્રહ્માવલોકધિષણં મુદમાપ દેવઃ ॥ ૨૮॥

લબ્ધ્વા સુદુર્લભમ્ ઇદં બહુસમ્ભવાન્તે
    માનુષ્યમર્થદમનિત્યમપીહ ધીરઃ ।
તૂર્ણં યતેત ન પતેત્ અનુમૃત્યુ યાવત્
    નિઃશ્રેયસાય વિષયઃ ખલુ સર્વતઃ સ્યાત્ ॥ ૨૯॥

એવં સઞ્જાતવૈરાગ્યઃ વિજ્ઞાનલોક આત્મનિ ।
વિચરામિ મહીમ્ એતાં મુક્તસઙ્ગઃ અનહઙ્કૃતિઃ ॥ ૩૦॥

ન હિ એકસ્માત્ ગુરોઃ જ્ઞાનં સુસ્થિરં સ્યાત્ સુપુષ્કલમ્ ।
બ્રહ્મ એતત્ અદ્વિતીયં વૈ ગીયતે બહુધા ઋષિભિઃ ॥ ૩૧॥

શ્રીભગવાનુવાચ ।
ઇત્યુક્ત્વા સ યદું વિપ્રસ્તમામન્ત્રય ગભીરધીઃ ।
વન્દિતો।આભ્યર્થિતો રાજ્ઞા યયૌ પ્રીતો યથાગતમ્ ॥ ૩૨॥

અવધૂતવચઃ શ્રુત્વા પૂર્વેષાં નઃ સ પૂર્વજઃ ।
સર્વસઙ્ગવિનિર્મુક્તઃ સમચિત્તો બભૂવ હ ॥ ૩૩॥

(ઇતિ અવધૂતગીતમ્ ।)

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
નવમોઽધ્યાયઃ ॥ ૯॥

અથ દશમોઽધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
મયા ઉદિતેષુ અવહિતઃ સ્વધર્મેષુ મદાશ્રયઃ ।
વર્ણાશ્રમકુલ આચારમ્ અકામાત્મા સમાચરેત્ ॥ ૧॥

અન્વીક્ષેત વિશુદ્ધાત્મા દેહિનાં વિષયાત્મનામ્ ।
ગુણેષુ તત્ત્વધ્યાનેન સર્વારમ્ભવિપર્યયમ્ ॥ ૨॥

સુપ્તસ્ય વિષયાલોકઃ ધ્યાયતઃ વા મનોરથઃ ।
નાનાત્મકત્વાત્ વિફલઃ તથા ભેદાત્મદીઃ ગુણૈઃ ॥ ૩॥

નિવૃત્તં કર્મ સેવેત પ્રવૃત્તં મત્પરઃ ત્યજેત્ ।
જિજ્ઞાસાયાં સમ્પ્રવૃત્તઃ ન અદ્રિયેત્ કર્મ ચોદનામ્ ॥ ૪॥

યમાનભીક્ષ્ણં સેવેત નિયમાન્ મત્પરઃ ક્વચિત્ ।
મદભિજ્ઞં ગુરું શાન્તમ્ ઉપાસીત મદાત્મકમ્ ॥ ૫॥

અમાન્યમત્સરઃ દક્ષઃ નિર્મમઃ દૃઢસૌહૃદઃ ।
અસત્વરઃ અર્થજિજ્ઞાસુઃ અનસૂયૌઃ અમોઘવાક્ ॥ ૬॥

જાયાપત્યગૃહક્ષેત્રસ્વજનદ્રવિણ આદિષુ ।
ઉદાસીનઃ સમં પશ્યન્ સર્વેષુ અર્થમ્ ઇવ આત્મનઃ ॥ ૭॥

વિલક્ષણઃ સ્થૂલસૂક્ષ્માત્ દેહાત્ આત્મેક્ષિતા સ્વદૃક્ ।
યથાગ્નિઃ દારુણઃ દાહ્યાત્ દાહકઃ અન્યઃ પ્રકાશકઃ ॥ ૮॥

નિરોધ ઉત્પત્તિ અણુ બૃહન્ નાનાત્વં તત્કૃતાન્ ગુણાન્ ।
અન્તઃ પ્રવિષ્ટઃ આધત્તઃ એવં દેહગુણાન્ પરઃ ॥ ૯॥

યઃ અસૌ ગુણૈઃ વિરચિતઃ દેહઃ અયં પુરુષસ્ય હિ ।
સંસારઃ તત્ નિબન્ધઃ અયં પુંસઃ વિદ્યાત્ છિદાત્મનઃ ॥ ૧૦॥

તસ્માત્ જિજ્ઞાસયા આત્માનમ્ આત્મસ્થં પરમ્ ।
સઙ્ગમ્ય નિરસેત્ એતત્ વસ્તુબુદ્ધિં યથાક્રમમ્ ॥ ૧૧॥

આચાર્યઃ અરણિઃ આદ્યઃ સ્યાત્ અન્તેવાસિ ઉત્તર અરણિઃ ।
તત્ સન્ધાનં પ્રવચનં વિદ્યા સન્ધિઃ સુખાવહઃ ॥ ૧૨॥

વૈશારદી સા અતિવિશુદ્ધબુદ્ધિઃ
ધુનોતિ માયાં ગુણસમ્પ્રસૂતામ્ ।
ગુણાન્ ચ સન્દહ્ય યત્ આત્મમ્ એતત્
સ્વયં ચ શામ્યતિ અસમિદ્ યથા અગ્નિઃ ॥ ૧૩॥

અથ એષાં કર્મકર્તૄણાં ભોક્તૄણાં સુખદુઃખયોઃ ।
નાનાત્વમ્ અથ નિત્યત્વં લોકકાલાગમ આત્મનામ્ ॥ ૧૪॥

મન્યસે સર્વભાવાનાં સંસ્થા હિ ઔત્પત્તિકી યથા ।
તત્ તત્ આકૃતિભેદેન જાયતે ભિદ્યતે ચ ધીઃ ॥ ૧૫॥

એવમ્ અપિ અઙ્ગ સર્વેષાં દેહિનાં દેહયોગતઃ ।
કાલ અવયવતઃ સન્તિ ભાવા જન્માદયોઃ અસકૃત્ ॥ ૧૬॥

અત્ર અપિ કર્મણાં કર્તુઃ અસ્વાતન્ત્ર્યં ચ લક્ષ્યતે ।
ભોક્તુઃ ચ દુઃખસુખયોઃ કઃ અન્વર્થઃ વિવશં ભજેત્ ॥ ૧૭॥

ન દેહિનાં સુખં કિઞ્ચિત્ વિદ્યતે વિદુષામ્ અપિ ।
તથા ચ દુઃખં મૂઢાનાં વૃથા અહઙ્કરણં પરમ્ ॥ ૧૮॥

યદિ પ્રાપ્તિં વિઘાતં ચ જાનન્તિ સુખદુઃખયોઃ ।
તે અપિ અદ્ધા ન વિદુઃ યોગં મૃત્યુઃ ન પ્રભવેત્ યથા ॥ ૧૯॥

કઃ અન્વર્થઃ સુખયતિ એનં કામઃ વા મૃત્યુઃ અન્તિકે ।
આઘાતં નીયમાનસ્ય વધ્યસિ એવ ન તુષ્ટિદઃ ॥ ૨૦॥

શ્રુતં ચ દૃષ્ટવત્ દુષ્ટં સ્પર્ધા અસૂયા અત્યયવ્યયૈઃ ।
બહુ અન્તરાય કામત્વાત્ કૃષિવત્ ચ અપિ નિષ્ફલમ્ ॥ ૨૧॥

અન્તરાયૈઃ અવિહતઃ યદિ ધર્મઃ સ્વનુષ્ઠિતઃ ।
તેનાપિ નિર્જિતં સ્થાનં યથા ગચ્છતિ તત્ શ્રુણુ ॥ ૨૨॥

ઇષ્ત્વા ઇહ દેવતાઃ યજ્ઞૈઃ સ્વર્લોકં યાતિ યાજ્ઞિકઃ ।
ભુઞ્જીત દેવવત્ તત્ર ભોગાન્ દિવ્યાન્ નિજ અર્જિતાન્ ॥ ૨૩॥

સ્વપુણ્ય ઉપચિતે શુભ્રે વિમાનઃ ઉપગીયતે ।
ગન્ધર્વૈઃ વિહરન્મધ્યે દેવીનાં હૃદ્યવેષધૃક્ ॥ ૨૪॥

સ્ત્રીભિઃ કામગયાનેન કિઙ્કિણીજાલમાલિના ।
ક્રીડન્ ન વેદ આત્મપાતં સુરાક્રીડેષુ નિર્વૃતઃ ॥ ૨૫॥

તાવત્ પ્રમોદતે સ્વર્ગે યાવત્ પુણ્યં સમાપ્યતે ।
ક્ષીણપુણ્યઃ પતતિ અર્વાક્ અનિચ્છન્ કાલચાલિતઃ ॥ ૨૬॥

યદિ અધર્મરતઃ સઙ્ગાત્ અસતાં વા અજિતેન્દ્રિયઃ ।
કામાત્મા કૃપણઃ લુબ્ધઃ સ્ત્રૈણઃ ભૂતવિહિંસકઃ ॥ ૨૭॥

પશૂન્ અવિધિના આલભ્ય પ્રેતભૂતગણાન્ યજન્ ।
નરકાન્ અવશઃ જન્તુઃ ગત્વા યાતિ ઉલ્બણં તમઃ ॥ ૨૮॥

કર્માણિ દુઃખ ઉદર્કાણિ કુર્વન્ દેહેન તૈઃ પુનઃ ।
દેહમ્ આભજતે તત્ર કિં સુખં મર્ત્યધર્મિણઃ ॥ ૨૯॥

લોકાનાં લોક પાલાનાં મદ્ભયં કલ્પજીવિનામ્ ।
બ્રહ્મણઃ અપિ ભયં મત્તઃ દ્વિપરાધપર આયુષઃ ॥ ૩૦॥

ગુણાઃ સૃજન્તિ કર્માણિ ગુણઃ અનુસૃજતે ગુણાન્ ।
જીવઃ તુ ગુણસંયુક્તઃ ભુઙ્ક્તે કર્મફલાનિ અસૌ ॥ ૩૧॥

યાવત્ સ્યાત્ ગુણવૈષમ્યં તાવત્ નાનાત્વમ્ આત્મનઃ ।
નાનાત્વમ્ આત્મનઃ યાવત્ પારતન્ત્ર્યં તદા એવ હિ ॥ ૩૨॥

યાવત્ અસ્ય અસ્વતન્ત્રત્વં તાવત્ ઈશ્વરતઃ ભયમ્ ।
યઃ એતત્ સમુપાસીરન્ તે મુહ્યન્તિ શુચાર્પિતાઃ ॥ ૩૩॥

કાલઃ આત્મા આગમઃ લોકઃ સ્વભાવઃ ધર્મઃ એવ ચ ।
ઇતિ માં બહુધા પ્રાહુઃ ગુણવ્યતિકરે સતિ ॥ ૩૪॥

ઉદ્ધવઃ ઉવાચ ।
ગુણેષુ વર્તમાનઃ અપિ દેહજેષુ અનપાવૃતાઃ ।
ગુણૈઃ ન બધ્યતે દેહી બધ્યતે વા કથં વિભો ॥ ૩૫॥

કથં વર્તેત વિહરેત્ કૈઃ વા જ્ઞાયેત લક્ષણૈઃ ।
કિં ભુઞ્જીત ઉત વિસૃજેત્ શયીત આસીત યાતિ વા ॥ ૩૬॥

એતત્ અચ્યુત મે બ્રૂહિ પ્રશ્નં પ્રશ્નવિદાં વર ।
નિત્યમુક્તઃ નિત્યબદ્ધઃ એકઃ એવ ઇતિ મે ભ્રમઃ ॥ ૩૭॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
દશમોઽધ્યાયઃ ॥ ૧૦॥

અથ એકાદશોઽધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
બદ્ધઃ મુક્તઃ ઇતિ વ્યાખ્યા ગુણતઃ મે ન વસ્તુતઃ ।
ગુણસ્ય માયામૂલત્વાત્ ન મે મોક્ષઃ ન બન્ધનમ્ ॥ ૧॥

શોકમોહૌ સુખં દુઃખં દેહાપત્તિઃ ચ માયયા ।
સ્વપ્નઃ યથા આત્મનઃ ખ્યાતિઃ સંસૃતિઃ ન તુ વાસ્તવી ॥ ૨॥

વિદ્યા અવિદ્યે મમ તનૂ વિદ્ધિ ઉદ્ધવ શરીરિણામ્ ।
મોક્ષબન્ધકરી આદ્યે માયયા મે વિનિર્મિતે ॥ ૩॥

એકસ્ય એવ મમ અંશસ્ય જીવસ્ય એવ મહામતે ।

બન્ધઃ અસ્ય અવિદ્યયા અનાદિઃ વિદ્યયા ચ તથા ઇતરઃ ॥ ૪॥

અથ બદ્ધસ્ય મુક્તસ્ય વૈલક્ષણ્યં વદામિ તે ।
વિરુદ્ધધર્મિણોઃ તાત સ્થિતયોઃ એકધર્મિણિ ॥ ૫॥

સુપર્ણૌ એતૌ સદૃશૌ સખાયૌ
 યદૃચ્છયા એતૌ કૃતનીડૌ ચ વૃક્ષે ।
એકઃ તયોઃ ખાદતિ પિપ્પલાન્નમ્
 અન્યઃ નિરન્નઃ અપિ બલેન ભૂયાન્ ॥ ૬॥

આત્માનમ્ અન્યં ચ સઃ વેદ વિદ્વાન્
 અપિપ્પલાદઃ ન તુ પિપ્પલાદઃ ।
યઃ અવિદ્યયા યુક્ સ તુ નિત્યબદ્ધઃ
 વિદ્યામયઃ યઃ સ તુ નિત્યમુક્તઃ ॥ ૭॥

દેહસ્થઃ અપિ ન દેહસ્થઃ વિદ્વાન્ સ્વપ્નાત્ યથા ઉત્થિતઃ ।
અદેહસ્થઃ અપિ દેહસ્થઃ કુમતિઃ સ્વપ્નદૃક્ યથા ॥ ૮॥

ઇન્દ્રિયૈઃ ઇન્દ્રિયાર્થેષુ ગુણૈઃ અપિ ગુણેષુ ચ ।
ગૃહ્યમાણેષુ અહઙ્કુર્યાત્ ન વિદ્વાન્ યઃ તુ અવિક્રિયઃ ॥ ૯॥

દૈવાધીને શરીરે અસ્મિન્ ગુણભાવ્યેન કર્મણા ।
વર્તમાનઃ અબુધઃ તત્ર કર્તા અસ્મિ ઇતિ નિબધ્યતે ॥ ૧૦॥

એવં વિરક્તઃ શયનઃ આસનાટનમજ્જને ।
દર્શનસ્પર્શનઘ્રાણભોજનશ્રવણાદિષુ ॥ ૧૧॥

ન તથા બધ્યતે વિદ્વાન્ તત્ર તત્ર આદયન્ ગુણાન્ ।
પ્રકૃતિસ્થઃ અપિ અસંસક્તઃ યથા ખં સવિતા અનિલઃ ॥ ૧૨॥

વૈશારદ્યેક્ષયા અસઙ્ગશિતયા છિન્નસંશયઃ ।
પ્રતિબુદ્ધઃ ઇવ સ્વપ્નાત્ નાનાત્વાત્ વિનિવર્તતે ॥ ૧૩॥

યસ્ય સ્યુઃ વીતસઙ્કલ્પાઃ પ્રાણેન્દ્રિયમનોધિયામ્ ।
વૃત્તયઃ સઃ વિનિર્મુક્તઃ દેહસ્થઃ અપિ હિ તત્ ગુણૈઃ ॥ ૧૪॥

યસ્ય આત્મા હિંસ્યતે હિંસ્રૈઃ યેન કિઞ્ચિત્ યદૃચ્છયા ।
અર્ચ્યતે વા ક્વચિત્ તત્ર ન વ્યતિક્રિયતે બુધઃ ॥ ૧૫॥

ન સ્તુવીત ન નિન્દેત કુર્વતઃ સાધુ અસાધુ વા ।

વદતઃ ગુણદોષાભ્યાં વર્જિતઃ સમદૃક્ મુનિઃ ॥ ૧૬॥

ન કુર્યાત્ ન વદેત્ કિઞ્ચિત્ ન ધ્યાયેત્ સાધુ અસાધુ વા ।
આત્મારામઃ અનયા વૃત્ત્યા વિચરેત્ જડવત્ મુનિઃ ॥ ૧૭॥

શબ્દબ્રહ્મણિ નિષ્ણાતઃ ન નિષ્ણાયાત્ પરે યદિ ।
શ્રમઃ તસ્ય શ્રમફલઃ હિ અધેનુમ્ ઇવ રક્ષતઃ ॥ ૧૮॥

ગાં દુગ્ધદોહામ્ અસતીં ચ ભાર્યામ્
  દેહં પરાધીનમ્ અસત્પ્રજાં ચ ।
વિત્તં તુ અતીર્થીકૃતમ્ અઙ્ગ વાચમ્
  હીનાં મયા રક્ષતિ દુઃખદુઃખી ॥ ૧૯॥

યસ્યાં ન મે પાવનમ્ અઙ્ગ કર્મ
  સ્થિતિઉદ્ભવપ્રાણ નિરોધનમ્ અસ્ય ।
લીલાવતારઈપ્સિતજન્મ વા સ્યાત્
  બન્ધ્યાં ગિરં તાં બિભૃયાત્ ન ધીરઃ ॥ ૨૦॥

એવં જિજ્ઞાસયા અપોહ્ય નાનાત્વભ્રમમ્ આત્મનિ ।
ઉપારમેત વિરજં મનઃ મયિ અર્પ્ય સર્વગે ॥ ૨૧॥

યદિ અનીશઃ ધારયિતું મનઃ બ્રહ્મણિ નિશ્ચલમ્ ।
મયિ સર્વાણિ કર્માણિ નિરપેક્ષઃ સમાચર ॥ ૨૨॥

શ્રદ્ધાલુઃ મે કથાઃ શૃણ્વન્ સુભદ્રા લોકપાવનીઃ ।
ગાયન્ અનુસ્મરન્ કર્મ જન્મ ચ અભિનયન્ મુહુઃ ॥ ૨૩॥

મદર્થે ધર્મકામાર્થાન્ આચરન્ મદપાશ્રયઃ ।
લભતે નિશ્ચલાં ભક્તિં મયિ ઉદ્ધવ સનાતને ॥ ૨૪॥

સત્સઙ્ગલબ્ધયા ભક્ત્યા મયિ માં સઃ ઉપાસિતા ।
સઃ વૈ મે દર્શિતં સદ્ભિઃ અઞ્જસા વિન્દતે પદમ્ ॥ ૨૫॥

ઉદ્ધવ ઉવાચ ।
સાધુઃ તવ ઉત્તમશ્લોક મતઃ કીદૃગ્વિધઃ પ્રભો ।
ભક્તિઃ ત્વયિ ઉપયુજ્યેત કીદૃશી સદ્ભિઃ આદૃતા ॥ ૨૬॥

એતત્ મે પુરુષાધ્યક્ષ લોકાધ્યક્ષ જગત્ પ્રભો ।
પ્રણતાય અનુરક્તાય પ્રપન્નાય ચ કથ્યતામ્ ॥ ૨૭॥

ત્વં બ્રહ્મ પરમં વ્યોમ પુરુષઃ પ્રકૃતેઃ પરઃ ।
અવતીર્ણઃ અસિ ભગવન્ સ્વેચ્છાઉપાત્તપૃથક્ વપુઃ ॥ ૨૮॥

શ્રીભગવાન્ ઉવાચ ।
કૃપાલુઃ અકૃતદ્રોહઃ તિતિક્ષુઃ સર્વદેહિનામ્ ।
સત્યસારઃ અનવદ્યાત્મા સમઃ સર્વોપકારકઃ ॥ ૨૯॥

કામૈઃ અહતધીઃ દાન્તઃ મૃદુઃ શુચિઃ અકિઞ્ચનઃ ।
અનીહઃ મિતભુક્ શાન્તઃ સ્થિરઃ મત્ શરણઃ મુનિઃ ॥ ૩૦॥

અપ્રમત્તઃ ગભીરાત્મા ધૃતિમાઞ્જિતષડ્ગુણઃ ।
અમાની માનદઃ કલ્પઃ મૈત્રઃ કારુણિકઃ કવિઃ ॥ ૩૧॥

આજ્ઞાય એવં ગુણાન્ દોષાન્મયાદિષ્ટાન્ અપિ સ્વકાન્ ।
ધર્માન્ સન્ત્યજ્ય યઃ સર્વાન્ માં ભજેત સઃ સત્તમઃ ॥ ૩૨॥

જ્ઞાત્વા અજ્ઞાત્વા અથ યે વૈ માં યાવાન્ યઃ ચ અસ્મિ
યાદૃશઃ ।
ભજન્તિ અનન્યભાવેન તે મે ભક્તતમાઃ મતાઃ ॥ ૩૩॥

મલ્લિઙ્ગમદ્ભક્તજનદર્શનસ્પર્શનાર્ચનમ્ ।
પરિચર્યા સ્તુતિઃ પ્રહ્વગુણકર્મ અનુકીર્તનમ્ ॥ ૩૪॥

મત્કથાશ્રવણે શ્રદ્ધા મત્ અનુધ્યાનમ્ ઉદ્ધવ ।
સર્વલાભ ઉપહરણં દાસ્યેન આત્મનિવેદનમ્ ॥ ૩૫॥

મજ્જન્મકર્મકથનં મમ પર્વાનુમોદનમ્ ।
ગીતતાણ્ડવવાદિત્રગોષ્ઠીભિઃ મદ્ગૃહ ઉત્સવઃ ॥ ૩૬॥

યાત્રા બલિવિધાનં ચ સર્વવાર્ષિકપર્વસુ ।
વૈદિકી તાન્ત્રિકી દીક્ષા મદીયવ્રતધારણમ્ ॥ ૩૭॥

મમ અર્ચાસ્થાપને શ્રદ્ધા સ્વતઃ સંહત્ય ચ ઉદ્યમઃ ।
ઉદ્યાન ઉપવનાક્રીડપુરમન્દિરકર્મણિ ॥ ૩૮॥

સંમાર્જન ઉપલેપાભ્યાં સેકમણ્ડલવર્તનૈઃ ।
ગૃહશુશ્રૂષણં મહ્યં દાસવદ્યદમાયયા ॥ ૩૯॥

અમાનિત્વમ્ અદમ્ભિત્વં કૃતસ્ય અપરિકીર્તનમ્ ।
અપિ દીપાવલોકં મે ન ઉપયુઞ્જ્યાત્ નિવેદિતમ્ ॥ ૪૦॥

યત્ યત્ ઇષ્ટતમં લોકે યત્ ચ અતિપ્રિયમ્ આત્મનઃ ।
તત્ તત્ નિવેદયેત્ મહ્યં તત્ આનન્ત્યાય કલ્પતે ॥ ૪૧॥

સૂર્યઃ અગ્નિઃ બ્રાહ્મણઃ ગાવઃ વૈષ્ણવઃ ખં મરુત્ જલમ્ ।
ભૂઃ આત્મા સર્વભૂતાનિ ભદ્ર પૂજાપદાનિ મે ॥ ૪૨॥

સૂર્યે તુ વિદ્યયા ત્રય્યા હવિષાગ્નૌ યજેત મામ્ ।
આતિથ્યેન તુ વિપ્રાગ્ર્યઃ ગોષ્વઙ્ગ યવસાદિના ॥ ૪૩॥

વૈષ્ણવે બન્ધુસત્કૃત્યા હૃદિ ખે ધ્યાનનિષ્ઠયા ।
વાયૌ મુખ્યધિયા તોયે દ્રવ્યૈઃ તોયપુરસ્કૃતૈઃ ॥ ૪૪॥

સ્થણ્ડિલે મન્ત્રહૃદયૈઃ ભોગૈઃ આત્માનમ્ આત્મનિ ।
ક્ષેત્રજ્ઞં સર્વભૂતેષુ સમત્વેન યજેત મામ્ ॥ ૪૫॥

ધિષ્ણ્યેષુ એષુ ઇતિ મદ્રૂપં શઙ્ખચક્રગદામ્બુજૈઃ ।
યુક્તં ચતુર્ભુજં શાન્તં ધ્યાયન્ અર્ચેત્ સમાહિતઃ ॥ ૪૬॥

ઇષ્ટાપૂર્તેન મામ્ એવં યઃ યજેત સમાહિતઃ ।
લભતે મયિ સદ્ભક્તિં મત્સ્મૃતિઃ સાધુસેવયા ॥ ૪૭॥

પ્રાયેણ ભક્તિયોગેન સત્સઙ્ગેન વિના ઉદ્ધવ ।
ન ઉપાયઃ વિદ્યતે સધ્ર્યઙ્ પ્રાયણં હિ સતામ્ અહમ્ ॥ ૪૮॥

અથ એતત્ પરમં ગુહ્યં શ્રુણ્વતઃ યદુનન્દન ।
સુગોપ્યમ્ અપિ વક્ષ્યામિ ત્વં મે ભૃત્યઃ સુહૃત્ સખા ॥ ૪૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
એકાદશપૂજાવિધાનયોગો નામ એકાદશોઽધ્યાયઃ ॥ ૧૧॥

અથ દ્વાદશોઽધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
ન રોધયતિ માં યોગઃ ન સ્સાઙ્ખ્યં ધર્મઃ એવ ચ ।
ન સ્વાધ્યાયઃ તપઃ ત્યાગઃ ન ઇષ્ટાપૂર્તં ન દક્ષિણા ॥ ૧॥

વ્રતાનિ યજ્ઞઃ છન્દાંસિ તીર્થાનિ નિયમાઃ યમાઃ ।
યથા અવરુન્ધે સત્સઙ્ગઃ સર્વસઙ્ગ અપહઃ હિ મામ્ ॥ ૨॥

સત્સઙ્ગેન હિ દૈતેયા યાતુધાનઃ મૃગાઃ ખગાઃ ।

ગન્ધર્વ અપ્સરસઃ નાગાઃ સિદ્ધાઃ ચારણગુહ્યકાઃ ॥ ૩॥

વિદ્યાધરાઃ મનુષ્યેષુ વૈશ્યાઃ શૂદ્રાઃ સ્ત્રિયઃ અન્ત્યજાઃ ।
રજઃ તમઃ પ્રકૃતયઃ તસ્મિન્ તસ્મિન્ યુગે અનઘ ॥ ૪॥

બહવઃ મત્પદં પ્રાપ્તાઃ ત્વાષ્ટ્રકાયાધવાદયઃ ।
વૃષપર્વા બલિઃ વાણઃ મયઃ ચ અથ વિભીષણઃ ॥ ૫॥

સુગ્રીવઃ હનુમાન્ ઋક્ષઃ ગજઃ ગૃધ્રઃ વણિક્પથઃ ।
વ્યાધઃ કુબ્જા વ્રજે ગોપ્યઃ યજ્ઞપત્ન્યઃ તથા અપરે ॥ ૬॥

તે ન અધિતશ્રુતિગણાઃ ન ઉપાસિતમહત્તમાઃ ।
અવ્રતાતપ્તતપસઃ મત્સઙ્ગાત્ મામ્ ઉપાગતાઃ ॥ ૭॥

કેવલેન હિ ભાવેન ગોપ્યઃ ગાવઃ નગાઃ મૃગાઃ ।
યે અન્યે મૂઢધિયઃ નાગાઃ સિદ્ધાઃ મામ્ ઈયુઃ અઞ્જસા ॥ ૮॥

યં ન યોગેન સાઙ્ખ્યેન દાનવ્રતતપઃ અધ્વરૈઃ ।
વ્યાખ્યાઃ સ્વાધ્યાયસંન્યાસૈઃ પ્રાપ્નુયાત્ યત્નવાન્ અપિ ॥ ૯॥

રામેણ સાર્ધં મથુરાં પ્રણીતે
    શ્વાફલ્કિના મયિ અનુરક્તચિત્તાઃ ।
વિગાઢભાવેન ન મે વિયોગ
    તીવ્રાધયઃ અન્યં દદૃશુઃ સુખાય ॥ ૧૦॥

તાઃ તાઃ ક્ષપાઃ પ્રેષ્ઠતમેન નીતાઃ
    મયા એવ વૃન્દાવનગોચરેણ ।
ક્ષણાર્ધવત્ તાઃ પુનરઙ્ગ તાસાં
    હીના માયા કલ્પસમા બભૂવુઃ ॥ ૧૧॥

તાઃ ન અવિદન્ મયિ અનુષઙ્ગબદ્ધ
    ધિયઃ સ્વમાત્માનમ્ અદઃ તથા ઇદમ્ ।
યથા સમાધૌ મુનયઃ અબ્ધિતોયે
    નદ્યઃ પ્રવિષ્ટાઃ ઇવ નામરૂપે ॥ ૧૨॥

મત્કામા રમણં જારમ્ અસ્વરૂપવિદઃ અબલાઃ ।
બ્રહ્મ માં પરમં પ્રાપુઃ સઙ્ગાત્ શતસહસ્રશઃ ॥ ૧૩॥

તસ્માત્ ત્વમ્ ઉદ્ધવ ઉત્સૃજ્ય ચોદનાં પ્રતિચોદનામ્ ।

પ્રવૃત્તં ચ નિવૃત્તં ચ શ્રોતવ્યં શ્રુતમ્ એવ ચ ॥ ૧૪॥

મામ્ એકમ્ એવ શરણમ્ આત્માનં સર્વદેહિનામ્ ।
યાહિ સર્વાત્મભાવેન મયા સ્યાઃ હિ અકુતોભયઃ ॥ ૧૫॥

ઉદ્ધવઃ ઉવાચ ।
સંશયઃ શ્રુણ્વતઃ વાચં તવ યોગેશ્વર ઈશ્વર ।
ન નિવર્તતઃ આત્મસ્થઃ યેન ભ્રામ્યતિ મે મનઃ ॥ ૧૬॥

શ્રીભગવાન્ ઉવાચ ।
સઃ એષ જીવઃ વિવરપ્રસૂતિઃ
પ્રાણેન ઘોષેણ ગુહાં પ્રવિષ્ટઃ ।
મનોમયં સૂક્ષ્મમ્ ઉપેત્ય રૂપં
માત્રા સ્વરઃ વર્ણઃ ઇતિ સ્થવિષ્ઠઃ ॥ ૧૭॥

યથા અનલઃ ખે અનિલબન્ધુઃ ઊષ્મા
બલેન દારુણ્યધિમથ્યમાનઃ ।
અણુઃ પ્રજાતઃ હવિષા સમિધ્યતે
તથા એવ મે વ્યક્તિઃ ઇયં હિ વાણી ॥ ૧૮॥

એવં ગદિઃ કર્મગતિઃ વિસર્ગઃ
ઘ્રાણઃ રસઃ દૃક્ સ્પર્શઃ શ્રુતિઃ ચ ।
સઙ્કલ્પવિજ્ઞાનમ્ અથ અભિમાનઃ
સૂત્રં રજઃ સત્ત્વતમોવિકારઃ ॥ ૧૯॥

અયં હિ જીવઃ ત્રિવૃત્ અબ્જયોનિઃ
અવ્યક્તઃ એકઃ વયસા સઃ આદ્યઃ ।
વિશ્લિષ્ટશક્તિઃ બહુધા એવ ભાતિ
બીજાનિ યોનિં પ્રતિપદ્ય યદ્વત્ ॥ ૨૦॥

યસ્મિન્ ઇદં પ્રોતમ્ અશેષમ્ ઓતં
પટઃ યથા તન્તુવિતાનસંસ્થઃ ।
યઃ એષ સંસારતરુઃ પુરાણઃ
કર્માત્મકઃ પુષ્પફલે પ્રસૂતે ॥ ૨૧॥

દ્વે અસ્ય બીજે શતમૂલઃ ત્રિનાલઃ
પઞ્ચસ્કન્ધઃ પઞ્ચરસપ્રસૂતિઃ ।

દશ એકશાખઃ દ્વિસુપર્ણનીડઃ
    ત્રિવલ્કલઃ દ્વિફલઃ અર્કં પ્રવિષ્ટઃ ॥ ૨૨॥

અદન્તિ ચ એકં ફલમ્ અસ્ય ગૃધ્રા
    ગ્રામેચરાઃ એકમ્ અરણ્યવાસાઃ ।
હંસાઃ યઃ એકં બહુરૂપમ્ ઇજ્યૈઃ
    માયામયં વેદ સઃ વેદ વેદમ્ ॥ ૨૩॥

એવં ગુરુ ઉપાસનયા એકભક્ત્યા
    વિદ્યાકુઠારેણ શિતેન ધીરઃ ।
વિવૃશ્ચ્ય જીવાશયમ્ અપ્રમત્તઃ
    સમ્પદ્ય ચ આત્માનમ્ અથ ત્યજ અસ્ત્રમ્ ॥ ૨૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
દ્વાદશોઽધ્યાયઃ ॥ ૧૨॥

અથ ત્રયોદશોઽધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
સત્ત્વં રજઃ તમઃ ઇતિ ગુણાઃ બુદ્ધેઃ ન ચ આત્મનઃ ।
સત્ત્વેન અન્યતમૌ હન્યાત્ સત્ત્વં સત્ત્વેન ચ એવ હિ ॥ ૧॥

સત્ત્વાત્ ધર્મઃ ભવેત્ વૃદ્ધાત્ પુંસઃ મદ્ભક્તિલક્ષણઃ ।
સાત્વિક ઉપાસયા સત્ત્વં તતઃ ધર્મઃ પ્રવર્તતે ॥ ૨॥

ધર્મઃ રજઃ તમઃ હન્યાત્ સત્ત્વવૃદ્ધિઃ અનુત્તમઃ ।
આશુ નશ્યતિ તત્ મૂલઃ હિ અધર્મઃ ઉભયે હતે ॥ ૩॥

આગમઃ અપઃ પ્રજા દેશઃ કાલઃ કર્મ ચ જન્મ ચ ।
ધ્યાનં મન્ત્રઃ અથ સંસ્કારઃ દશ એતે ગુણહેતવઃ ॥ ૪॥

તત્ તત્ સાત્વિકમ્ એવ એષાં યત્ યત્ વૃદ્ધાઃ પ્રચક્ષતે ।
નિન્દન્તિ તામસં તત્ તત્ રાજસં તત્ ઉપેક્ષિતમ્ ॥ ૫॥

સાત્ત્વિકાનિ એવ સેવેત પુમાન્ સત્ત્વવિવૃદ્ધયે ।
તતઃ ધર્મઃ તતઃ જ્ઞાનં યાવત્ સ્મૃતિઃ અપોહનમ્ ॥ ૬॥

વેણુસઙ્ઘર્ષજઃ વહ્નિઃ દગ્ધ્વા શામ્યતિ તત્ વનમ્ ।
એવં ગુણવ્યત્યયજઃ દેહઃ શામ્યતિ તત્ ક્રિયઃ ॥ ૭॥

ઉદ્ધવઃ ઉવાચ ।
વિદન્તિ મર્ત્યાઃ પ્રાયેણ વિષયાન્ પદમ્ આપદામ્ ।
તથા અપિ ભુઞ્જતે કૃષ્ણ તત્ કથં શ્વ ખર અજાવત્ ॥ ૮॥

શ્રીભગવાન્ ઉવાચ ।
અહમ્ ઇતિ અન્યથાબુદ્ધિઃ પ્રમત્તસ્ય યથા હૃદિ ।
ઉત્સર્પતિ રજઃ ઘોરં તતઃ વૈકારિકં મનઃ ॥ ૯॥

રજોયુક્તસ્ય મનસઃ સઙ્કલ્પઃ સવિકલ્પકઃ ।
તતઃ કામઃ ગુણધ્યાનાત્ દુઃસહઃ સ્યાત્ હિ દુર્મતેઃ ॥ ૧૦॥

કરોતિ કામવશગઃ કર્માણિ અવિજિતેન્દ્રિયઃ ।
દુઃખોદર્કાણિ સમ્પશ્યન્ રજોવેગવિમોહિતઃ ॥ ૧૧।
રજઃ તમોભ્યાં યત્ અપિ વિદ્વાન્ વિક્ષિપ્તધીઃ પુનઃ ।
અતન્દ્રિતઃ મનઃ યુઞ્જન્ દોષદૃષ્ટિઃ ન સજ્જતે ॥ ૧૨॥

અપ્રમત્તઃ અનુયુઞ્જીતઃ મનઃ મયિ અર્પયન્ શનૈઃ ।
અનિર્વિણ્ણઃ યથાકાલં જિતશ્વાસઃ જિતાસનઃ ॥ ૧૩॥

એતાવાન્ યોગઃ આદિષ્ટઃ મત્ શિષ્યૈઃ સનક આદિભિઃ ।
સર્વતઃ મનઃ આકૃષ્ય મય્યદ્ધા આવેશ્યતે યથા ॥ ૧૪॥

ઉદ્ધવઃ ઉવાચ ।
યદા ત્વં સનક આદિભ્યઃ યેન રૂપેણ કેશવ ।
યોગમ્ આદિષ્ટવાન્ એતત્ રૂપમ્ ઇચ્છામિ વેદિતુમ્ ॥ ૧૫॥

શ્રીભગવાન્ ઉવાચ ।
પુત્રાઃ હિરણ્યગર્ભસ્ય માનસાઃ સનક આદયઃ ।
પપ્રચ્છુઃ પિતરં સૂક્ષ્માં યોગસ્ય ઐકાન્તિકીં ગતિમ્ ॥

૧૬॥

સનક આદયઃ ઊચુઃ ।
ગુણેષુ આવિશતે ચેતઃ ગુણાઃ ચેતસિ ચ પ્રભો ।
કથમ્ અન્યોન્યસન્ત્યાગઃ મુમુક્ષોઃ અતિતિતીર્ષોઃ ॥ ૧૭॥

શ્રીભગવાન્ ઉવાચ ।
એવં પૃષ્ટઃ મહાદેવઃ સ્વયમ્ભૂઃ ભૂતભાવનઃ ।

ધ્યાયમાનઃ પ્રશ્નબીજં ન અભ્યપદ્યત કર્મધીઃ ॥ ૧૮॥

સઃ મામ્ અચિન્તયત્ દેવઃ પ્રશ્નપારતિતીર્ષયા ।
તસ્ય અહં હંસરૂપેણ સકાશમ્ અગમં તદા ॥ ૧૯॥

દૃષ્ટ્વા મામ્ ત ઉપવ્રજ્ય કૃત્વા પાદ અભિવન્દનમ્ ।
બ્રહ્માણમ્ અગ્રતઃ કૃત્વા પપ્રચ્છુઃ કઃ ભવાન્ ઇતિ ॥ ૨૦॥

ઇતિ અહં મુનિભિઃ પૃષ્ટઃ તત્ત્વજિજ્ઞાસુભિઃ તદા ।
યત્ અવોચમ્ અહં તેભ્યઃ તત્ ઉદ્ધવ નિબોધ મે ॥ ૨૧॥

વસ્તુનઃ યદિ અનાનાત્વમ્ આત્મનઃ પ્રશ્નઃ ઈદૃશઃ ।
કથં ઘટેત વઃ વિપ્રાઃ વક્તુઃ વા મે કઃ આશ્રયઃ ॥ ૨૨॥

પઞ્ચાત્મકેષુ ભૂતેષુ સમાનેષુ ચ વસ્તુતઃ ।
કઃ ભવાન્ ઇતિ વઃ પ્રશ્નઃ વાચારમ્ભઃ હિ અનર્થકઃ ॥ ૨૩॥

મનસા વચસા દૃષ્ટ્યા ગૃહ્યતે અન્યૈઃ અપિ ઇન્દ્રિયૈઃ ।
અહમ્ એવ ન મત્તઃ અન્યત્ ઇતિ બુધ્યધ્વમ્ અઞ્જસા ॥ ૨૪॥

ગુણેષુ આવિશતે ચેતઃ ગુણાઃ ચેતસિ ચ પ્રજાઃ ।
જીવસ્ય દેહઃ ઉભયં ગુણાઃ ચેતઃ મત્ આત્મનઃ ॥ ૨૫॥

ગુણેષુ ચ આવિશત્ ચિત્તમ્ અભીક્ષ્ણં ગુણસેવયા ।
ગુણાઃ ચ ચિત્તપ્રભવાઃ મત્ રૂપઃ ઉભયં ત્યજેત્ ॥ ૨૬॥

જાગ્રત્ સ્વપ્નઃ સુષુપ્તં ચ ગુણતઃ બુદ્ધિવૃત્તયઃ ।
તાસાં વિલક્ષણઃ જીવઃ સાક્ષિત્વેન વિનિશ્ચિતઃ ॥ ૨૭॥

યઃ હિ સંસૃતિબન્ધઃ અયમ્ આત્મનઃ ગુણવૃત્તિદઃ ।
મયિ તુર્યે સ્થિતઃ જહ્યાત્ ત્યાગઃ તત્ ગુણચેતસામ્ ॥ ૨૮॥

અહઙ્કારકૃતં બન્ધમ્ આત્મનઃ અર્થવિપર્યયમ્ ।
વિદ્વાન્ નિર્વિદ્ય સંસારચિન્તાં તુર્યે સ્થિતઃ ત્યજેત્ ॥ ૨૯॥

યાવત્ નાનાર્થધીઃ પુંસઃ ન નિવર્તેત યુક્તિભિઃ ।
જાગર્તિ અપિ સ્વપન્ અજ્ઞઃ સ્વપ્ને જાગરણં યથા ॥ ૩૦॥

અસત્ત્વાત્ આત્મનઃ અન્યેષાં ભાવાનાં તત્ કૃતા ભિદા ।
ગતયઃ હેતવઃ ચ અસ્ય મૃષા સ્વપ્નદૃશઃ યથા ॥ ૩૧॥

યો જાગરે બહિઃ અનુક્ષણધર્મિણઃ અર્થાન્
ભુઙ્ક્તે સમસ્તકરણૈઃ હૃદિ તત્ સદૃક્ષાન્ ।
સ્વપ્ને સુષુપ્તઃ ઉપસંહરતે સઃ એકઃ
સ્મૃતિ અન્વયાત્ ત્રિગુણવૃત્તિદૃક્ ઇન્દ્રિય ઈશઃ ॥ ૩૨॥

એવં વિમૃશ્ય ગુણતઃ મનસઃ ત્ર્યવસ્થા
મત્ માયયા મયિ કૃતા ઇતિ નિશ્ચિતાર્થાઃ ।
સંછિદ્ય હાર્દમ્ અનુમાનસ્ત્ ઉક્તિતીક્ષ્ણ
જ્ઞાનાસિના ભજતઃ મા અખિલસંશયાધિમ્ ॥ ૩૩॥

ઈક્ષેત વિભ્રમમ્ ઇદં મનસઃ વિલાસમ્
દૃષ્ટં વિનષ્ટમ્ અતિલોલમ્ અલાતચક્રમ્ ।
વિજ્ઞાનમ્ એકમ્ ઉરુધા ઇવ વિભાતિ માયા
સ્વપ્નઃ ત્રિધા ગુણવિસર્ગકૃતઃ વિકલ્પઃ ॥ ૩૪॥

દૃષ્ટિં તતઃ પ્રતિનિવર્ત્ય નિવૃત્તતૃષ્ણઃ
તૂષ્ણીં ભવેત્ નિજસુખ અનુભવઃ નિરીહઃ ।
સન્દૃશ્યતે ક્વ ચ યદિ ઇદમ્ અવસ્તુબુદ્ધ્યા
ત્યક્તં ભ્રમાય ન ભવેત્ સ્મૃતિઃ આનિપાતાત્ ॥ ૩૫॥

દેહં ચ નશ્વરમ્ અવસ્થિતમ્ ઉત્થિતં વા
સિદ્ધઃ ન પશ્યતિ યતઃ અધ્યગમત્સ્વરૂપમ્ ।
દૈવાત્ અપેતમ્ ઉત દૈવશાત્ ઉપેતમ્
વાસઃ યથા પરિકૃતં મદિરામદાન્ધઃ ॥ ૩૬॥

દેહઃ અપિ દૈવવશગઃ ખલુ કર્મ યાવત્
સ્વારમ્ભકં પ્રતિસમીક્ષતઃ એવ સાસુઃ ।
તં અપ્રપઞ્ચમ્ અધિરૂઢસમાધિયોગઃ
સ્વાપ્નં પુનઃ ન ભજતે પ્રતિબુદ્ધવસ્તુઃ ॥ ૩૭॥

મયા એતત્ ઉક્તં વઃ વિપ્રાઃ ગુહ્યં યત્ સાઙ્ખ્યયોગયોઃ ।
જાનીતમ્ આગતં યજ્ઞં યુષ્મત્ ધર્મવિવક્ષયા ॥ ૩૮॥

અહં યોગસ્ય સાઙ્ખ્યસ્ય સત્યસ્યર્તસ્ય તેજસઃ ।
પરાયણં દ્વિજશ્રેષ્ઠાઃ શ્રિયઃ કીર્તેઃ દમસ્ય ચ ॥ ૩૯॥

માં ભજન્તિ ગુણાઃ સર્વે નિર્ગુણં નિરપેક્ષકમ્ ।

સુહૃદં પ્રિયમ્ આત્માનં સામ્ય અસઙ્ગ આદયઃ ગુણાઃ ॥ ૪૦॥

ઇતિ મે છિન્નસન્દેહાઃ મુનયઃ સનક આદયઃ ।
સભાજયિત્વા પરયા ભક્ત્યા અગૃણત સંસ્તવૈઃ ॥ ૪૧॥

તૈઃ અહં પૂજિતઃ સમ્યક્ સંસ્તુતઃ પરમ ઋષિભિઃ ।
પ્રત્યેયાય સ્વકં ધામ પશ્યતઃ પરમેષ્ઠિનઃ ॥ ૪૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
હંસગીતાનિરૂપણં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૩॥

અથ ચતુર્દશોઽધ્યાયઃ ।
ઉદ્ધવઃ ઉવાચ ।
વદન્તિ કૃષ્ણ શ્રેયાંસિ બહૂનિ બ્રહ્મવાદિનઃ ।
તેષાં વિકલ્પપ્રાધાન્યમ્ ઉત અહો એકમુખ્યતા ॥ ૧॥

ભવત્ ઉદાહૃતઃ સ્વામિન્ ભક્તિયોગઃ અનપેક્ષિતઃ ।
નિરસ્ય સર્વતઃ સઙ્ગં યેન ત્વયિ આવિશેત્ મનઃ ॥ ૨॥

શ્રીભગવાન્ ઉવાચ ।
કાલેન નષ્ટા પ્રલયે વાણીયં વેદસઞ્જ્ઞિતા ।
મયા આદૌ બ્રહ્મણે પ્રોક્તા ધર્મઃ યસ્યાં મદાત્મકઃ ॥ ૩॥

તેન પ્રોક્તા ચ પુત્રાય મનવે પૂર્વજાય સા ।
તતઃ ભૃગુ આદયઃ અગૃહ્ણન્ સપ્તબ્રહ્મમહર્ષયઃ ॥ ૪॥

તેભ્યઃ પિતૃભ્યઃ તત્ પુત્રાઃ દેવદાનવગુહ્યકાઃ ।
મનુષ્યાઃ સિદ્ધગન્ધર્વાઃ સવિદ્યાધરચારણાઃ ॥ ૫॥

કિન્દેવાઃ કિન્નરાઃ નાગાઃ રક્ષઃ કિમ્પુરુષ આદયઃ ।
બહ્વ્યઃ તેષાં પ્રકૃતયઃ રજઃસત્ત્વતમોભુવઃ ॥ ૬॥

યાભિઃ ભૂતાનિ ભિદ્યન્તે ભૂતાનાં મતયઃ તથા ।
યથાપ્રકૃતિ સર્વેષાં ચિત્રાઃ વાચઃ સ્રવન્તિ હિ ॥ ૭॥

એવં પ્રકૃતિવૈચિત્ર્યાત્ ભિદ્યન્તે મતયઃ નૃણામ્ ।
પારમ્પર્યેણ કેષાઞ્ચિત્ પાખણ્ડમતયઃ અપરે ॥ ૮॥

મન્માયામોહિતધિયઃ પુરુષાઃ પુરુષર્ષભ ।

શ્રેયઃ વદન્તિ અનેકાન્તં યથાકર્મ યથારુચિ ॥ ૯॥

ધર્મમ્ એકે યશઃ ચ અન્યે કામં સત્યં દમં શમમ્ ।
અન્યે વદન્તિ સ્વાર્થં વા ઐશ્વર્યં ત્યાગભોજનમ્ ।
કેચિત્ યજ્ઞતપોદાનં વ્રતાનિ નિયમ અન્યમાન્ ॥ ૧૦॥

આદિ અન્તવન્તઃ એવ એષાં લોકાઃ કર્મવિનિર્મિતાઃ ।
દુઃખ ઉદર્કાઃ તમોનિષ્ઠાઃ ક્ષુદ્ર આનન્દાઃ શુચ અર્પિતાઃ ॥

૧૧॥

મયિ અર્પિત મનઃ સભ્ય નિરપેક્ષસ્ય સર્વતઃ ।
મયા આત્મના સુખં યત્ તત્ કુતઃ સ્યાત્ વિષય આત્મનામ્ ॥

૧૨॥

અકિઞ્ચનસ્ય દાન્તસ્ય શાન્તસ્ય સમચેતસઃ ।
મયા સન્તુષ્ટમનસઃ સર્વાઃ સુખમયાઃ દિશઃ ॥ ૧૩॥

ન પારમેષ્ઠ્યં ન મહેન્દ્રધિષ્ણ્યમ્
    ન સાર્વભૌમં ન રસાધિપત્યમ્ ।
ન યોગસિદ્ધીઃ અપુનર્ભવં વા
    મયિ અર્પિત આત્મા ઇચ્છતિ મત્ વિના અન્યત્ ॥ ૧૪॥

ન તથા મે પ્રિયતમઃ આત્મયોનિઃ ન શઙ્કરઃ ।
ન ચ સઙ્કર્ષણઃ ન શ્રીઃ ન એવ આત્મા ચ યથા ભવાન્ ॥ ૧૫॥

નિરપેક્ષં મુનિં શાતં નિર્વૈરં સમદર્શનમ્ ।
અનુવ્રજામિ અહં નિત્યં પૂયેયેતિ અઙ્ઘ્રિરેણુભિઃ ॥ ૧૬॥

નિષ્કિઞ્ચના મયિ અનુરક્તચેતસઃ
    શાન્તાઃ મહાન્તઃ અખિલજીવવત્સલાઃ ।
કામૈઃ અનાલબ્ધધિયઃ જુષન્તિ યત્
    તત્ નૈરપેક્ષ્યં ન વિદુઃ સુખં મમ ॥ ૧૭॥

બાધ્યમાનઃ અપિ મદ્ભક્તઃ વિષયૈઃ અજિતેન્દ્રિયઃ ।
પ્રાયઃ પ્રગલ્ભયા ભક્ત્યા વિષયૈઃ ન અભિભૂયતે ॥ ૧૮॥

યથા અગ્નિઃ સુસમૃદ્ધ અર્ચિઃ કરોતિ એધાંસિ ભસ્મસાત્ ।
તથા મદ્વિષયા ભક્તિઃ ઉદ્ધવ એનાંસિ કૃત્સ્નશઃ ॥ ૧૯॥

ન સાધયતિ માં યોગઃ ન સાઙ્ખ્યં ધર્મઃ ઉદ્ધવ ।
ન સ્વાધ્યાયઃ તપઃ ત્યાગઃ યથા ભક્તિઃ મમ ઊર્જિતા ॥ ૨૦॥

ભક્ત્યા અહમ્ એકયા ગ્રાહ્યઃ શ્રદ્ધયા આત્મા પ્રિયઃ સતામ્ ।
ભક્તિઃ પુનાતિ મન્નિષ્ઠા શ્વપાકાન્ અપિ સંભવાત્ ॥ ૨૧॥

ધર્મઃ સત્યદયા ઉપેતઃ વિદ્યા વા તપસાન્વિતા ।
મદ્ભક્ત્યાપેતમ્ આત્માનં ન સમ્યક્ પ્રપુનાતિ હિ ॥ ૨૨॥

કથં વિના રોમહર્ષં દ્રવતા ચેતસા વિના ।
વિનાનન્દ અશ્રુકલયા શુધ્યેત્ ભક્ત્યા વિનાશયઃ ॥ ૨૩॥

વાક્ ગદ્ગદા દ્રવતે યસ્ય ચિત્તમ્
 રુદતિ અભીક્ષ્ણં હસતિ ક્વચિત્ ચ ।
વિલજ્જઃ ઉદ્ગાયતિ નૃત્યતે ચ
 મદ્ભક્તિયુક્તઃ ભુવનં પુનાતિ ॥ ૨૪॥

યથા અગ્નિના હેમ મલં જહાતિ
 ધ્માતં પુનઃ સ્વં ભજતે ચ રૂપમ્ ।
આત્મા ચ કર્માનુશયં વિધૂય
 મદ્ભક્તિયોગેન ભજતિ અથઃ મામ્ ॥ ૨૫॥

યથા યથા આત્મા પરિમૃજ્યતે અસૌ
 મત્પુણ્યગાથાશ્રવણ અભિધાનૈઃ ।
તથા તથા પશ્યતિ વસ્તુ સૂક્ષ્મમ્
 ચક્ષુઃ યથા એવ અઞ્જનસમ્પ્રયુક્તમ્ ॥ ૨૬॥

વિષયાન્ ધ્યાયતઃ ચિત્તં વિષયેષુ વિષજ્જતે ।
મામ્ અનુસ્મરતઃ ચિત્તં મયિ એવ પ્રવિલીયતે ॥ ૨૭॥

તસ્માત્ અસત્ અભિધ્યાનં યથા સ્વપ્નમનોરથમ્ ।
હિત્વા મયિ સમાધત્સ્વ મનઃ મદ્ભાવભાવિતમ્ ॥ ૨૮॥

સ્ત્રીણાં સ્ત્રીસઙ્ગિનાં સઙ્ગં ત્યક્ત્વા દૂરતઃ આત્મવાન્ ।
ક્ષેમે વિવિક્તઃ આસીનઃ ચિન્તયેત્ મામ્ અતન્દ્રિતઃ ॥ ૨૯॥

ન તથા અસ્ય ભવેત્ ક્લેશઃ બન્ધઃ ચ અન્યપ્રસઙ્ગતઃ ।
યોષિત્ સઙ્ગાત્ યથા પુંસઃ યથા તત્ સઙ્ગિસઙ્ગતઃ ॥ ૩૦॥

ઉદ્ધવઃ ઉવાચ ।
યથા ત્વામ્ અરવિન્દાક્ષ યાદૃશં વા યદાત્મકમ્ ।
ધ્યાયેત્ મુમુક્ષુઃ એતત્ મે ધ્યાનં મે વક્તુમ્ અર્હસિ ॥ ૩૧॥

શ્રીભગવાન્ ઉવાચ ।
સમઃ આસનઃ આસીનઃ સમકાયઃ યથાસુખમ્ ।
હસ્તૌ ઉત્સઙ્ગઃ આધાય સ્વનાસાગ્રકૃત ઈક્ષણઃ ॥ ૩૨॥

પ્રાણસ્ય શોધયેત્ માર્ગં પૂરકુમ્ભકરેચકૈઃ ।
વિપર્યયેણ અપિ શનૈઃ અભ્યસેત્ નિર્જિતેન્દ્રિયઃ ॥ ૩૩॥

હૃદિ અવિચ્છિન્નમ્ ઓઙ્કારં ઘણ્ટાનાદં બિસોર્ણવત્ ।
પ્રાણેન ઉદીર્ય તત્ર અથ પુનઃ સંવેશયેત્ સ્વરમ્ ॥ ૩૪॥

એવં પ્રણવસંયુક્તં પ્રાણમ્ એવ સમભ્યસેત્ ।
દશકૃત્વઃ ત્રિષવણં માસાત્ અર્વાક્ જિત અનિલઃ ॥ ૩૫॥

હૃત્પુણ્ડરીકમ્ અન્તસ્થમ્ ઊર્ધ્વનાલમ્ અધોમુખમ્ ।
ધ્યાત્વા ઊર્ધ્વમુખમ્ ઉન્નિદ્રમ્ અષ્ટપત્રં સકર્ણિકમ્ ॥ ૩૬॥

કર્ણિકાયાં ન્યસેત્ સૂર્યસોમાગ્નીન્ ઉત્તરોત્તરમ્ ।
વહ્નિમધ્યે સ્મરેત્ રૂપં મમ એતત્ ધ્યાનમઙ્ગલમ્ ॥ ૩૭॥

સમં પ્રશાન્તં સુમુખં દીર્ઘચારુચતુર્ભુજમ્ ।
સુચારુસુન્દરગ્રીવં સુકપોલં શુચિસ્મિતમ્ ॥ ૩૮॥

સમાન કર્ણ વિન્યસ્ત સ્ફુરન્ મકર કુણ્ડલમ્ ।
હેમ અમ્બરં ઘનશ્યામં શ્રીવત્સ શ્રીનિકેતનમ્ ॥ ૩૯॥

શઙ્ખ ચક્ર ગદા પદ્મ વનમાલા વિભૂષિતમ્ ।
નૂપુરૈઃ વિલસત્ પાદં કૌસ્તુભ પ્રભયા યુતમ્ ॥ ૪૦॥

દ્યુમત્ કિરીટ કટક કટિસૂત્ર અઙ્ગદ અયુતમ્ ।
સર્વાઙ્ગ સુન્દરં હૃદ્યં પ્રસાદ સુમુખ ઈક્ષણમ્ ॥ ૪૧॥

સુકુમારમ્ અભિધ્યાયેત્ સર્વાઙ્ગેષુ મનઃ દધત્ ।
ઇન્દ્રિયાણિ ઇન્દ્રિયેભ્યઃ મનસા આકૃષ્ય તત્ મનઃ ।
બુદ્ધ્યા સારથિના ધીરઃ પ્રણયેત્ મયિ સર્વતઃ ॥ ૪૨॥

તત્ સર્વ વ્યાપકં ચિત્તમ્ આકૃષ્ય એકત્ર ધારયેત્ ।

ન અન્યાનિ ચિન્તયેત્ ભૂયઃ સુસ્મિતં ભાવયેત્ મુખમ્ ॥ ૪૩॥

તત્ર લબ્ધપદં ચિત્તમ્ આકૃષ્ય વ્યોમ્નિ ધારયેત્ ।
તત્ ચ ત્યક્ત્વા મદારોહઃ ન કિઞ્ચિત્ અપિ ચિન્તયેત્ ॥ ૪૪॥

એવં સમાહિતમતિઃ મામ્ એવ આત્માનમ્ આત્મનિ ।
વિચષ્ટે મયિ સર્વાત્મત્ જ્યોતિઃ જ્યોતિષિ સંયુતમ્ ॥ ૪૫॥

ધ્યાનેન ઇત્થં સુતીવ્રેણ યુઞ્જતઃ યોગિનઃ મનઃ ।
સંયાસ્યતિ આશુ નિર્વાણં દ્રવ્ય જ્ઞાન ક્રિયા ભ્રમઃ ॥ ૪૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
ભક્તિરહસ્યાવધારણયોગો નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪॥

અથ પઞ્ચદશોઽધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
જિતેન્દ્રિયસ્ય યુક્તસ્ય જિતશ્વાસસ્ય યોગિનઃ
મયિ ધારયતઃ ચેતઃ ઉપતિષ્ઠન્તિ સિદ્ધયઃ ॥ ૧॥

ઉદ્ધવઃ ઉવાચ ।
કયા ધારણયા કાસ્વિત્ કથંસ્વિત્ સિદ્ધિઃ અચ્યુત ।
કતિ વા સિદ્ધયઃ બ્રૂહિ યોગિનાં સિદ્ધિદઃ ભવાન્ ॥ ૨॥

શ્રીભગવાન્ ઉવાચ ।
સિદ્ધયઃ અષ્ટાદશ પ્રોક્તા ધારણાયોગપારગૈઃ ।
તાસામ્ અષ્ટૌ મત્ પ્રધાનાઃ દશઃ એવ ગુણહેતવઃ ॥ ૩॥

અણિમા મહિમા મૂર્તેઃ લઘિમા પ્રાપ્તિઃ ઇન્દ્રિયૈઃ ।
પ્રાકામ્યં શ્રુતદૃષ્ટેષુ શક્તિપ્રેરણમ્ ઈશિતા ॥ ૪॥

ગુણેષુ અસઙ્ગઃ વશિતા યત્ કામઃ તત્ અવસ્યતિ ।
એતાઃ મે સિદ્ધયઃ સૌમ્ય અષ્ટૌ ઉત્પત્તિકાઃ મતાઃ ॥ ૫॥

અનૂર્મિમત્ત્વં દેહે અસ્મિન્ દૂરશ્રવણદર્શનમ્ ।
મનોજવઃ કામરૂપં પરકાયપ્રવેશનમ્ ॥ ૬॥

સ્વચ્છન્દમૃત્યુઃ દેવાનાં સહક્રીડાનુદર્શનમ્ ।
યથાસઙ્કલ્પસંસિદ્ધિઃ આજ્ઞાપ્રતિહતા ગતિઃ ॥ ૭॥

ત્રિકાલજ્ઞત્વમ્ અદ્વન્દ્વં પરચિત્તાદિ અભિજ્ઞતા ।
અગ્નિ અર્ક અમ્બુ વિષ આદીનાં પ્રતિષ્ટમ્ભઃ અપરાજયઃ ॥ ૮॥

એતાઃ ચ ઉદ્દેશતઃ પ્રોક્તા યોગધારણસિદ્ધયઃ ।
યયા ધારણયા યા સ્યાત્ યથા વા સ્યાત્ નિબોધ મે ॥ ૯॥

ભૂતસૂક્ષ્મ આત્મનિ મયિ તન્માત્રં ધારયેત્ મનઃ ।
અણિમાનમ્ અવાપ્નોતિ તન્માત્ર ઉપાસકઃ મમ ॥ ૧૦॥

મહતિ આત્મન્ મયિ પરે યથાસંસ્થં મનઃ દધત્ ।
મહિમાનમ્ અવાપ્નોતિ ભૂતાનાં ચ પૃથક્ પૃથક્ ॥ ૧૧॥

પરમાણુમયે ચિત્તં ભૂતાનાં મયિ રઞ્જયન્ ।
કાલસૂક્ષ્માત્મતાં યોગી લઘિમાનમ્ અવાપ્નુયાત્ ॥ ૧૨॥

ધારયન્ મયિ અહંતત્ત્વે મનઃ વૈકારિકે અખિલમ્ ।
સર્વેન્દ્રિયાણામ્ આત્મત્વં પ્રાપ્તિં પ્રાપ્નોતિ મન્મનાઃ ॥ ૧૩॥

મહતિ આત્મનિ યઃ સૂત્રે ધારયેત્ મયિ માનસમ્ ।
પ્રાકામ્યં પારમેષ્ઠ્યં મે વિન્દતે અવ્યક્તજન્મનઃ ॥ ૧૪॥

વિષ્ણૌ ત્ર્યધિ ઈશ્વરે ચિત્તં ધારયેત્ કાલવિગ્રહે ।
સઃ ઈશિત્વમ્ અવાપ્નોતિ ક્ષેત્રક્ષેત્રજ્ઞચોદનામ્ ॥ ૧૫॥

નારાયણે તુરીયાખ્યે ભગવત્ શબ્દશબ્દિતે ।
મનઃ મયિ આદધત્ યોગી મત્ ધર્માઃ વહિતામ્ ઇયાત્ ॥ ૧૬॥

નિર્ગુણે બ્રહ્મણિ મયિ ધારયન્ વિશદં મનઃ ।
પરમાનન્દમ્ આપ્નોતિ યત્ર કામઃ અવસીયતે ॥ ૧૭॥

શ્વેતદીપપતૌ ચિત્તં શુદ્ધે ધર્મમયે મયિ ।
ધારયન્ શ્વેતતાં યાતિ ષડૂર્મિરહિતઃ નરઃ ॥ ૧૮॥

મયિ આકાશ આત્મનિ પ્રાણે મનસા ઘોષમ્ ઉદ્વહન્ ।
તત્ર ઉપલબ્ધા ભૂતાનાં હંસઃ વાચઃ શ્રુણોતિ અસૌ ॥ ૧૯॥

ચક્ષુઃ ત્વષ્ટરિ સંયોજ્ય ત્વષ્ટારમ્ અપિ ચક્ષુષિ ।
માં તત્ર મનસા ધ્યાયન્ વિશ્વં પશ્યતિ સૂક્ષ્મદૃક્ ॥ ૨૦॥

મનઃ મયિ સુસંયોજ્ય દેહં તદનુ વાયુના ।
મદ્ધારણ અનુભાવેન તત્ર આત્મા યત્ર વૈ મનઃ ॥ ૨૧॥

યદા મનઃ ઉપાદાય યત્ યત્ રૂપં બુભૂષતિ ।
તત્ તત્ ભવેત્ મનોરૂપં મદ્યોગબલમ્ આશ્રયઃ ॥ ૨૨॥

પરકાયં વિશન્ સિદ્ધઃ આત્માનં તત્ર ભાવયેત્ ।
પિણ્ડં હિત્વા વિશેત્ પ્રાણઃ વાયુભૂતઃ ષડઙ્ઘ્રિવત્ ॥ ૨૩॥

પાષ્ણ્ર્યા આપીડ્ય ગુદં પ્રાણં હૃત્ ઉરઃ કણ્ઠ મૂર્ધસુ ।
આરોપ્ય બ્રહ્મરન્ધ્રેણ બ્રહ્મ નીત્વા ઉત્સૃજેત્ તનુમ્ ॥ ૨૪॥

વિહરિષ્યન્ સુરાક્રીડે મત્સ્થં સત્ત્વં વિભાવયેત્ ।
વિમાનેન ઉપતિષ્ઠન્તિ સત્ત્વવૃત્તીઃ સુરસ્ત્રિયઃ ॥ ૨૫॥

યથા સઙ્કલ્પયેત્ બુદ્ધ્યા યદા વા મત્પરઃ પુમાન્ ।
મયિ સત્યે મનઃ યુઞ્જન્ તથા તત્ સમુપાશ્નુતે ॥ ૨૬॥

યઃ વૈ મદ્ભાવમ્ આપન્નઃ ઈશિતુઃ વશિતુઃ પુમાન્ ।
કુતશ્ચિત્ ન વિહન્યેત તસ્ય ચ આજ્ઞા યથા મમ ॥ ૨૭॥

મદ્ભક્ત્યા શુદ્ધસત્ત્વસ્ય યોગિનઃ ધારણાવિદઃ ।
તસ્ય ત્રૈકાલિકી બુદ્ધિઃ જન્મ મૃત્યુ ઉપબૃંહિતા ॥ ૨૮॥

અગ્નિ આદિભિઃ ન હન્યેત મુનેઃ યોગમ્ અયં વપુઃ ।
મદ્યોગશ્રાન્તચિત્તસ્ય યાદસામ્ ઉદકં યથા ॥ ૨૯॥

મદ્વિભૂતિઃ અભિધ્યાયન્ શ્રીવત્સ અસ્ત્રબિભૂષિતાઃ ।
ધ્વજાતપત્રવ્યજનૈઃ સઃ ભવેત્ અપરાજિતઃ ॥ ૩૦॥

ઉપાસકસ્ય મામ્ એવં યોગધારણયા મુનેઃ ।
સિદ્ધયઃ પૂર્વકથિતાઃ ઉપતિષ્ઠન્તિ અશેષતઃ ॥ ૩૧॥

જિતેન્દ્રિયસ્ય દાન્તસ્ય જિતશ્વાસ આત્મનઃ મુનેઃ ।
મદ્ધારણાં ધારયતઃ કા સા સિદ્ધિઃ સુદુર્લભા ॥ ૩૨॥

અન્તરાયાન્ વદન્તિ એતાઃ યુઞ્જતઃ યોગમ્ ઉત્તમમ્ ।
મયા સમ્પદ્યમાનસ્ય કાલક્ષેપણહેતવઃ ॥ ૩૩॥

જન્મ ઓષધિ તપો મન્ત્રૈઃ યાવતીઃ ઇહ સિદ્ધયઃ ।
યોગેન આપ્નોતિ તાઃ સર્વાઃ ન અન્યૈઃ યોગગતિં વ્રજેત્ ॥ ૩૪॥

સર્વાસામ્ અપિ સિદ્ધીનાં હેતુઃ પતિઃ અહં પ્રભુઃ ।

અહં યોગસ્ય સાङ્ખ્યસ્ય ધર્મસ્ય બ્રહ્મવાદિનામ્ ॥ ૩૫॥

અહમ્ આત્મા અન્તરઃ બાહ્યઃ અનાવૃતઃ સર્વદેહિનામ્ ।
યથા ભૂતાનિ ભૂતેષુ બહિઃ અન્તઃ સ્વયં તથા ॥ ૩૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
સિદ્ધનિરૂપણયોગો નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫॥

અથ ષોડશોઽધ્યાયઃ ।
ઉદ્ધવઃ ઉવાચ ।
ત્વં બ્રહ્મ પરમં સાક્ષાત્ અનાદિ અનન્તમ્ અપાવૃતમ્ ।
સર્વેષામ્ અપિ ભાવાનાં ત્રાણસ્થિતિ અપ્યય ઉદ્ભવઃ ॥ ૧॥

ઉચ્ચાવચેષુ ભૂતેષુ દુર્જ્ઞેયમ્ અકૃત આત્મભિઃ ।
ઉપાસતે ત્વાં ભગવન્ યાથાતથ્યેન બ્રાહ્મણાઃ ॥ ૨॥

યેષુ યેષુ ચ ભાવેષુ ભક્ત્યા ત્વાં પરમર્ષયઃ ।
ઉપાસીનાઃ પ્રપદ્યન્તે સંસિદ્ધિં તત્ વદસ્વ મે ॥ ૩॥

ગૂઢઃ ચરસિ ભૂતાત્મા ભૂતાનાં ભૂતભાવન ।
ન ત્વાં પશ્યન્તિ ભૂતાનિ પશ્યન્તં મોહિતાનિ તે ॥ ૪॥

યાઃ કાઃ ચ ભૂમૌ દિવિ વૈ રસાયામ્
 વિભૂતયઃ દિક્ષુ મહાવિભૂતે ।
તાઃ મહ્યમ્ આખ્યાહિ અનુભાવિતાઃ તે
 નમામિ તે તીર્થ પદ અङ્ઘ્રિપદ્મમ્ ॥ ૫॥

શ્રીભગવાન્ ઉવાચ ।
એવમ્ એતત્ અહં પૃષ્ટઃ પ્રશ્નં પ્રશ્નવિદાં વર ।
યુયુત્સુના વિનશને સપત્નૈઃ અર્જુનેન વૈ ॥ ૬॥

જ્ઞાત્વા જ્ઞાતિવધં ગર્હ્યમ્ અધર્મં રાજ્યહેતુકમ્ ।
તતઃ નિવૃત્તઃ હન્તા અહં હતઃ અયમ્ ઇતિ લૌકિકઃ ॥ ૭॥

સઃ તદા પુરુષવ્યાઘ્રઃ યુક્ત્યા મે પ્રતિબોધિતઃ ।
અભ્યભાષત મામ્ એવં યથા ત્વં રણમૂર્ધનિ ॥ ૮॥

અહમ્ આત્મા ઉદ્ધવ આમીષાં ભૂતાનાં સુહૃત્ ઈશ્વરઃ ।

અહં સર્વાણિ ભૂતાનિ તેષાં સ્થિતિ ઉદ્ભવ અપ્યયઃ ॥ ૯॥

અહં ગતિઃ ગતિમતાં કાલઃ કલયતામ્ અહમ્ ।
ગુણાનાં ચ અપિ અહં સામ્યં ગુણિન્યા ઉત્પત્તિકઃ ગુણઃ ॥ ૧૦॥

ગુણિનામ્ અપિ અહં સૂત્રં મહતાં ચ મહાન્ અહમ્ ।
સૂક્ષ્માણામ્ અપિ અહં જીવઃ દુર્જયાનામ્ અહં મનઃ ॥ ૧૧॥

હિરણ્યગર્ભઃ વેદાનાં મન્ત્રાણાં પ્રણવઃ ત્રિવૃત્ ।
અક્ષરાણામ્ અકારઃ અસ્મિ પદાનિ છન્દસામ્ અહમ્ ॥ ૧૨॥

ઇન્દ્રઃ અહં સર્વદેવાનાં વસૂનામસ્મિ હવ્યવાટ્ ।
આદિત્યાનામ્ અહં વિષ્ણૂ રુદ્રાણાં નીલલોહિતઃ ॥ ૧૩॥

બ્રહ્મર્ષીણાં ભૃગુઃ અહં રાજર્ષીણામ્ અહં મનુઃ ।
દેવર્ષિણાં નારદઃ અહં હવિર્ધાનિ અસ્મિ ધેનુષુ ॥ ૧૪॥

સિદ્ધેશ્વરાણાં કપિલઃ સુપર્ણઃ અહં પતત્રિણામ્ ।
પ્રજાપતીનાં દક્ષઃ અહં પિતૃણામ્ અહમ્ અર્યમા ॥ ૧૫॥

માં વિદ્ધિ ઉદ્ધવ દૈત્યાનાં પ્રહ્લાદમ્ અસુરેશ્વરમ્ ।
સોમં નક્ષત્ર ઓષધીનાં ધનેશં યક્ષરક્ષસામ્ ॥ ૧૬॥

ઐરાવતં ગજેન્દ્રાણાં યાદસાં વરુણં પ્રભુમ્ ।
તપતાં દ્યુમતાં સૂર્યં મનુષ્યાણાં ચ ભૂપતિમ્ ॥ ૧૭॥

ઉચ્ચૈઃશ્રવાઃ તુરઙ્ગાણાં ધાતૂનામ્ અસ્મિ કાઞ્ચનમ્ ।
યમઃ સંયમતાં ચ અહં સર્પાણામ્ અસ્મિ વાસુકિઃ ॥ ૧૮॥

નાગેન્દ્રાણાં અનન્તઃ અહં મૃગેન્દ્રઃ શ‍ૃઙ્ગિદંષ્ટ્રિણામ્ ।
આશ્રમાણામ્ અહં તુર્યઃ વર્ણાનાં પ્રથમઃ અનઘ ॥ ૧૯॥

તીર્થાનાં સ્રોતસાં ગઙ્ગા સમુદ્રઃ સરસામ્ અહમ્ ।
આયુધાનાં ધનુઃ અહં ત્રિપુરઘ્નઃ ધનુષ્મતામ્ ॥ ૨૦॥

ધિષ્ણ્યાનામ્ અસ્મિ અહં મેરુઃ ગહનાનાં હિમાલયઃ ।
વનસ્પતીનામ્ અશ્વત્થઃ ઓષધીનામ્ અહં યવઃ ॥ ૨૧॥

પુરોધસાં વસિષ્ઠઃ અહં બ્રહ્મિષ્ઠાનાં બૃહસ્પતિઃ ।
સ્કન્દઃ અહં સર્વસેનાન્યામ્ અગ્રણ્યાં ભગવાન્ અજઃ ॥ ૨૨॥

યજ્ઞાનાં બ્રહ્મયજ્ઞઃ અહં વ્રતાનામ્ અવિહિંસનમ્ ।
વાયુ અગ્નિ અર્ક અમ્બુ વાક્ આત્મા શુચીનામ્ અપિ અહં શુચિઃ ॥ ૨૩ ॥

યોગાનામ્ આત્મસંરોધઃ મન્ત્રઃ અસ્મિ વિજિગીષતામ્ ।
આન્વીક્ષિકી કૌશલાનાં વિકલ્પઃ ખ્યાતિવાદિનામ્ ॥ ૨૪ ॥

સ્ત્રીણાં તુ શતરૂપા અહં પુંસાં સ્વાયંભુવઃ મનુઃ ।
નારાયણઃ મુનીનાં ચ કુમારઃ બ્રહ્મચારિણામ્ ॥ ૨૫ ॥

ધર્માણામ્ અસ્મિ સંન્યાસઃ ક્ષેમાણામ્ અબહિઃ મતિઃ ।
ગુહ્યાનાં સૂનૃતં મૌનં મિથુનાનામ્ અજઃ તુ અહમ્ ॥ ૨૬ ॥

સંવત્સરઃ અસ્મિ અનિમિષામ્ ઋતૂનાં મધુમાધવૌ ।
માસાનાં માર્ગશીર્ષઃ અહં નક્ષત્રાણાં તથા અભિજિત્ ॥ ૨૭ ॥

અહં યુગાનાં ચ કૃતં ધીરાણાં દેવલઃ અસિતઃ ।
દ્વૈપાયનઃ અસ્મિ વ્યાસાનાં કવીનાં કાવ્યઃ આત્મવાન્ ॥ ૨૮ ॥

વાસુદેવઃ ભગવતાં ત્વં ભાગવતેષુ અહમ્ ।
કિમ્પુરુષાણાં હનુમાન્ વિદ્યાધ્રાણાં સુદર્શનઃ ॥ ૨૯ ॥

રત્નાનાં પદ્મરાગઃ અસ્મિ પદ્મકોશઃ સુપેશસામ્ ।
કુશઃ અસ્મિ દર્ભજાતીનાં ગવ્યમ્ આજ્યં હવિષ્ષુ અહમ્ ॥

૩૦ ॥

વ્યવસાયિનામ્ અહં લક્ષ્મીઃ કિતવાનાં છલગ્રહઃ ।
તિતિક્ષા અસ્મિ તિતિક્ષણાં સત્ત્વં સત્ત્વવતામ્ અહમ્ ॥ ૩૧ ॥

ઓજઃ સહોબલવતાં કર્મ અહં વિદ્ધિ સાત્ત્વતામ્ ।
સાત્ત્વતાં નવમૂર્તીનામ્ આદિમૂર્તિઃ અહં પરા ॥ ૩૨ ॥

વિશ્વાવસુઃ પૂર્વચિત્તિઃ ગન્ધર્વ અપ્સરસામ્ અહમ્ ।
ભૂધરાણામ્ અહં સ્થૈર્યં ગન્ધમાત્રમ્ અહં ભુવઃ ॥ ૩૩ ॥

અપાં રસઃ ચ પરમઃ તેજિષ્ઠાનાં વિભાવસુઃ ।
પ્રભા સૂર્ય ઇન્દુ તારાણાં શબ્દઃ અહં નભસઃ પરઃ ॥ ૩૪ ॥

બ્રહ્મણ્યાનાં બલિઃ અહં વિરાણામ્ અહમ્ અર્જુનઃ ।
ભૂતાનાં સ્થિતિઃ ઉત્પત્તિઃ અહં વૈ પ્રતિસઙ્ક્રમઃ ॥ ૩૫ ॥

ગતિ ઉક્તિ ઉત્સર્ગ ઉપાદાનમ્ આનન્દ સ્પર્શ લક્ષણમ્ ।
આસ્વાદ શ્રુતિ અવઘ્રાણમ્ અહં સર્વેન્દ્રિય ઇન્દ્રિયમ્ ॥ ૩૬॥

પૃથિવી વાયુઃ આકાશઃ આપઃ જ્યોતિઃ અહં મહાન્ ।
વિકારઃ પુરુષઃ અવ્યક્તં રજઃ સત્ત્વં તમઃ પરમ્ ।
અહમ્ એતત્ પ્રસઙ્ખ્યાનં જ્ઞાનં સત્ત્વવિનિશ્ચયઃ ॥ ૩૭॥

મયા ઈશ્વરેણ જીવેન ગુણેન ગુણિના વિના ।
સર્વાત્મના અપિ સર્વેણ ન ભાવઃ વિદ્યતે ક્વચિત્ ॥ ૩૮॥

સઙ્ખ્યાનં પરમાણૂનાં કાલેન ક્રિયતે મયા ।
ન તથા મે વિભૂતીનાં સૃજતઃ અણ્ડાનિ કોટિશઃ ॥ ૩૯॥

તેજઃ શ્રીઃ કીર્તિઃ ઐશ્વર્યં હ્રીઃ ત્યાગઃ સૌભગં ભગઃ ।
વીર્યં તિતિક્ષા વિજ્ઞાનં યત્ર યત્ર સ મે અંશકઃ ॥ ૪૦॥

એતાઃ તે કીર્તિતાઃ સર્વાઃ સંક્ષેપેણ વિભૂતયઃ ।
મનોવિકારાઃ એવ એતે યથા વાચા અભિધીયતે ॥ ૪૧॥

વાચં યચ્છ મનઃ યચ્છ પ્રાણાનિ યચ્છ ઇન્દ્રિયાણિ ચ ।
આત્માનમ્ આત્મના યચ્છ ન ભૂયઃ કલ્પસે અધ્વને ॥ ૪૨॥

યઃ વૈ વાક્ મનસિ સમ્યક્ અસંયચ્છન્ ધિયા યતિઃ ।
તસ્ય વ્રતં તપઃ દાનં સ્રવત્યામઘટામ્બુવત્ ॥ ૪૩॥

તસ્માત્ મનઃ વચઃ પ્રાણાન્ નિયચ્છેત્ મત્ પરાયણઃ ।
મત્ ભક્તિ યુક્તયા બુદ્ધ્યા તતઃ પરિસમાપ્યતે ॥ ૪૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
વિભૂતિયોગો નામ ષોડશોઽધ્યાયઃ ॥ ૧૬॥

અથ સપ્તદશોઽધ્યાયઃ ।
ઉદ્ધવઃ ઉવાચ ।
યઃ ત્વયા અભિતઃ પૂર્વં ધર્મઃ ત્વત્ ભક્તિલક્ષણઃ ।
વર્ણાશ્રમ આચારવતાં સર્વેષાં દ્વિપદામ્ અપિ ॥ ૧॥

યથા અનુષ્ઠીયમાનેન ત્વયિ ભક્તિઃ નૃણાં ભવેત્ ।
સ્વધર્મેણ અરવિન્દાક્ષ તત્ સમાખ્યાતુમ્ અર્હસિ ॥ ૨॥

પુરા કિલ મહાબાહો ધર્મં પરમકં પ્રભો ।
યત્ તેન હંસરૂપેણ બ્રહ્મણે અભ્યાત્થ માધવ ॥ ૩॥

સઃ ઇદાનીં સુમહતા કાલેન અમિત્રકર્શન ।
ન પ્રાયઃ ભવિતા મર્ત્યલોકે પ્રાક્ અનુશાસિતઃ ॥ ૪॥

વક્તા કર્તા અવિતા ન અન્યઃ ધર્મસ્ય અચ્યુત તે ભુવિ ।
સભાયામ્ અપિ વૈરિઞ્ચ્યાં યત્ર મૂર્તિધરાઃ કલાઃ ॥ ૫॥

કર્ત્રા અવિત્રા પ્રવક્ત્રા ચ ભવતા મધુસૂદન ।
ત્યક્તે મહીતલે દેવ વિનષ્ટં કઃ પ્રવક્ષ્યતિ ॥ ૬॥

તત્ત્વં નઃ સર્વધર્મજ્ઞ ધર્મઃ ત્વત્ ભક્તિલક્ષણઃ ।
યથા યસ્ય વિધીયેત તથા વર્ણય મે પ્રભો ॥ ૭॥

શ્રીશુકઃ ઉવાચ ।
ઇત્થં સ્વભૃત્યમુખ્યેન પૃષ્ટઃ સઃ ભગવાન્ હરિઃ ।
પ્રીતઃ ક્ષેમાય મર્ત્યાનાં ધર્માન્ આહ સનાતનાન્ ॥ ૮॥

શ્રીભગવાન્ ઉવાચ ।
ધર્મ્યઃ એષ તવ પ્રશ્નઃ નૈઃશ્રેયસકરઃ નૃણામ્ ।
વર્ણાશ્રમ આચારવતાં તમ્ ઉદ્ધવ નિબોધ મે ॥ ૯॥

આદૌ કૃતયુગે વર્ણઃ નૃણાં હંસઃ ઇતિ સ્મૃતઃ ।
કૃતકૃત્યાઃ પ્રજાઃ જાત્યાઃ તસ્માત્ કૃતયુગં વિદુઃ ॥ ૧૦॥

વેદઃ પ્રણવઃ એવ અગ્રે ધર્મઃ અહં વૃષરૂપધૃક્ ।
ઉપાસતે તપોનિષ્ઠાં હંસં માં મુક્તકિલ્બિષાઃ ॥ ૧૧॥

ત્રેતામુખે મહાભાગ પ્રાણાત્ મે હૃદયાત્ ત્રયી ।
વિદ્યા પ્રાદુઃ અભૂત્ તસ્યાઃ અહમ્ આસં ત્રિવૃન્મખઃ ॥ ૧૨॥

વિપ્ર ક્ષત્રિય વિટ્ શૂદ્રાઃ મુખ બાહુ ઉરુ પાદજાઃ ।
વૈરાજાત્ પુરુષાત્ જાતાઃ યઃ આત્માચારલક્ષણાઃ ॥ ૧૩॥

ગૃહાશ્રમઃ જઘનતઃ બ્રહ્મચર્યં હૃદઃ મમ ।
વક્ષઃસ્થાનાત્ વને વાસઃ ન્યાસઃ શીર્ષણિ સંસ્થિતઃ ॥ ૧૪॥

વર્ણાનામ્ આશ્રમાણાં ચ જન્મભૂમિ અનુસારિણીઃ ।
આસન્ પ્રકૃતયઃ નૃણાં નીચૈઃ નીચ ઉત્તમ ઉત્તમાઃ ॥ ૧૫॥

શમઃ દમઃ તપઃ શૌચં સન્તોષઃ ક્ષાન્તિઃ આર્જવમ્ ।
મદ્ભક્તિઃ ચ દયા સત્યં બ્રહ્મપ્રકૃતયઃ તુ ઇમાઃ ॥ ૧૬॥

તેજઃ બલં ધૃતિઃ શૌર્યં તિતિક્ષા ઔદાર્યમ્ ઉદ્યમઃ ।
સ્થૈર્યં બ્રહ્મણિ અત ઐશ્વર્યં ક્ષત્રપ્રકૃતયઃ તુ ઇમાઃ ॥

૧૭॥

આસ્તિક્યં દાનનિષ્ઠા ચ અદમ્ભઃ બ્રહ્મસેવનમ્ ।
અતુષ્ટિઃ અર્થ ઉપચયૈઃ વૈશ્યપ્રકૃતયઃ તુ ઇમાઃ ॥ ૧૮॥

શુશ્રૂષણં દ્વિજગવાં દેવાનાં ચ અપિ અમાયયા ।
તત્ર લબ્ધેન સન્તોષઃ શૂદ્રપ્રકૃતયઃ તુ ઇમાઃ ॥ ૧૯॥

અશૌચમ્ અનૃતં સ્તેયં નાસ્તિક્યં શુષ્કવિગ્રહઃ ।
કામઃ ક્રોધઃ ચ તર્ષઃ ચ સ્વભાવઃ અન્તેવસાયિનામ્ ॥ ૨૦॥

અહિંસા સત્યમ્ અસ્તેયમ્ અકામક્રોધલોભતા ।
ભૂતપ્રિયહિતેહા ચ ધર્મઃ અયં સાર્વવર્ણિકઃ ॥ ૨૧॥

દ્વિતીયં પ્રાપ્ય અનુપૂર્વ્યાત્ જન્મ ઉપનયનં દ્વિજઃ ।
વસન્ ગુરુકુલે દાન્તઃ બ્રહ્મ અધીયીત ચ આહુતઃ ॥ ૨૨॥

મેખલા અજિન દણ્ડ અક્ષ બ્રહ્મસૂત્ર કમણ્ડલૂન્ ।
જટિલઃ અધૌતદદ્વાસઃ અરક્તપીઠઃ કુશાન્ દધત્ ॥ ૨૩॥

સ્નાન ભોજન હોમેષુ જપ ઉચ્ચારે ચ વાગ્યતઃ ।
ન ચ્છિન્દ્યાત્ નખ રોમાણિ કક્ષ ઉપસ્થગતાનિ અપિ ॥ ૨૪॥

રેતઃ ન અવકિરેત્ જાતુ બ્રહ્મવ્રતધરઃ સ્વયમ્ ।
અવકીર્ણે અવગાહ્ય અપ્સુ યતાસુઃ ત્રિપદીં જપેત્ ॥ ૨૫॥

અગ્નિ અર્ક આચાર્ય ગો વિપ્ર ગુરુ વૃદ્ધ સુરાન્ શુચિઃ ।
સમાહિતઃ ઉપાસીત સન્ધ્યે ચ યતવાક્ જપન્ ॥ ૨૬॥

આચાર્યં માં વિજાનીયાત્ ન અવમન્યેત કર્હિચિત્ ।
ન મર્ત્યબુદ્ધિ આસૂયેત સર્વદેવમયઃ ગુરુઃ ॥ ૨૭॥

સાયં પ્રાતઃ ઉપાનીય ભૈક્ષ્યં તસ્મૈ નિવેદયેત્ ।
યત્ ચ અન્યત્ અપિ અનુજ્ઞાતમ્ ઉપયુઞ્જીત સંયતઃ ॥ ૨૮॥

શુશ્રૂષમાણઃ આચાર્યં સદા ઉપાસીત નીચવત્ ।
યાન શય્યા આસન સ્થાનૈઃ ન અતિદૂરે કૃતાઞ્જલિઃ ॥ ૨૯॥

એવંવૃત્તઃ ગુરુકુલે વસેત્ ભોગવિવર્જિતઃ ।
વિદ્યા સમાપ્યતે યાવત્ બિભ્રત્ વ્રતમ્ અખણ્ડિતમ્ ॥ ૩૦॥

યદિ અસૌ છન્દસાં લોકમ્ આરોક્ષ્યન્ બ્રહ્મવિષ્ટપમ્ ।
ગુરવે વિન્યસેત્ દેહં સ્વાધ્યાયાર્થં વૃહત્ વ્રતઃ ॥ ૩૧॥

અગ્નૌ ગુરૌ આત્મનિ ચ સર્વભૂતેષુ માં પરમ્ ।
અપૃથક્ ધીઃ ઉપાસીત બ્રહ્મવર્ચસ્વી અકલ્મષઃ ॥ ૩૨॥

સ્ત્રીણાં નિરીક્ષણ સ્પર્શ સંલાપ ક્ષ્વેલન આદિકમ્ ।
પ્રાણિનઃ મિથુનીભૂતાન્ અગૃહસ્થઃ અગ્રતઃ ત્યજેત્ ॥ ૩૩॥

શૌચમ્ આચમનં સ્નાનં સન્ધ્યા ઉપાસનમ્ આર્જવમ્ ।
તીર્થસેવા જપઃ અસ્પૃશ્ય અભક્ષ્ય અસંભાષ્ય વર્જનમ્ ॥

૩૪॥

સર્વ આશ્રમ પ્રયુક્તઃ અયં નિયમઃ કુલનન્દન।
મદ્ભાવઃ સર્બભૂતેષુ મનોવાક્કાય સંયમઃ ॥ ૩૫॥

એવં બૃહત્ વ્રતધરઃ બ્રાહ્મણઃ અગ્નિઃ ઇવ જ્વલન્ ।
મદ્ભક્તઃ તીવ્રતપસા દગ્ધકર્મ આશયઃ અમલઃ ॥ ૩૬॥

અથ અનન્તરમ્ આવેક્ષ્યન્ યથા જિજ્ઞાસિત આગમઃ ।
ગુરવે દક્ષિણાં દત્ત્વા સ્નાયત્ ગુરુ અનુમોદિતઃ ॥ ૩૭॥

ગૃહં વનં વા ઉપવિશેત્ પ્રવ્રજેત્ વા દ્વિજ ઉત્તમઃ ।
આશ્રમાત્ આશ્રમં ગચ્છેત્ ન અન્યથા મત્પરઃ ચરેત્ ॥ ૩૮॥

ગૃહાર્થી સદૃશીં ભાર્યામ્ ઉદ્વહેત્ અજુગુપ્સિતામ્ ।
યવીયસીં તુ વયસા યાં સવર્ણામ્ અનુક્રમાત્ ॥ ૩૯॥

ઇજ્ય અધ્યયન દાનાનિ સર્વેષાં ચ દ્વિજન્મનામ્ ।
પ્રતિગ્રહઃ અધ્યાપનં ચ બ્રાહ્મણસ્ય એવ યાજનમ્ ॥ ૪૦॥

પ્રતિગ્રહં મન્યમાનઃ તપઃ તેજોયશોનુદમ્ ।
અન્યાભ્યામ્ એવ જીવેત શિલૈઃ વા દોષદૃક્ તયોઃ ॥ ૪૧॥

બ્રાહ્મણસ્ય હિ દેહઃ અયં ક્ષુદ્રકામાય ન ઇષ્યતે ।
કૃચ્છ્રાય તપસે ચ ઇહ પ્રેત્ય અનન્તસુખાય ચ ॥ ૪૨॥

શિલોઞ્છવૃત્ત્યા પરિતુષ્ટચિત્તઃ
    ધર્મં મહાન્તં વિરજં જુષાણઃ ।
મયિ અર્પિતાત્મા ગૃહઃ એવ તિષ્ઠન્
    ન અતિપ્રસક્તઃ સમુપૈતિ શાન્તિમ્ ॥ ૪૩॥

સમુદ્ધરન્તિ યે વિપ્રં સીદન્તં મત્પરાયણમ્ ।
તાન્ ઉદ્ધરિષ્યે ન ચિરાત્ આપદ્ભ્યઃ નૌઃ ઇવ અર્ણવાત્ ॥ ૪૪॥

સર્વાઃ સમુદ્ધરેત્ રાજા પિતા ઇવ વ્યસનાત્ પ્રજાઃ ।
આત્માનમ્ આત્મના ધીરઃ યથા ગજપતિઃ ગજાન્ ॥ ૪૫॥

એવંવિધઃ નરપતિઃ વિમાનેન અર્કવર્ચસા ।
વિધૂય ઇહ અશુભં કૃત્સ્નમ્ ઇન્દ્રેણ સહ મોદતે ॥ ૪૬॥

સીદન્ વિપ્રઃ વણિક્ વૃત્ત્યા પણ્યૈઃ એવ આપદં તરેત્ ।
ખડ્ગેન વા આપદાક્રાન્તઃ ન શ્વવૃત્ત્યા કથઞ્ચન ॥ ૪૭॥

વૈશ્યવૃત્ત્યા તુ રાજન્ યઃ જીવેત્ મૃગયયા આપદિ ।
ચરેત્ વા વિપ્રરૂપેણ ન શ્વવૃત્ત્યા કથઞ્ચન ॥ ૪૮॥

શૂદ્રવૃત્તિં ભજેત્ વૈશ્યઃ શૂદ્રઃ કારુકટપ્રિયામ્ ।
કૃચ્છ્રાત્ મુક્તઃ ન ગર્હ્યેણ વૃત્તિં લિપ્સેત કર્મણા ॥ ૪૯॥

વેદ અધ્યાય સ્વધા સ્વાહા બલિ અન્ન આદ્યૈઃ યથા ઉદયમ્ ।
દેવર્ષિ પિતૃભૂતાનિ મદ્રૂપાણિ અન્વહં યજેત્ ॥ ૫૦॥

યદૃચ્છયા ઉપપન્નેન શુક્લેન ઉપાર્જિતેન વા ।
ધનેન અપીડયન્ ભૃત્યાન્ ન્યાયેન એવ આહરેત્ ક્રતૂન્ ॥ ૫૧॥

કુટુંબેષુ ન સજ્જેત ન પ્રમાદ્યેત્ કુટુંબિ અપિ ।
વિપશ્ચિત્ નશ્વરં પશ્યેત્ અદૃષ્ટમ્ અપિ દૃષ્ટવત્ ॥ ૫૨॥

પુત્ર દારા આપ્ત બન્ધૂનાં સઙ્ગમઃ પાન્થસઙ્ગમઃ ।
અનુદેહં વિયન્તિ એતે સ્વપ્નઃ નિદ્રાનુગઃ યથા ॥ ૫૩॥

ઇત્થં પરિમૃશન્ મુક્તઃ ગૃહેષુ અતિથિવત્ વસન્ ।
ન ગૃહૈઃ અનુબધ્યેત નિર્મમઃ નિરહઙ્કૃતઃ ॥ ૫૪॥

કર્મભિઃ ગૃહમ્ એધીયૈઃ ઇષ્ટ્વા મામ્ એવ ભક્તિમાન્ ।
તિષ્ઠેત્ વનં વા ઉપવિશેત્ પ્રજાવાન્ વા પરિવ્રજેત્ ॥ ૫૫॥

યઃ તુ આસક્તમ્ અતિઃ ગેહે પુત્ર વિત્તૈષણ આતુરઃ ।
સ્ત્રૈણઃ કૃપણધીઃ મૂઢઃ મમ અહમ્ ઇતિ બધ્યતે ॥ ૫૬॥

અહો મે પિતરૌ વૃદ્ધૌ ભાર્યા બાલાત્મજા આત્મજાઃ ।
અનાથાઃ મામ્ ઋતે દીનાઃ કથં જીવન્તિ દુઃખિતાઃ ॥ ૫૭॥

એવં ગૃહ આશય આક્ષિપ્ત હૃદયઃ મૂઢધીઃ અયમ્ ।
અતૃપ્તઃ તાન્ અનુધ્યાયન્ મૃતઃ અન્ધં વિશતે તમઃ ॥ ૫૮॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
બ્રહ્મચર્યગૃહસ્થકર્મધર્મનિરૂપણે સપ્તદશોઽધ્યાયઃ ॥

૧૭॥

અથ અષ્ટાદશોઽધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
વનં વિવિક્ષુઃ પુત્રેષુ ભાર્યાં ન્યસ્ય સહ એવ વા ।
વનઃ એવ વસેત્ શાન્તઃ તૃતીયં ભાગમ્ આયુષઃ ॥ ૧॥

કન્દમૂલફલૈઃ વન્યૈઃ મેધ્યૈઃ વૃત્તિં પ્રકલ્પયેત્ ।
વસીત વલ્કલં વાસઃ તૃણપર્ણ અજિનાનિ ચ ॥ ૨॥

કેશરોમનખશ્મશ્રુમલાનિ બિભૃયાત્ અતઃ ।
ન ધાવેત્ અપ્સુ મજ્જેત ત્રિકાલં સ્થણ્ડિલેશયઃ ॥ ૩॥

ગ્રીષ્મે તપ્યેત પઞ્ચાગ્નીન્ વર્ષાસ્વાસારષાડ્ જલે ।
આકણ્ઠમગ્નઃ શિશિરઃ એવંવૃત્તઃ તપશ્ચરેત્ ॥ ૪॥

અગ્નિપક્વં સમશ્નીયાત્ કાલપક્વમ્ અથ અપિ વા ।
ઉલૂખલ અશ્મકુટ્ટઃ વા દન્ત ઉલૂખલઃ એવ વા ॥ ૫॥

સ્વયં સઞ્ચિનુયાત્ સર્વમ્ આત્મનઃ વૃત્તિકારણમ્ ।
દેશકાલબલ અભિજ્ઞઃ ન આદદીત અન્યદા આહૃતમ્ ॥ ૬॥

વન્યૈઃ ચરુપુરોડાશૈઃ નિર્વપેત્ કાલચોદિતાન્ ।
ન તુ શ્રૌતેન પશુના માં યજેત વનાશ્રમી ॥ ૭॥

અગ્નિહોત્રં ચ દર્શઃ ચ પૂર્ણમાસઃ ચ પૂર્વવત્ ।
ચાતુર્માસ્યાનિ ચ મુનેઃ આમ્નાતાનિ ચ નૈગમૈઃ ॥ ૮॥

એવં ચીર્ણેન તપસા મુનિઃ ધમનિસન્તતઃ ।
માં તપોમયમ્ આરાધ્ય ઋષિલોકાત્ ઉપૈતિ મામ્ ॥ ૯॥

યઃ તુ એતત્ કૃચ્છ્રતઃ ચીર્ણં તપઃ નિઃશ્રેયસં મહત્ ।
કામાય અલ્પીયસે યુઞ્જ્યાત્ વાલિશઃ કઃ અપરઃ તતઃ ॥ ૧૦॥

યદા અસૌ નિયમે અકલ્પઃ જરયા જાતવેપથુઃ ।
આત્મનિ અગ્નીન્ સમારોપ્ય મચ્ચિત્તઃ અગ્નિં સમાવિશેત્ ॥ ૧૧॥

યદા કર્મવિપાકેષુ લોકેષુ નિરય આત્મસુ ।
વિરાગઃ જાયતે સમ્યક્ ન્યસ્ત અગ્નિઃ પ્રવ્રજેત્ તતઃ ॥ ૧૨॥

ઇષ્ટ્વા યથા ઉપદેશં માં દત્ત્વા સર્વસ્વમ્ ઋત્વિજે ।
અગ્નીન્ સ્વપ્રાણઃ આવેશ્ય નિરપેક્ષઃ પરિવ્રજેત્ ॥ ૧૩॥

વિપ્રસ્ય વૈ સંન્યસતઃ દેવાઃ દારાદિરૂપિણઃ ।
વિઘ્નાન્ કુર્વન્તિ અયં હિ અસ્માન્ આક્રમ્ય સમિયાત્ પરમ્ ॥ ૧૪॥

બિભૃયાત્ ચેત્ મુનિઃ વાસઃ કૌપીન આચ્છાદનં પરમ્ ।
ત્યક્તં ન દણ્ડપાત્રાભ્યામ્ અન્યત્ કિઞ્ચિત્ અનાપદિ ॥ ૧૫॥

દૃષ્ટિપૂતં ન્યસેત્ પાદં વસ્ત્રપૂતં પિબેત્ જલમ્ ।
સત્યપૂતાં વદેત્ વાચં મનઃપૂતં સમાચરેત્ ॥ ૧૬॥

મૌન અનીહા અનિલ આયામાઃ દણ્ડાઃ વાક્ દેહ ચેતસામ્ ।
નહિ એતે યસ્ય સન્તિ અઙ્ગઃ વેણુભિઃ ન ભવેત્ યતિઃ ॥ ૧૭॥

ભિક્ષાં ચતુષુ વર્ણેષુ વિગર્હ્યાન્ વર્જયન્ ચરેત્ ।
સપ્તાગારાન્ અસંક્લૃપ્તાન્ તુષ્યેત્ લબ્ધેન તાવતા ॥ ૧૮॥

બહિઃ જલાશયં ગત્વા તત્ર ઉપસ્પૃશ્ય વાગ્યતઃ ।
વિભજ્ય પાવિતં શેષં ભુઞ્જીત અશેષમ્ આહૃતમ્ ॥ ૧૯॥

એકઃ ચરેત્ મહીમ્ એતાં નિઃસઙ્ગઃ સંયતેન્દ્રિયઃ ।
આત્મક્રીડઃ આત્મરતઃ આત્મવાન્ સમદર્શનઃ ॥ ૨૦॥

વિવિક્તક્ષેમશરણઃ મદ્ભાવવિમલાશયઃ ।
આત્માનં ચિન્તયેત્ એકમ્ અભેદેન મયા મુનિઃ ॥ ૨૧॥

અન્વીક્ષેત આત્મનઃ બન્ધં મોક્ષં ચ જ્ઞાનનિષ્ઠયા ।
બન્ધઃ ઇન્દ્રિયવિક્ષેપઃ મોક્ષઃ એષાં ચ સંયમઃ ॥ ૨૨॥

તસ્માત્ નિયમ્ય ષડ્વર્ગં મદ્ભાવેન ચરેત્ મુનિઃ ।
વિરક્તઃ ક્ષુલ્લકામેભ્યઃ લબ્ધ્વા આત્મનિ સુખં મહત્ ॥ ૨૩॥

પુરગ્રામવ્રજાન્ સાર્થાન્ ભિક્ષાર્થં પ્રવિશન્ ચરેત્ ।
પુણ્યદેશસરિત્ શૈલવન આશ્રમવતીં મહીમ્ ॥ ૨૪॥

વાનપ્રસ્થ આશ્રમ પદેષુ અભીક્ષ્ણં ભૈક્ષ્યમ્ આચરેત્ ।
સંસિધ્યત્યાશ્વસંમોહઃ શુદ્ધસત્ત્વઃ શિલાન્ધસા ॥ ૨૫॥

ન એતત્ વસ્તુતયા પશ્યેત્ દૃશ્યમાનં વિનશ્યતિ ।
અસક્તચિત્તઃ વિરમેત્ ઇહ અમુત્ર ચિકીર્ષિતાત્ ॥ ૨૬॥

યત્ એતત્ આત્મનિ જગત્ મનોવાક્પ્રાણસંહતમ્ ।
સર્વં માયા ઇતિ તર્કેણ સ્વસ્થઃ ત્યક્ત્વા ન તત્ સ્મરેત્ ॥ ૨૭॥

જ્ઞાનનિષ્ઠઃ વિરક્તઃ વા મદ્ભક્તઃ વા અનપેક્ષકઃ ।
સલિઙ્ગાન્ આશ્રમાં ત્યક્ત્વા ચરેત્ અવિધિગોચરઃ ॥ ૨૮॥

બુધઃ બાલકવત્ ક્રીડેત્ કુશલઃ જડવત્ ચરેત્ ।
વદેત્ ઉન્મત્તવત્ વિદ્વાન્ ગોચર્યાં નૈગમઃ ચરેત્ ॥ ૨૯॥

વેદવાદરતઃ ન સ્યાત્ ન પાખણ્ડી ન હૈતુકઃ ।
શુષ્કવાદવિવાદે ન કઞ્ચિત્ પક્ષં સમાશ્રયેત્ ॥ ૩૦॥

ન ઉદ્વિજેત જનાત્ ધીરઃ જનં ચ ઉદ્વેજયેત્ ન તુ ।
અતિવાદાન્ તિતિક્ષેત ન અવમન્યેત કઞ્ચન ।
દેહમ્ ઉદ્દિશ્ય પશુવત્ વૈરં કુર્યાત્ ન કેનચિત્ ॥ ૩૧॥

એકઃ એવ પરઃ હિ આત્મા ભૂતેષુ આત્મનિ અવસ્થિતઃ ।
યથા ઇન્દુઃ ઉદપાત્રેષુ ભૂતાનિ એકાત્મકાનિ ચ ॥ ૩૨॥

અલબ્ધ્વા ન વિષીદેત કાલે કાલે અશનં ક્વચિત્ ।
લબ્ધ્વા ન હૃષ્યેત્ ધૃતિમ્ આનુભયં દૈવતન્ત્રિતમ્ ॥ ૩૩॥

આહારાર્થં સમીહેત યુક્તં તત્ પ્રાણધારણમ્ ।
તત્ત્વં વિમૃશ્યતે તેન તત્ વિજ્ઞાય વિમુચ્યતે ॥ ૩૪॥

યત્ ઋચ્છયા ઉપપન્નાત્ અન્નમ્ અદ્યાત્ શ્રેષ્ઠમ્ ઉત અપરમ્ ।
તથા વાસઃ તથા શય્યાં પ્રાપ્તં પ્રાપ્તં ભજેત્ મુનિઃ ॥ ૩૫ ॥

શૌચમ્ આચમનં સ્નાનં ન તુ ચોદનયા ચરેત્ ।
અન્યાન્ ચ નિયમાન્ જ્ઞાની યથા અહં લીલયા ઈશ્વરઃ ॥ ૩૬ ॥

નહિ તસ્ય વિકલ્પાખ્યા યા ચ મદ્વીક્ષયા હતા ।
આદેહાન્તાત્ ક્વચિત્ ખ્યાતિઃ તતઃ સમ્પદ્યતે મયા ॥ ૩૭ ॥

દુઃખ ઉદર્કેષુ કામેષુ જાતનિર્વેદઃ આત્મવાન્ ।
અજિજ્ઞાસિત મદ્ધર્મઃ ગુરું મુનિમ્ ઉપાવ્રજેત્ ॥ ૩૮ ॥

તાવત્ પરિચરેત્ ભક્તઃ શ્રદ્ધાવાન્ અનસૂયકઃ ।
યાવત્ બ્રહ્મ વિજાનીયાત્ મામ્ એવ ગુરુમ્ આદૃતઃ ॥ ૩૯ ॥

યઃ તુ અસંયત ષડ્વર્ગઃ પ્રચણ્ડ ઇન્દ્રિય સારથિઃ ।
જ્ઞાન વૈરાગ્ય રહિતઃ ત્રિદણ્ડમ્ ઉપજીવતિ ॥ ૪૦ ॥

સુરાન્ આત્માનમ્ આત્મસ્થં નિહ્નુતે માં ચ ધર્મહા ।
અવિપક્વ કષાયઃ અસ્માત્ ઉષ્માત્ ચ વિહીયતે ॥ ૪૧ ॥

ભિક્ષોઃ ધર્મઃ શમઃ અહિંસા તપઃ ઈક્ષા વનૌકસઃ ।
ગૃહિણઃ ભૂતરક્ષ ઇજ્યાઃ દ્વિજસ્ય આચાર્યસેવનમ્ ॥ ૪૨ ॥

બ્રહ્મચર્યં તપઃ શૌચં સન્તોષઃ ભૂતસૌહૃદમ્ ।
ગૃહસ્થસ્ય અપિ ઋતૌ ગન્તુઃ સર્વેષાં મદુપાસનમ્ ॥ ૪૩ ॥

ઇતિ માં યઃ સ્વધર્મેણ ભજન્ નિત્યમ્ અનન્યભાક્ ।
સર્વભૂતેષુ મદ્ભાવઃ મદ્ભક્તિં વિન્દતે અચિરાત્ ॥ ૪૪ ॥

ભક્ત્યા ઉદ્ધવ અનપાયિન્યા સર્વલોકમહેશ્વરમ્ ।
સર્વ ઉત્પત્તિ અપિ અયં બ્રહ્મ કારણં મા ઉપયાતિ સઃ ॥ ૪૫ ॥

ઇતિ સ્વધર્મ નિર્ણિક્ત સત્ત્વઃ નિર્જ્ઞાત્ મદ્ગતિઃ ।
જ્ઞાન વિજ્ઞાન સમ્પન્નઃ ન ચિરાત્ સમુપૈતિ મામ્ ॥ ૪૬ ॥

વર્ણાશ્રમવતાં ધર્મઃ એષઃ આચારલક્ષણઃ ।
સઃ એવ મદ્ભક્તિયુતઃ નિઃશ્રેયસકરઃ પરઃ ॥ ૪૭ ॥

એતત્ તે અભિહિતં સાધો ભવાન્ પૃચ્છતિ યત્ ચ મામ્ ।
યથા સ્વધર્મસંયુક્તઃ ભક્તઃ માં સમિયાત્ પરમ્ ॥ ૪૮ ॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
વાનપ્રસ્થસંન્યાસધર્મનિરૂપણં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૧૮॥

અથ એકોનવિંશઃ અધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
યઃ વિદ્યાશ્રુતસમ્પન્નઃ આત્મવાન્ ન અનુમાનિકઃ ।
માયામાત્રમ્ ઇદં જ્ઞાત્વા જ્ઞાનં ચ મયિ સંન્યસેત્ ॥ ૧॥

જ્ઞાનિનઃ તુ અહમ્ એવ ઇષ્ટઃ સ્વાર્થઃ હેતુઃ ચ સંમતઃ ।
સ્વર્ગઃ ચ એવ અપવર્ગઃ ચ ન અન્યઃ અર્થઃ મદૃતે પ્રિયઃ ॥ ૨॥

જ્ઞાનવિજ્ઞાનસંસિદ્ધાઃ પદં શ્રેષ્ઠં વિદુઃ મમ ।
જ્ઞાની પ્રિયતમઃ અતઃ મે જ્ઞાનેન અસૌ બિભર્તિ મામ્ ॥ ૩॥

તપઃ તીર્થં જપઃ દાનં પવિત્રાણિ ઇતરાણિ ચ ।
ન અલં કુર્વન્તિ તાં સિદ્ધિં યા જ્ઞાનકલયા કૃતા ॥ ૪॥

તસ્માત્ જ્ઞાનેન સહિતં જ્ઞાત્વા સ્વાત્માનમ્ ઉદ્ધવ ।
જ્ઞાનવિજ્ઞાનસમ્પન્નઃ ભજ માં ભક્તિભાવતઃ ॥ ૫॥

જ્ઞાનવિજ્ઞાનયજ્ઞેન મામ્ ઇષ્ટ્વા આત્માનમ્ આત્મનિ ।
સર્વયજ્ઞપતિં માં વૈ સંસિદ્ધિં મુનયઃ અગમન્॥ ૬॥

ત્વયિ ઉદ્ધવ આશ્રયતિ યઃ ત્રિવિધઃ વિકારઃ
    માયાન્તરા આપતતિ ન આદિ અપવર્ગયોઃ યત્ ।
જન્માદયઃ અસ્ય યત્ અમી તવ તસ્ય કિં સ્યુઃ
    આદિ અન્તયોઃ યત્ અસતઃ અસ્તિ તત્ એવ મધ્યે ॥ ૭॥

ઉદ્ધવઃ ઉવાચ ।
જ્ઞાનં વિશુદ્ધં વિપુલં યથા એતત્
    વૈરાગ્યવિજ્ઞાનયુતં પુરાણમ્ ।
આખ્યાહિ વિશ્વેશ્વર વિશ્વમૂર્તે
    ત્વત્ ભક્તિયોગં ચ મહત્ વિમૃગ્યમ્ ॥ ૮॥

તાપત્રયેણ અભિહતસ્ય ઘોરે
    સન્તપ્યમાનસ્ય ભવાધ્વનીશ ।

પશ્યામિ ન અન્યત્ શરણં તવાઙ્ઘ્રિ
    દ્વન્દ્વ આતપત્રાત્ અમૃત અભિવર્ષાત્ ॥ ૯॥

દષ્ટં જનં સમ્પતિતં બિલે અસ્મિન્
    કાલાહિના ક્ષુદ્રસુખોઃ ઉતર્ષમ્ ।
સમુદ્ધર એનં કૃપયા અપવર્ગ્યૈઃ
    વચોભિઃ આસિઞ્ચ મહાનુભાવ ॥ ૧૦॥

શ્રીભગવાન્ ઉવાચ ।
ઇત્થમ્ એતત્ પુરા રાજા ભીષ્મં ધર્મભૃતાં વરમ્ ।
અજાતશત્રુઃ પપ્રચ્છ સર્વેષાં નઃ અનુશ્રુણ્વતામ્ ॥ ૧૧॥

નિવૃત્તે ભારતે યુદ્ધે સુહૃત્ નિધનવિહ્વલઃ ।
શ્રુત્વા ધર્માન્ બહૂન્ પશ્ચાત્ મોક્ષધર્માન્ અપૃચ્છત ॥

૧૨॥

તાન્ અહં તે અભિધાસ્યામિ દેવવ્રતમુખાત્ શ્રુતાન્ ।
જ્ઞાનવૈરાગ્યવિજ્ઞાનશ્રદ્ધાભક્તિ ઉપબૃંહિતાન્ ॥ ૧૩॥

નવ એકાદશ પઞ્ચ ત્રીન્ ભાવાન્ ભૂતેષુ યેન વૈ ।
ઈક્ષેત અથ એકમ્ અપિ એષુ તત્ જ્ઞાનં મમ નિશ્ચિતમ્ ॥ ૧૪॥

એતત્ એવ હિ વિજ્ઞાનં ન તથા એકેન યેન યત્ ।
સ્થિતિ ઉત્પત્તિ અપિ અયાન્ પશ્યેત્ ભાવાનાં ત્રિગુણ આત્મનામ્ ॥

૧૫॥

આદૌ અન્તે ચ મધ્યે ચ સૃજ્યાત્ સૃજ્યં યત્ અન્વિયાત્ ।
પુનઃ તત્ પ્રતિસઙ્ક્રામે યત્ શિષ્યેત તત્ એવ સત્ ॥ ૧૬॥

શ્રુતિઃ પ્રત્યક્ષમ્ ઐતિહ્યમ્ અનુમાનં ચતુષ્ટયમ્ ।
પ્રમાણેષુ અનવસ્થાનાત્ વિકલ્પાત્ સઃ વિરજ્યતે ॥ ૧૭॥

કર્મણાં પરિણામિત્વાત્ આવિરિઞ્ચ્યાત્ અમઙ્ગલમ્ ।
વિપશ્ચિત્ નશ્વરં પશ્યેત્ અદૃષ્ટમ્ અપિ દૃષ્ટવત્ ॥ ૧૮॥

ભક્તિયોગઃ પુરા એવ ઉક્તઃ પ્રીયમાણાય તે અનઘ ।
પુનઃ ચ કથયિષ્યામિ મદ્ભક્તેઃ કારણં પરમ્ ॥ ૧૯॥

શ્રદ્ધા અમૃતકથાયાં મે શશ્વત્ મત્ અનુકીર્તનમ્ ।

પરિનિષ્ઠા ચ પૂજાયાં સ્તુતિભિઃ સ્તવનં મમ ॥ ૨૦॥

આદરઃ પરિચર્યાયાં સર્વાઙ્ગૈઃ અભિવન્દનમ્ ।
મદ્ભક્તપૂજાભ્યધિકા સર્વભૂતેષુ મન્મતિઃ ॥ ૨૧॥

મદર્થેષુ અઙ્ગચેષ્ટા ચ વચસા મદ્ગુણેરણમ્ ।
મય્યર્પણં ચ મનસઃ સર્વકામવિવર્જનમ્ ॥ ૨૨॥

મદર્થે અર્થ પરિત્યાગઃ ભોગસ્ય ચ સુખસ્ય ચ ।
ઇષ્ટં દત્તં હુતં જપ્તં મદર્થં યત્ વ્રતં તપઃ ॥ ૨૩॥

એવં ધર્મૈઃ મનુષ્યાણામ્ ઉદ્ધવ આત્મનિવેદિનામ્ ।
મયિ સઞ્જાયતે ભક્તિઃ કઃ અન્યઃ અર્થઃ અસ્ય અવશિષ્યતે ॥ ૨૪॥

યદા આત્મનિ અર્પિતં ચિત્તં શાન્તં સત્ત્વ ઉપબૃંહિતમ્ ।
ધર્મં જ્ઞાનં સવૈરાગ્યમ્ ઐશ્વર્યં ચ અભિપદ્યતે ॥ ૨૫॥

યત્ અર્પિતં તત્ વિકલ્પે ઇન્દ્રિયૈઃ પરિધાવતિ ।
રજસ્વલં ચ આસન્ નિષ્ઠં ચિત્તં વિદ્ધિ વિપર્યયમ્ ॥ ૨૬॥

ધર્મઃ મદ્ભક્તિકૃત્ પ્રોક્તઃ જ્ઞાનં ચ એકાત્મ્યદર્શનમ્ ।
ગુણેષુ અસઙ્ગઃ વૈરાગ્યમ્ ઐશ્વર્યં ચ અણિમ્ આદયઃ ॥ ૨૭॥

ઉદ્ધવઃ ઉવાચ ।
યમઃ કતિવિધઃ પ્રોક્તઃ નિયમઃ વા અરિકર્શન ।
કઃ શમઃ કઃ દમઃ કૃષ્ણ કા તિતિક્ષા ધૃતિઃ પ્રભો ॥ ૨૮॥

કિં દાનં કિં તપઃ શૌર્યં કિં સત્યમ્ ઋતમ્ ઉચ્યતે ।
કઃ ત્યાગઃ કિં ધનં ચેષ્ટં કઃ યજ્ઞઃ કા ચ દક્ષિણા ॥

૨૯॥

પુંસઃ કિંસ્વિત્ બલં શ્રીમન્ ભગઃ લાભઃ ચ કેશવ ।
કા વિદ્યા હ્રીઃ પરા કા શ્રીઃ કિં સુખં દુઃખમ્ એવ ચ ॥

૩૦॥

કઃ પણ્ડિતઃ કઃ ચ મૂર્ખઃ કઃ પન્થાઃ ઉત્પથઃ ચ કઃ ।
કઃ સ્વર્ગઃ નરકઃ કઃ સ્વિત્ કઃ બન્ધુઃ ઉત કિં ગૃહમ્ ॥ ૩૧॥

કઃ આઢ્યઃ કઃ દરિદ્રઃ વા કૃપણઃ કઃ ઈશ્વરઃ ।

એતાન્ પ્રશ્નાન્ મમ બ્રૂહિ વિપરીતાન્ ચ સત્પતે ॥ ૩૨॥

શ્રીભગવાન્ ઉવાચ ।
અહિંસા સત્યમ્ અસ્તેયમ્ અસઙ્ગઃ હ્રીઃ અસઞ્ચયઃ ।
આસ્તિક્યં બ્રહ્મચર્યં ચ મૌનં સ્થૈર્યં ક્ષમા અભયમ્ ॥

૩૩।
શૌચં જપઃ તપઃ હોમઃ શ્રદ્ધા આતિથ્યં મત્ અર્ચનમ્ ।
તીર્થાટનં પરાર્થેહા તુષ્ટિઃ આચાર્યસેવનમ્ ॥ ૩૪॥

એતે યમાઃ સનિયમાઃ ઉભયોઃ દ્વાદશ સ્મૃતાઃ ।
પુંસામ્ ઉપાસિતાઃ તાત યથાકામં દુહન્તિ હિ ॥ ૩૫॥

શમઃ મત્ નિષ્ઠતા બુદ્ધેઃ દમઃ ઇન્દ્રિયસંયમઃ ।
તિતિક્ષા દુઃખસંમર્ષઃ  જિહ્વા ઉપસ્થજયઃ ધૃતિઃ ॥ ૩૬॥

દણ્ડન્યાસઃ પરં દાનં કામત્યાગઃ તપઃ સ્મૃતમ્ ।
સ્વભાવવિજયઃ શૌર્યં સત્યં ચ સમદર્શનમ્ ॥ ૩૭॥

ઋતં ચ સૂનૃતા વાણી કવિભિઃ પરિકીર્તિતા ।
કર્મસ્વસઙ્ગમઃ શૌચં ત્યાગઃ સંન્યાસઃ ઉચ્યતે ॥ ૩૮॥

ધર્મઃ ઇષ્ટં ધનં નૃણાં યજ્ઞઃ અહં ભગવત્તમઃ ।
દક્ષિણા જ્ઞાનસન્દેશઃ પ્રાણાયામઃ પરં બલમ્ ॥ ૩૯॥

ભગઃ મે ઐશ્વરઃ ભાવઃ લાભઃ મદ્ભક્તિઃ ઉત્તમઃ ।
વિદ્યા આત્મનિ ભિદ અબાધઃ જુગુપ્સા હ્રીઃ અકર્મસુ ॥ ૪૦॥

શ્રીઃ ગુણાઃ નૈરપેક્ષ્ય આદ્યાઃ સુખં દુઃખસુખ અત્યયઃ ।
દુઃખં કામસુખ અપેક્ષા પણ્ડિતઃ બન્ધમોક્ષવિત્ ॥ ૪૧॥

મૂર્ખઃ દેહ આદિ અહં બુદ્ધિઃ પન્થાઃ મત્ નિગમઃ સ્મૃતઃ ।
ઉત્પથઃ ચિત્તવિક્ષેપઃ સ્વર્ગઃ સત્ત્વગુણ ઉઅદયઃ ॥ ૪૨॥

નરકઃ તમઃ ઉન્નહઃ બન્ધુઃ ગુરુઃ અહં સખે ।
ગૃહં શરીરં માનુષ્યં ગુણાઢ્યઃ હિ આઢ્યઃ ઉચ્યતે ॥ ૪૩॥

દરિદ્રઃ યઃ તુ અસન્તુષ્ટઃ કૃપણઃ યઃ અજિતેન્દ્રિયઃ ।
ગુણેષુ અસક્તધીઃ ઈશઃ ગુણસઙ્ગઃ વિપર્યયઃ ॥ ૪૪॥

એતઃ ઉદ્ધવ તે પ્રશ્નાઃ સર્વે સાધુ નિરૂપિતાઃ ।

કિં વર્ણિતેન બહુના લક્ષણં ગુણદોષયોઃ ।
ગુણદોષ દૃશિઃ દોષઃ ગુણઃ તુ ઉભયવર્જિતઃ ॥ ૪૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
એકોનવિંશોઽધ્યાયઃ ॥ ૧૯॥

અથ વિંશઃ અધ્યાયઃ ।
ઉદ્ધવઃ ઉવાચ ।
વિધિઃ ચ પ્રતિષેધઃ ચ નિગમઃ હિ ઈશ્વરસ્ય તે ।
અવેક્ષતે અરવિન્દાક્ષ ગુણં દોષં ચ કર્મણામ્ ॥ ૧॥

વર્ણાશ્રમ વિકલ્પં ચ પ્રતિલોમ અનુલોમજમ્ ।
દ્રવ્ય દેશ વયઃ કાલાન્ સ્વર્ગં નરકમ્ એવ ચ ॥ ૨॥

ગુણ દોષ ભિદા દૃષ્ટિમ્ અન્તરેણ વચઃ તવ ।
નિઃશ્રેયસં કથં નૃણાં નિષેધ વિધિ લક્ષણમ્ ॥ ૩॥

પિતૃદેવમનુષ્યાણાં વેદઃ ચક્ષુઃ તવ ઈશ્વર ।
શ્રેયઃ તુ અનુપલબ્ધે અર્થે સાધ્યસાધનયોઃ અપિ ॥ ૪॥

ગુણદોષભિદાદૃષ્ટિઃ નિગમાત્ તે ન હિ સ્વતઃ ।
નિગમેન અપવાદઃ ચ ભિદાયાઃ ઇતિ હિ ભ્રમઃ ॥ ૫॥

શ્રીભગવાન્ ઉવાચ ।
યોગાઃ ત્રયઃ મયા પ્રોક્તા નૃણાં શ્રેયોવિધિત્સયા ।
જ્ઞાનં કર્મ ચ ભક્તિઃ ચ ન ઉપાયઃ અન્યઃ અસ્તિ કુત્રચિત્ ॥

૬॥

નિર્વિણ્ણાનાં જ્ઞાનયોગઃ ન્યાસિનામ્ ઇહ કર્મસુ ।
તેષુ અનિર્વિણ્ણચિત્તાનાં કર્મયોગઃ તિ કામિનામ્ ॥ ૭॥

યદૃચ્છયા મત્ કથા આદૌ જાતશ્રદ્ધઃ તુ યઃ પુમાન્ ।
ન નિર્વિણ્ણઃ ન અતિસક્તઃ ભક્તિયોગઃ અસ્ય સિદ્ધિદઃ ॥ ૮॥

તાવત્ કર્માણિ કુર્વીત ન નિર્વિદ્યેત યાવતા ।
મત્ કથાશ્રવણ આદૌ વા શ્રદ્ધા યાવત્ ન જાયતે ॥ ૯॥

સ્વધર્મસ્થઃ યજન્યજ્ઞૈઃ અનાશીઃ કામઃ ઉદ્ધવ ।

ન યાતિ સ્વર્ગનરકૌ યદિ અન્યત્ર સમાચરેત્ ॥ ૧૦॥

અસ્મિન્ લોકે વર્તમાનઃ સ્વધર્મસ્થઃ અનઘઃ શુચિઃ ।
જ્ઞાનં વિશુદ્ધમ્ આપ્નોતિ મદ્ભક્તિં વા યદૃચ્છયા ॥ ૧૧॥

સ્વર્ગિણઃ અપિ એતમ્ ઇચ્છન્તિ લોકં નિરયિણઃ તથા ।
સાધકં જ્ઞાનભક્તિભ્યામ્ ઉભયં તત્ અસાધકમ્ ॥ ૧૨॥

ન નરઃ સ્વર્ગતિં કાઙ્ક્ષેત્ નારકીં વા વિચક્ષણઃ ।
ન ઇમં લોકં ચ કાઙ્ક્ષેત દેહ આવેશાત્ પ્રમાદ્યતિ ॥ ૧૩॥

એતત્ વિદ્વાન્ પુરા મૃત્યોઃ અભવાય ઘટેત સઃ ।
અપ્રમત્તઃ ઇદં જ્ઞાત્વા મર્ત્યમ્ અપિ અર્થસિદ્ધિદમ્ ॥ ૧૪॥

છિદ્યમાનં યમૈઃ એતૈઃ કૃતનીડં વનસ્પતિમ્ ।
ખગઃ સ્વકેતમ્ ઉત્સૃજ્ય ક્ષેમં યાતિ હિ અલમ્પટઃ ॥ ૧૫॥

અહોરાત્રૈઃ છિદ્યમાનં બુદ્ધ્વાયુઃ ભયવેપથુઃ ।
મુક્તસઙ્ગઃ પરં બુદ્ધ્વા નિરીહ ઉપશામ્યતિ ॥ ૧૬॥

નૃદેહમ્ આદ્યં સુલભં સુદુર્લભમ્
    પ્લવં સુકલ્પં ગુરુકર્ણધારમ્ ।
મયા અનુકૂલેન નભસ્વતેરિતમ્
    પુમાન્ ભવાબ્ધિં ન તરેત્ સઃ આત્મહા ॥ ૧૭॥

યદા આરમ્ભેષુ નિર્વિણ્ણઃ વિરક્તઃ સંયતેન્દ્રિયઃ ।
અભ્યાસેન આત્મનઃ યોગી ધારયેત્ અચલં મનઃ ॥ ૧૮॥

ધાર્યમાણં મનઃ યઃ હિ ભ્રામ્યદાશુ અનવસ્થિતમ્ ।
અતન્દ્રિતઃ અનુરોધેન માર્ગેણ આત્મવશં નયેત્ ॥ ૧૯॥

મનોગતિં ન વિસૃજેત્ જિતપ્રાણઃ જિતેન્દ્રિયઃ ।
સત્ત્વસમ્પન્નયા બુદ્ધ્યા મનઃ આત્મવશં નયેત્ ॥ ૨૦॥

એષઃ વૈ પરમઃ યોગઃ મનસઃ સઙ્ગ્રહઃ સ્મૃતઃ ।
હૃદયજ્ઞત્વમ્ અન્વિચ્છન્ દમ્યસ્ય એવ અર્વતઃ મુહુઃ ॥ ૨૧॥

સાઙ્ખ્યેન સર્વભાવાનાં પ્રતિલોમ અનુલોમતઃ ।
ભવ અપિ અયૌ અનુધ્યયેત્ મનઃ યાવત્ પ્રસીદતિ ॥ ૨૨॥

નિર્વિણ્ણસ્ય વિરક્તસ્ય પુરુષસ્ય ઉક્તવેદિનઃ ।

મનઃ ત્યજતિ દૌરાત્મ્યં ચિન્તિતસ્ય અનુચિન્તયા ॥ ૨૩॥

યમ આદિભિઃ યોગપથૈઃ આન્વીક્ષિક્યા ચ વિદ્યયા ।
મમ અર્ચોપાસનાભિઃ વા ન અન્યૈઃ યોગ્યં સ્મરેત્ મનઃ ॥ ૨૪॥

યદિ કુર્યાત્ પ્રમાદેન યોગી કર્મ વિગર્હિતમ્ ।
યોગેન એવ દહેત્ અંહઃ ન અન્યત્ તત્ર કદાચન ॥ ૨૫॥

સ્વે સ્વે અધિકારે યા નિષ્ઠા સઃ ગુણઃ પરિકીર્તિતઃ ।
કર્મણાં જાતિ અશુદ્ધાનામ્ અનેન નિયમઃ કૃતઃ ।
ગુણદોષવિધાનેન સઙ્ગાનાં ત્યાજનેચ્છયા ॥ ૨૬॥

જાતશ્રદ્ધઃ મત્કથાસુ નિર્વિણ્ણઃ સર્વકર્મસુ ।
વેદ દુઃખાત્મકાન્ કામાન્ પરિત્યાગે અપિ અનીશ્વરઃ ॥ ૨૭॥

તતઃ ભજેત માં પ્રીતઃ શ્રદ્ધાલુઃ દૃઢનિશ્ચયઃ ।
જુષમાણઃ ચ તાન્ કામાન્ દુઃખ ઉદર્કાન્ ચ ગર્હયન્ ॥ ૨૮॥

પ્રોક્તેન ભક્તિયોગેન ભજતઃ મા અસકૃત્ મુનેઃ ।
કામાઃ હૃદય્યાઃ નશ્યન્તિ સર્વે મયિ હૃદિ સ્થિતે ॥ ૨૯॥

ભિદ્યતે હૃદયગ્રન્થિઃ છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચ અસ્ય કર્માણિ મયિ દૃષ્ટે અખિલ આત્મનિ ॥ ૩૦॥

તસ્માત્ મદ્ભક્તિયુક્તસ્ય યોગિનઃ વૈ મત્ આત્મનઃ ।
ન જ્ઞાનં ન ચ વૈરાગ્યં પ્રાયઃ શ્રેયઃ ભવેત્ ઇહ ॥ ૩૧॥

યત્ કર્મભિઃ યત્ તપસા જ્ઞાનવૈરાગ્યતઃ ચ યત્ ।
યોગેન દાનધર્મેણ શ્રેયોભિઃ ઇતરૈઃ અપિ ॥ ૩૨॥

સર્વં મદ્ભક્તિયોગેન મદ્ભક્તઃ લભતે અઞ્જસા ।
સ્વર્ગ અપવર્ગં મત્ ધામ કથઞ્ચિત્ યદિ વાઞ્છતિ ॥ ૩૩॥

ન કિઞ્ચિત્ સાધવઃ ધીરાઃ ભક્તાઃ હિ એકાન્તિનઃ મમ ।
વાઞ્છતિ અપિ મયા દત્તં કૈવલ્યમ્ અપુનર્ભવમ્ ॥ ૩૪॥

નૈરપેક્ષ્યં પરં પ્રાહુઃ નિઃશ્રેયસમ્ અનલ્પકમ્ ।
તસ્માત્ નિરાશિષઃ ભક્તિઃ નિરપેક્ષસ્ય મે ભવેત્ ॥ ૩૫॥

ન મયિ એકાન્તભક્તાનાં ગુણદોષ ઉદ્ભવાઃ ગુણાઃ ।
સાધૂનાં સમચિત્તાનાં બુદ્ધેઃ પરમ્ ઉપેયુષામ્ ॥ ૩૬॥

એવમ્ એતત્ મયા આદિષ્ટાન્ અનુતિષ્ઠન્તિ મે પથઃ ।
ક્ષેમં વિન્દન્તિ મત્ સ્થાનં યત્ બ્રહ્મ પરમં વિદુઃ ॥ ૩૭॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
વેદત્રયીવિભાગયોગો નામ વિંશોઽધ્યાયઃ ॥ ૨૦॥

અથ એકવિંશઃ અધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
યઃ એતાન્ મત્પથઃ હિત્વા ભક્તિજ્ઞાનક્રિયાત્મકાન્ ।
ક્ષુદ્રાન્ કામાન્ ચલૈઃ પ્રાણૈઃ જુષન્તઃ સંસરન્તિ તે ॥ ૧॥

સ્વે સ્વે અધિકારે યા નિષ્ઠા સઃ ગુણઃ પરિકીર્તિતઃ ।
વિપર્યયઃ તુ દોષઃ સ્યાત્ ઉભયોઃ એષઃ નિશ્ચયઃ ॥ ૨॥

શુદ્ધિ અશુદ્ધી વિધીયેતે સમાનેષુ અપિ વસ્તુષુ ।
દ્રવ્યસ્ય વિચિકિત્સાર્થં ગુણદોષૌ શુભ અશુભૌ ॥ ૩॥

ધર્માર્થં વ્યવહારાર્થં યાત્રાર્થમ્ ઇતિ ચ અનઘ ।
દર્શિતઃ અયં મયા આચારઃ ધર્મમ્ ઉદ્વહતાં ધુરમ્ ॥ ૪॥

ભૂમિ અમ્બુ અગ્નિ અનિલ આકાશાઃ ભૂતાનાં પઞ્ચ ધાતવઃ ।
આબ્રહ્મ સ્થાવર આદીનાં શરીરાઃ આત્મસંયુતાઃ ॥ ૫॥

વેદેન નામરૂપાણિ વિષમાણિ સમેષુ અપિ ।
ધાતુષુ ઉદ્ધવ કલ્પ્યન્તઃ એતેષાં સ્વાર્થસિદ્ધયે ॥ ૬॥

દેશ કાલ આદિ ભાવાનાં વસ્તૂનાં મમ સત્તમ ।
ગુણદોષૌ વિધીયેતે નિયમાર્થં હિ કર્મણામ્ ॥ ૭॥

અકૃષ્ણસારઃ દેશાનામ્ અબ્રહ્મણ્યઃ અશુચિઃ ભવેત્ ।
કૃષ્ણસારઃ અપિ અસૌવીર કીકટ અસંસ્કૃતેરિણમ્ ॥ ૮॥

કર્મણ્યઃ ગુણવાન્ કાલઃ દ્રવ્યતઃ સ્વતઃ એવ વા ।
યતઃ નિવર્તતે કર્મ સઃ દોષઃ અકર્મકઃ સ્મૃતઃ ॥ ૯॥

દ્રવ્યસ્ય શુદ્ધિ અશુદ્ધી ચ દ્રવ્યેણ વચનેન ચ ।
સંસ્કારેણ અથ કાલેન મહત્ત્વ અલ્પતયા અથવા ॥ ૧૦॥

શક્ત્યા અશક્ત્યા અથવા બુદ્ધ્યા સમૃદ્ધ્યા ચ યત્ આત્મને ।
અઘં કુર્વન્તિ હિ યથા દેશ અવસ્થા અનુસારતઃ ॥ ૧૧॥

ધાન્ય દારુ અસ્થિ તન્તૂનાં રસ તૈજસ ચર્મણામ્ ।
કાલ વાયુ અગ્નિ મૃત્તોયૈઃ પાર્થિવાનાં યુત અયુતૈઃ ॥ ૧૨॥

અમેધ્યલિપ્તં યત્ યેન ગન્ધં લેપં વ્યપોહતિ ।
ભજતે પ્રકૃતિં તસ્ય તત્ શૌચં તાવત્ ઇષ્યતે ॥ ૧૩॥

સ્નાન દાન તપઃ અવસ્થા વીર્ય સંસ્કાર કર્મભિઃ ।
મત્ સ્મૃત્યા ચ આત્મનઃ શૌચં શુદ્ધઃ કર્મ આચરેત્ દ્વિજઃ ॥ ૧૪॥

મન્ત્રસ્ય ચ પરિજ્ઞાનં કર્મશુદ્ધિઃ મદર્પણમ્ ।
ધર્મઃ સમ્પદ્યતે ષડ્ભિઃ અધર્મઃ તુ વિપર્યયઃ ॥ ૧૫॥

ક્વચિત્ ગુણઃ અપિ દોષઃ સ્યાત્ દોષઃ અપિ વિધિના ગુણઃ ।
ગુણદોષાર્થનિયમઃ તત્ ભિદામ્ એવ બાધતે ॥ ૧૬॥

સમાનકર્મ આચરણં પતિતાનાં ન પાતકમ્ ।
ઔત્પત્તિકઃ ગુણઃ સઙ્ગઃ ન શયાનઃ પતતિ અધઃ ॥ ૧૭॥

યતઃ યતઃ નિવર્તેત વિમુચ્યેત તતઃ તતઃ ।
એષઃ ધર્મઃ નૃણાં ક્ષેમઃ શોકમોહભય અપહઃ ॥ ૧૮॥

વિષયેષુ ગુણાધ્યાસાત્ પુંસઃ સઙ્ગઃ તતઃ ભવેત્ ।
સઙ્ગાત્ તત્ર ભવેત્ કામઃ કામાત્ એવ કલિઃ નૃણામ્ ॥ ૧૯॥

કલેઃ દુર્વિષહઃ ક્રોધઃ તમઃ તમ્ અનુવર્તતે ।
તમસા ગ્રસ્યતે પુંસઃ ચેતના વ્યાપિની દ્રુતમ્ ॥ ૨૦॥

તયા વિરહિતઃ સાધો જન્તુઃ શૂન્યાય કલ્પતે ।
તતઃ અસ્ય સ્વાર્થવિભ્રંશઃ મૂર્ચ્છિતસ્ય મૃતસ્ય ચ ॥ ૨૧॥

વિષયાભિનિવેશેન ન આત્માનં વેદ ન અપરમ્ ।
વૃક્ષજીવિકયા જીવન્ વ્યર્થં ભસ્ત્ર ઇવ યઃ શ્વસન્ ॥ ૨૨॥

ફલશ્રુતિઃ ઇયં નૃણાં ન શ્રેયઃ રોચનં પરમ્ ।
શ્રેયોવિવક્ષયા પ્રોક્તં યથા ભૈષજ્યરોચનમ્ ॥ ૨૩॥

ઉત્પત્તિ એવ હિ કામેષુ પ્રાણેષુ સ્વજનેષુ ચ ।
આસક્તમનસઃ મર્ત્યા આત્મનઃ અનર્થહેતુષુ ॥ ૨૪॥

ન તાન્ અવિદુષઃ સ્વાર્થં ભ્રામ્યતઃ વૃજિનાધ્વનિ ।
કથં યુઞ્જ્યાત્ પુનઃ તેષુ તાન્ તમઃ વિશતઃ બુધઃ ॥ ૨૫॥

એવં વ્યવસિતં કેચિત્ અવિજ્ઞાય કુબુદ્ધયઃ ।
ફલશ્રુતિં કુસુમિતાં ન વેદજ્ઞાઃ વદન્તિ હિ ॥ ૨૬॥

કામિનઃ કૃપણાઃ લુબ્ધાઃ પુષ્પેષુ ફલબુદ્ધયઃ ।
અગ્નિમુગ્ધા ધુમતાન્તાઃ સ્વં લોકં ન વિન્દન્તિ તે ॥ ૨૭॥

ન તે મામ્ અઙ્ગઃ જાનન્તિ હૃદિસ્થં યઃ ઇદં યતઃ ।
ઉક્થશસ્ત્રાઃ હિ અસુતૃપઃ યથા નીહારચક્ષુષઃ ॥ ૨૮॥

તે મે મતમ્ અવિજ્ઞાય પરોક્ષં વિષયાત્મકાઃ ।
હિંસાયાં યદિ રાગઃ સ્યાત્ યજ્ઞઃ એવ ન ચોદના ॥ ૨૯॥

હિંસાવિહારાઃ હિ અલબ્ધૈઃ પશુભિઃ સ્વસુખએચ્છયા ।
યજન્તે દેવતાઃ યજ્ઞૈઃ પિતૃભૂતપતીન્ ખલાઃ ॥ ૩૦॥

સ્વપ્ઉપમમ્ અમું લોકમ્ અસન્તં શ્રવણપ્રિયમ્ ।
આશિષઃ હૃદિ સઙ્કલ્પ્ય ત્યજન્તિ અર્થાન્ યથા વણિક્ ॥ ૩૧॥

રજઃસત્ત્વતમોનિષ્ઠાઃ રજઃસત્ત્વતમોજુષઃ ।
ઉપાસતઃ ઇન્દ્રમુખ્યાન્ દેવાદીન્ ન તથા એવ મામ્ ॥ ૩૨॥

ઇષ્ટ્વા ઇહ દેવતાઃ યજ્ઞૈઃ ગત્વા રંસ્યામહે દિવિ ।
તસ્ય અન્તઃ ઇહ ભૂયાસ્મઃ મહાશાલા મહાકુલાઃ ॥ ૩૩॥

એવં પુષ્પિતયા વાચા વ્યાક્ષિપ્તમનસાં નૃણામ્ ।
માનિનાન્ ચ અતિસ્તબ્ધાનાં મદ્વાર્તા અપિ ન રોચતે ॥ ૩૪॥

વેદાઃ બ્રહ્માત્મવિષયાઃ ત્રિકાણ્ડવિષયાઃ ઇમે ।
પરોક્ષવાદાઃ ઋષયઃ પરોક્ષં મમ ચ પ્રિયમ્ ॥ ૩૫॥

શબ્દબ્રહ્મ સુદુર્બોધં પ્રાણ ઇન્દ્રિય મનોમયમ્ ।
અનન્તપારં ગમ્ભીરં દુર્વિગાહ્યં સમુદ્રવત્ ॥ ૩૬॥

મયા ઉપબૃંહિતં ભૂમ્ના બ્રહ્મણા અનન્તશક્તિના ।
ભૂતેષુ ઘોષરૂપેણ બિસેષુ ઊર્ણ ઇવ લક્ષ્યતે ॥ ૩૭॥

યથા ઊર્ણનાભિઃ હૃદયાત્ ઊર્ણામ્ ઉદ્વમતે મુખાત્ ।

આકાશાત્ ઘોષવાન્ પ્રાણઃ મનસા સ્પર્શરૂપિણા ॥ ૩૮॥

છન્દોમયઃ અમૃતમયઃ સહસ્રપદવીં પ્રભુઃ ।
ઓઙ્કારાત્ વ્યઞ્જિત સ્પર્શ સ્વર ઉષ્મ અન્તસ્થ ભૂષિતામ્ ॥

૩૯॥

વિચિત્રભાષાવિતતાં છન્દોભિઃ ચતુર ઉત્તરૈઃ ।
અનન્તપારાં બૃહતીં સૃજતિ આક્ષિપતે સ્વયમ્ ॥ ૪૦॥

ગાયત્રી ઉષ્ણિક્ અનુષ્ટુપ્ ચ બૃહતી પઙ્ક્તિઃ એવ ચ ।
ત્રિષ્ટુપ્ જગતી અતિચ્છન્દઃ હિ અત્યષ્ટિ અતિજગત્ વિરાટ્ ॥ ૪૧॥

કિં વિધત્તે કિમ્ આચષ્ટે કિમ્ અનૂદ્ય વિકલ્પયેત્ ।
ઇતિ અસ્યાઃ હૃદયં લોકે ન અન્યઃ મત્ વેદ કશ્ચન ॥ ૪૨॥

માં વિધત્તે અભિધત્તે માં વિકલ્પ્ય અપોહ્યતે તુ અહમ્ ।
એતાવાન્ સર્વવેદાર્થઃ શબ્દઃ આસ્થાય માં ભિદામ્ ।
માયામાત્રમ્ અનૂદ્ય અન્તે પ્રતિષિધ્ય પ્રસીદતિ ॥ ૪૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
વેદત્રયવિભાગનિરૂપણં નામ એકવિંશોઽધ્યાયઃ ॥ ૨૧॥

અથ દ્વાવિંશઃ અધ્યાયઃ ।
ઉદ્ધવઃ ઉવાચ ।
કતિ તત્ત્વાનિ વિશ્વેશ સઙ્ખ્યાતાનિ ઋષિભિઃ પ્રભો ।
નવ એકાદશ પઞ્ચ ત્રીણિ આત્થ ત્વમ્ ઇહ શુશ્રુમ ॥ ૧॥

કેચિત્ ષડ્વિંશતિં પ્રાહુઃ અપરે પઞ્ચવિંશતિમ્ ।
સપ્ત એકે નવ ષટ્ કેચિત્ ચત્વારિ એકાદશ અપરે ।
કેચિત્ સપ્તદશ પ્રાહુઃ ષોડશ એકે ત્રયોદશ ॥ ૨॥

એતાવત્ ત્વમ્ હિ સઙ્ખ્યાનામ્ ઋષયઃ યત્ વિવક્ષયા ।
ગાયન્તિ પૃથક્ આયુષ્મન્ ઇદં નઃ વક્તુમ્ અર્હસિ ॥ ૩॥

શ્રીભગવાન્ ઉવાચ ।
યુક્તં ચ સન્તિ સર્વત્ર ભાષન્તે બ્રાહ્મણાઃ યથા ।
માયાં મદીયામ્ ઉદ્ગૃહ્ય વદતાં કિં નુ દુર્ઘટમ્ ॥ ૪॥

ન એતત્ એવં યથા આત્થ ત્વં યત્ અહં વચ્મિ તત્ તથા ।
એવં વિવદતાં હેતું શક્તયઃ મે દુરત્યયાઃ ॥ ૫॥

યાસાં વ્યતિકરાત્ આસીત્ વિકલ્પઃ વદતાં પદમ્ ।
પ્રાપ્તે શમદમે અપિ એતિ વાદસ્તમનુ શામ્યતિ ॥ ૬॥

પરસ્પરાન્ અનુપ્રવેશાત્ તત્ત્વાનાં પુરુષર્ષભ ।
પૌર્વ અપર્ય પ્રસઙ્ખ્યાનં યથા વક્તુઃ વિવક્ષિતમ્ ॥ ૭॥

એકસ્મિન્ અપિ દૃશ્યન્તે પ્રવિષ્ટાનિ ઇતરાણિ ચ ।
પૂર્વસ્મિન્ વા પરસ્મિન્ વા તત્ત્વે તત્ત્વાનિ સર્વશઃ ॥ ૮॥

પૌર્વ અપર્યમ્ અતઃ અમીષાં પ્રસઙ્ખ્યાનમ્ અભીપ્સતામ્ ।
યથા વિવિક્તં યત્ વક્ત્રં ગૃહ્ણીમઃ યુક્તિસંભવાત્ ॥ ૯॥

અનાદિ અવિદ્યાયુક્તસ્ય પુરુષસ્ય આત્મવેદનમ્ ।
સ્વતઃ ન સંભવાત્ અન્યઃ તત્ત્વજ્ઞઃ જ્ઞાનદઃ ભવેત્ ॥ ૧૦॥

પુરુષ ઈશ્વરયોઃ અત્ર ન વૈલક્ષણ્યમ્ અણુ અપિ ।
તત્ અન્યકલ્પનાપાર્થા જ્ઞાનં ચ પ્રકૃતેઃ ગુણઃ ॥ ૧૧॥

પ્રકૃતિઃ ગુણસામ્યં વૈ પ્રકૃતેઃ ન આત્મનઃ ગુણાઃ ।
સત્ત્વં રજઃ તમઃ ઇતિ સ્થિતિ ઉત્પત્તિ અન્તહેતવઃ ॥ ૧૨॥

સત્ત્વં જ્ઞાનં રજઃ કર્મ તમઃ અજ્ઞાનમ્ ઇહ ઉચ્યતે ।
ગુણવ્યતિકરઃ કાલઃ સ્વભાવઃ સૂત્રમ્ એવ ચ ॥ ૧૩॥

પુરુષઃ પ્રકૃતિઃ વ્યક્તમ્ અહઙ્કારઃ નભઃ અનિલઃ ।
જ્યોતિઃ આપઃ ક્ષિતિઃ ઇતિ તત્ત્વાનિ ઉક્તાનિ મે નવ ॥ ૧૪॥

શ્રોત્રં ત્વક્ દર્શનં ઘ્રાણઃ જિહ્વા ઇતિ જ્ઞાનશક્તયઃ ।
વાક્ પાણિ ઉપસ્થ પાયુ અઙ્ઘ્રિઃ કર્માણ્યઙ્ગ ઉભયં મનઃ ॥ ૧૫॥

શબ્દઃ સ્પર્શઃ રસઃ ગન્ધઃ રૂપં ચ ઇતિ અર્થજાતયઃ ।
ગતિ ઉક્તિ ઉત્સર્ગ શિલ્પાનિ કર્મ આયતન સિદ્ધયઃ ॥ ૧૬॥

સર્ગ આદૌ પ્રકૃતિઃ હિ અસ્ય કાર્ય કારણ રૂપિણી ।
સત્ત્વ આદિભિઃ ગુણૈઃ ધત્તે પુરુષઃ અવ્યક્તઃ ઈક્ષતે ॥ ૧૭॥

વ્યક્ત આદયઃ વિકુર્વાણાઃ ધાતવઃ પુરુષ ઈક્ષયા ।
લબ્ધવીર્યાઃ સૃજન્તિ અણ્ડં સંહતાઃ પ્રકૃતેઃ બલાત્ ॥ ૧૮॥

સપ્ત એવ ધાતવઃ ઇતિ તત્ર અર્થાઃ પઞ્ચ ખાદયઃ ।
જ્ઞાનમ્ આત્મા ઉભય આધારઃ તતઃ દેહ ઇન્દ્રિય આસવઃ ॥ ૧૯॥

ષડ્ ઇતિ અત્ર અપિ ભૂતાનિ પઞ્ચ ષષ્ઠઃ પરઃ પુમાન્ ।
તૈઃ યુક્તઃ આત્મસંભૂતૈઃ સૃષ્ટ્વા ઇદં સમુપાવિશત્ ॥ ૨૦॥

ચત્વારિ એવ ઇતિ તત્ર અપિ તેજઃ આપઃ અન્નમ્ આત્મનઃ ।
જાતાનિ તૈઃ ઇદં જાતં જન્મ અવયવિનઃ ખલુ ॥ ૨૧॥

સઙ્ખ્યાને સપ્તદશકે ભૂતમાત્ર ઇન્દ્રિયાણિ ચ ।
પઞ્ચપઞ્ચ એક મનસા આત્મા સપ્તદશઃ સ્મૃતઃ ॥ ૨૨॥

તદ્વત્ ષોડશસઙ્ખ્યાને આત્મા એવ મનઃ ઉચ્યતે ।
ભૂતેન્દ્રિયાણિ પઞ્ચ એવ મનઃ આત્મા ત્રયોદશઃ ॥ ૨૩॥

એકાદશત્વઃ આત્મા અસૌ મહાભૂતેન્દ્રિયાણિ ચ ।
અષ્ટૌ પ્રકૃતયઃ ચ એવ પુરુષઃ ચ નવ ઇતિ અથ ॥ ૨૪॥

ઇતિ નાના પ્રસઙ્ખ્યાનં તત્ત્વાનામ્ ઋષિભિઃ કૃતમ્ ।
સર્વં ન્યાય્યં યુક્તિમત્વાત્ વિદુષાં કિમ્ અશોભનમ્ ॥ ૨૫॥

ઉદ્ધવઃ ઉવાચ ।
પ્રકૃતિઃ પુરુષઃ ચ ઉભૌ યદિ અપિ આત્મવિલક્ષણૌ ।
અન્યોન્ય અપાશ્રયાત્ કૃષ્ણ દૃશ્યતે ન ભિદા તયોઃ ।
પ્રકૃતૌ લક્ષ્યતે હિ આત્મા પ્રકૃતિઃ ચ તથા આત્મનિ ॥ ૨૬॥

એવં મે પુણ્ડરીકાક્ષ મહાન્તં સંશયં હૃદિ ।
છેત્તુમ્ અર્હસિ સર્વજ્ઞ વચોભિઃ નયનૈપુણૈઃ ॥ ૨૭॥

ત્વત્તઃ જ્ઞાનં હિ જીવાનાં પ્રમોષઃ તે અત્ર શક્તિતઃ ।
ત્વમ્ એવ હિ આત્મ માયાયા ગતિં વેત્થ ન ચ અપરઃ ॥ ૨૮॥

શ્રીભગવાન્ ઉવાચ ।
પ્રકૃતિઃ પુરુષઃ ચ ઇતિ વિકલ્પઃ પુરુષર્ષભ ।
એષઃ વૈકારિકઃ સર્ગઃ ગુણવ્યતિકરાત્મકઃ ॥ ૨૯॥

મમ અઙ્ગ માયા ગુણમયી અનેકધા
વિકલ્પબુદ્ધીઃ ચ ગુણૈઃ વિધત્તે ।

વૈકારિકઃ ત્રિવિધઃ અધ્યાત્મમ્ એકમ્
    અથ અધિદૈવમ્ અધિભૂતમ્ અન્યત્ ॥ ૩૦॥

દૃક્ રૂપમ્ આર્કં વપુઃ અત્ર રન્ધ્રે
    પરસ્પરં સિધ્યતિ યઃ સ્વતઃ ખે ।
આત્મા યત્ એષમ્ અપરઃ યઃ આદ્યઃ
    સ્વયા અનુભૂત્ય અખિલસિદ્ધસિદ્ધિઃ ।
એવં ત્વક્ આદિ શ્રવણાદિ ચક્ષુઃ
    જિહ્વ આદિ નાસ આદિ ચ ચિત્તયુક્તમ્ ॥ ૩૧॥

યઃ અસૌ ગુણક્ષોભકૃતૌ વિકારઃ
    પ્રધાનમૂલાત્ મહતઃ પ્રસૂતઃ ।
અહં ત્રિવૃત્ મોહવિકલ્પહેતુઃ
    વૈકારિકઃ તામસઃ ઐન્દ્રિયઃ ચ ॥ ૩૨॥

આત્માપરિજ્ઞાનમયઃ વિવાદઃ
    હિ અસ્તિ ઇતિ ન અસ્તિ ઇતિ ભિદાર્થનિષ્ઠઃ ।
વ્યર્થઃ અપિ ન એવ ઉપરમેત પુંસાં
    મત્તઃ પરાવૃત્તધિયાં સ્વલોકાત્ ॥ ૩૩॥

ઉદ્ધવઃ ઉવાચ ।
ત્વત્તઃ પરાવૃત્તધિયઃ સ્વકૃતૈઃ કર્મભિઃ પ્રભો ।
ઉચ્ચ અવચાન્ યથા દેહાન્ ગૃહ્ણન્તિ વિસૃજન્તિ ચ ॥ ૩૪॥

તત્ મમ આખ્યાહિ ગોવિન્દ દુર્વિભાવ્યમ્ અનાત્મભિઃ ।
ન હિ એતત્ પ્રાયશઃ લોકે વિદ્વાંસઃ સન્તિ વઞ્ચિતાઃ ॥ ૩૫॥

શ્રીભગવાન્ ઉવાચ ।
મનઃ કર્મમયં નૃણામ્ ઇન્દ્રિયૈઃ પઞ્ચભિઃ યુતમ્ ।
લોકાત્ લોકં પ્રયાતિ અન્યઃ આત્મા તત્ અનુવર્તતે ॥ ૩૬॥

ધ્યાયન્ મનઃ અનુવિષયાન્ દૃષ્ટાન્ વા અનુશ્રુતાન્ અથ ।
ઉદ્યત્ સીદત્ કર્મતન્ત્રં સ્મૃતિઃ તત્ અનુશામ્યતિ ॥ ૩૭॥

વિષય અભિનિવેશેન ન આત્માનં યત્ સ્મરેત્ પુનઃ ।
જન્તોઃ વૈ કસ્યચિત્ હેતોઃ મૃત્યુઃ અત્યન્તવિસ્મૃતિઃ ॥ ૩૮॥

જન્મ તુ આત્મતયા પુંસઃ સર્વભાવેન ભૂરિદ ।

વિષય સ્વીકૃતિં પ્રાહુઃ યથા સ્વપ્નમનોરથઃ ॥ ૩૯॥

સ્વપ્નં મનોરથં ચ ઇત્થં પ્રાક્તનં ન સ્મરતિ અસૌ ।
તત્ર પૂર્વમ્ ઇવ આત્માનમ્ અપૂર્વં ચ અનુપશ્યતિ ॥ ૪૦॥

ઇન્દ્રિય આયન સૃષ્ટ્યા ઇદં ત્રૈવિધ્યં ભાતિ વસ્તુનિ ।
બહિઃ અન્તઃ ભિદાહેતુઃ જનઃ અસત્ જનકૃત્ યથા ॥ ૪૧॥

નિત્યદા હિ અઙ્ગઃ ભૂતાનિ ભવન્તિ ન ભવન્તિ ચ ।
કાલેન અલક્ષ્યવેગેન સૂક્ષ્મત્વાત્ તત્ ન દૃશ્યતે ॥ ૪૨॥

યથા અર્ચિષાં સ્રોતસાં ચ ફલાનાં વા વનસ્પતેઃ ।
તથા એવ સર્વભૂતાનાં વયઃ અવસ્થા આદયઃ કૃતાઃ ॥ ૪૩॥

સઃ અયં દીપઃ અર્ચિષાં યદ્વત્ સ્રોતસાં તત્ ઇદં જલમ્ ।
સઃ અયં પુમાન્ ઇતિ નૃણાં મૃષાઃ ગીઃ ધીઃ મૃષા
આયુષામ્ ॥ ૪૪॥

મા સ્વસ્ય કર્મબીજેન જાયતે સઃ અપિ અયં પુમાન્ ।
મ્રિયતે વામરઃ ભ્રાન્ત્યા યથા અગ્નિઃ દારુ સંયુતઃ ॥ ૪૫॥

નિષેકગર્ભજન્માનિ બાલ્યકૌમારયૌવનમ્ ।
વયોમધ્યં જરા મૃત્યુઃ ઇતિ અવસ્થાઃ તનોઃ નવ ॥ ૪૬॥

એતાઃ મનોરથમયીઃ હિ અન્યસ્ય ઉચ્ચાવચાઃ તનૂઃ ।
ગુણસઙ્ગાત્ ઉપાદત્તે ક્વચિત્ કશ્ચિત્ જહાતિ ચ ॥ ૪૭॥

આત્મનઃ પિતૃપુત્રાભ્યામ્ અનુમેયૌ ભવાપ્યયૌ ।
ન ભવાપ્યયવસ્તૂનામ્ અભિજ્ઞઃ દ્વયલક્ષણઃ ॥ ૪૮॥

તરોઃ બીજવિપાકાભ્યાં યઃ વિદ્વાત્ જન્મસંયમૌ ।
તરોઃ વિલક્ષણઃ દ્રષ્ટા એવં દ્રષ્ટા તનોઃ પૃથક્ ॥ ૪૯॥

પ્રકૃતેઃ એવમ્ આત્માનમ્ અવિવિચ્ય અબુધઃ પુમાન્ ।
તત્ત્વેન સ્પર્શસંમૂઢઃ સંસારં પ્રતિપદ્યતે ॥ ૫૦॥

સત્ત્વસઙ્ગાત્ ઋષીન્ દેવાન્ રજસા અસુરમાનુષાન્ ।
તમસા ભૂતતિર્યક્ત્વં ભ્રામિતઃ યાતિ કર્મભિઃ ॥ ૫૧॥

નૃત્યતઃ ગાયતઃ પશ્યન્ યથા એવ અનુકરોતિ તાન્ ।
એવં બુદ્ધિગુણાન્ પશ્યન્ અનીહઃ અપિ અનુકાર્યતે ॥ ૫૨॥

યથા અમ્ભસા પ્રચલતા તરવઃ અપિ ચલાઃ ઇવ ।
ચક્ષુષા ભ્રામ્યમાણેન દૃશ્યતે ભ્રમતિ ઇવ ભૂઃ ॥ ૫૩॥

યથા મનોરથધિયઃ વિષયાનુભવઃ મૃષા ।
સ્વપ્નદૃષ્ટાઃ ચ દાશાર્હ તથા સંસારઃ આત્મનઃ ॥ ૫૪॥

અર્થે હિ અવિદ્યમાને અપિ સંસૃતિઃ ન નિવર્તતે ।
ધ્યાયતઃ વિષયાન્ અસ્ય સ્વપ્ને અનર્થ આગમઃ યથા ॥ ૫૫॥

તસ્માત્ ઉદ્ધવ મા ભુઙ્ક્ષ્વ વિષયાન્ અસત્ ઇન્દ્રિયૈઃ ।
આત્મા અગ્રહણનિર્ભાતં પશ્ય વૈકલ્પિકં ભ્રમમ્ ॥ ૫૬॥

ક્ષિપ્તઃ અવમાનિતઃ અસદ્ભિઃ પ્રલબ્ધઃ અસૂયિતઃ અથવા ।
તાડિતઃ સંનિબદ્ધઃ વા વૃત્ત્યા વા પરિહાપિતઃ ॥ ૫૭॥

નિષ્ઠિતઃ મૂત્રિતઃ બહુધા એવં પ્રકમ્પિતઃ ।
શ્રેયસ્કામઃ કૃચ્છ્રગતઃ આત્મના આત્માનમ્ ઉદ્ધરેત્ ॥ ૫૮॥

ઉદ્ધવઃ ઉવાચ ।
યથા એવમ્ અનુબુદ્ધ્યેયં વદ નઃ વદતાં વર ।
સુદુઃસહમ્ ઇમં મન્યઃ આત્મનિ અસત્ અતિક્રમમ્ ॥ ૫૯॥

વિદુષમ્ અપિ વિશ્વાત્મન્ પ્રકૃતિઃ હિ બલીયસી ।
ઋતે ત્વત્ ધર્મનિરતાન્ શાન્તાઃ તે ચરણાલયાન્ ॥ ૬૦॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
દ્વાવિંશોઽધ્યાયઃ ॥ ૨૨॥

અથ ત્રયોવિંશઃ અધ્યાયઃ ।
બાદરાયણિઃ ઉવાચ ।
સઃ એવમ્ આશંસિતઃ ઉદ્ધવેન
  ભાગવતમુખ્યેન દાશાર્હમુખ્યઃ ।
સભાજયન્ બૃત્યવચઃ મુકુન્દઃ
  તમ્ આબભાષે શ્રવણીયવીર્યઃ ॥ ૧॥

શ્રીભગવાન્ ઉવાચ ।
બર્હસ્પત્ય સઃ વૈ ન અત્ર સાધુઃ વૈ દુર્જન્ ઈરિતૈઃ ।

દુરુક્તૈઃ ભિન્નમ્ આત્માનં યઃ સમાધાતુમ્ ઈશ્વરઃ ॥ ૨॥

ન તથા તપ્યતે વિદ્ધઃ પુમાન્ બાણૈઃ સુમર્મગૈઃ ।
યથા તુદન્તિ મર્મસ્થાઃ હિ અસતાં પરુષેષવઃ ॥ ૩॥

કથયન્તિ મહત્પુણ્યમ્ ઇતિહાસમ્ ઇહ ઉદ્ધવ ।
તમ્ અહં વર્ણયિષ્યામિ નિબોધ સુસમાહિતઃ ॥ ૪॥

કેનચિત્ ભિક્ષુણા ગીતં પરિભૂતેન દુર્જનૈઃ ।
સ્મરતાઃ ધૃતિયુક્તેન વિપાકં નિજકર્મણામ્ ॥ ૫॥

અવનિષુ દ્વિજઃ કશ્ચિત્ આસીત્ આઢ્યતમઃ શ્રિયા ।
વાર્તાવૃત્તિઃ કદર્યઃ તુ કામી લુબ્ધઃ અતિકોપનઃ ॥ ૬॥

જ્ઞાતયઃ અતિથયઃ તસ્ય વાઙ્માત્રેણ અપિ ન અર્ચિતાઃ ।
શૂન્ય અવસથઃ આત્મા અપિ કાલે કામૈઃ અનર્ચિતઃ ॥ ૭॥

દુઃશીલસ્ય કદર્યસ્ય દ્રુહ્યન્તે પુત્રબાન્ધવાઃ ।
દારા દુહિતરઃ ભૃત્યાઃ વિષણ્ણાઃ ન આચરન્ પ્રિયમ્ ॥ ૮॥

તસ્ય એવં યક્ષવિત્તસ્ય ચ્યુતસ્ય ઉભયલોકતઃ ।
ધર્મકામવિહીનસ્ય ચુક્રુધુઃ પઞ્ચભાગિનઃ ॥ ૯॥

તત્ અવધ્યાન વિસ્રસ્ત પુણ્ય સ્કન્ધસ્ય ભૂરિદ ।
અર્થઃ અપિ અગચ્છન્ નિધનં બહુ આયાસ પરિશ્રમઃ ॥ ૧૦॥

જ્ઞાતયઃ જગૃહુઃ કિઞ્ચિત્ કિઞ્ચિત્ અસ્યવઃ ઉદ્ધવ ।
દૈવતઃ કાલતઃ કિઞ્ચિત્ બ્રહ્મબન્ધોઃ નૃપાર્થિવાત્ ॥ ૧૧॥

સઃ એવં દ્રવિણે નષ્ટે ધર્મકામવિવર્જિતઃ ।
ઉપેક્ષિતઃ ચ સ્વજનૈઃ ચિન્તામ્ આપ દુરત્યયામ્ ॥ ૧૨॥

તસ્ય એવં ધ્યાયતઃ દીર્ઘં નષ્ટરાયઃ તપસ્વિનઃ ।
ખિદ્યતઃ બાષ્પકણ્ઠસ્ય નિર્વેદઃ સુમહાન્ અભૂત્ ॥ ૧૩॥

સઃ ચ આહ ઇદમ્ અહો કષ્ટં વૃથા આત્મા મે અનુતાપિતઃ ।
ન ધર્માય ન કામાય યસ્ય અર્થ આયાસઃ ઈદૃશઃ ॥ ૧૪॥

પ્રાયેણ અર્થાઃ કદર્યાણાં ન સુખાય કદાચન ।
ઇહ ચ આત્મોપતાપાય મૃતસ્ય નરકાય ચ ॥ ૧૫॥

યશઃ યશસ્વિનાં શુદ્ધં શ્લાઘ્યાઃ યે ગુણિનાં ગુણાઃ ।
લોભઃ સ્વલ્પઃ અપિ તાન્ હન્તિ શ્વિત્રઃ રૂપમ્ ઇવ ઇપ્સિતમ્ ॥ ૧૬॥

અર્થસ્ય સાધને સિદ્ધ્ઃ ઉત્કર્ષે રક્ષણે વ્યયે ।
નાશ ઉપભોગઃ આયાસઃ ત્રાસઃ ચિન્તા ભ્રમઃ નૃણામ્ ॥ ૧૭॥

સ્તેયં હિંસા અનૃતં દમ્ભઃ કામઃ ક્રોધઃ સ્મયઃ મદઃ ।
ભેદઃ વૈરમ્ અવિશ્વાસઃ સંસ્પર્ધા વ્યસનાનિ ચ ॥ ૧૮॥

એતે પઞ્ચદશાન્ અર્થાઃ હિ અર્થમૂલાઃ મતાઃ નૃણામ્ ।
તસ્માત્ અનર્થમ્ અર્થાખ્યં શ્રેયઃ અર્થી દૂરતઃ ત્યજેત્ ॥ ૧૯॥

ભિદ્યન્તે ભ્રાતરઃ દારાઃ પિતરઃ સુહૃદઃ તથા ।
એકાસ્નિગ્ધાઃ કાકિણિના સદ્યઃ સર્વે અરયઃ કૃતાઃ ॥ ૨૦॥

અર્થેન અલ્પીયસા હિ એતે સંરબ્ધા દીપ્તમ્ અન્યવઃ ।
ત્યજન્તિ આશુ સ્પૃધઃ ઘ્નન્તિ સહસા ઉત્સૃજ્ય સૌહૃદમ્ ॥

૨૧॥

લબ્ધ્વા જન્મ અમરપ્રાર્થ્યં માનુષ્યં તત્ દ્વિજ અગ્ર્યતામ્ ।
તત્ અનાદૃત્ય યે સ્વાર્થં ઘ્નન્તિ યાન્તિ અશુભાં ગતિમ્ ॥

૨૨॥

સ્વર્ગ અપવર્ગયોઃ દ્વારં પ્રાપ્ય લોકમ્ ઇમં પુમાન્ ।
દ્રવિણે કઃ અનૂષજ્જેત મર્ત્યઃ અનર્થસ્ય ધામનિ ॥ ૨૩॥

દેવર્ષિ પિતૃ ભૂતાનિ જ્ઞાતીન્ બન્ધૂન્ ચ ભાગિનઃ ।
અસંવિભજ્ય ચ આત્માનં યક્ષવિત્તઃ પતતિ અધઃ ॥ ૨૪॥

વ્યર્થયા અર્થેહયા વિત્તં પ્રમત્તસ્ય વયઃ બલમ્ ।
કુશલાઃ યેન સિધ્યન્તિ જરઠઃ કિં નુ સાધયે ॥ ૨૫॥

કસ્માત્ સઙ્ક્લિશ્યતે વિદ્વાન્ વ્યર્થયા અર્થેહયા અસકૃત્ ।
કસ્યચિત્ માયયા નૂનં લોકઃ અયં સુવિમોહિતઃ ॥ ૨૬॥

કિં ધનૈઃ ધનદૈઃ વા કિં કામૈઃ વા કામદૈઃ ઉત ।
મૃત્યુના ગ્રસ્યમાનસ્ય કર્મભિઃ વા ઉત જન્મદૈઃ ॥ ૨૭॥

નૂનં મે ભગવાન્ તુષ્ટઃ સર્વદેવમયઃ હરિઃ ।

યેન નીતઃ દશામ્ એતાં નિર્વેદઃ ચ આત્મનઃ પ્લવઃ ॥ ૨૮॥

સઃ અહં કલૌ અશેષેણ શોષયિહ્યે અઙ્ગમ્ આત્મનઃ ।
અપ્રમત્તઃ અખિલસ્વાર્થે યદિ સ્યાત્ સિદ્ધઃ આત્મનિ ॥ ૨૯॥

તત્ર મામ્ અનુમોદેરન્ દેવાઃ ત્રિભુવનેશ્વરાઃ ।
મુહૂર્તેન બ્રહ્મલોકં ખટ્વાઙ્ગઃ સમસાધયત્ ॥ ૩૦॥

શ્રીભગવાન્ ઉવાચ ।
ઇતિ અભિપ્રેત્ય મનસા હિ આવન્ત્યઃ દ્વિજસત્તમઃ ।
ઉન્મુચ્ય હૃદયગ્રન્થીન્ શાન્તઃ ભિક્ષુઃ અભૂત્ મુનિઃ ॥ ૩૧॥

સઃ ચચાર મહીમ્ એતાં સંયત આત્મેન્દ્રિય અનિલઃ ।
ભિક્ષાર્થં નગર ગ્રામાન્ અસઙ્ગઃ અલક્ષિતઃ અવિશત્ ॥ ૩૨॥

તં વૈ પ્રવયસં ભિક્ષુમ્ અવધૂતમ્ અસજ્જનાઃ ।
દૃષ્ટ્વા પર્યભવન્ ભદ્રઃ બહ્વીભિઃ પરિભૂતિભિઃ ॥ ૩૩॥

કેચિત્ ત્રિવેણું જગૃહુઃ એકે પાત્રં કમણ્ડલુમ્ ।
પીઠં ચ એકે અક્ષસૂત્રં ચ કન્થાં ચીરાણિ કેચન ॥ ૩૪॥

પ્રદાય ચ પુનઃ તાનિ દર્શિતાનિ આદદુઃ મુનેઃ ।
અન્નં ચ ભૈક્ષ્યસમ્પન્નં ભુઞ્જાનસ્ય સરિત્ તટે ॥ ૩૫॥

મૂત્રયન્તિ ચ પાપિષ્ઠાઃ ષ્ઠીવન્તિ અસ્ય ચ મૂર્ધનિ ।
યતવાચં વાચયન્તિ તાડયન્તિ ન વક્તિ ચેત્ ॥ ૩૬॥

તર્જયન્તિ અપરે વાગ્ભિઃ સ્તેનઃ અયમ્ ઇતિ વાદિનઃ ।
બધ્નન્તિ રજ્જ્વા તં કેચિત્ બધ્યતાં બધ્યતામ્ ઇતિ ॥ ૩૭॥

ક્ષિપન્તિ એકે અવજાનન્તઃ એષઃ ધર્મધ્વજઃ શઠઃ ।
ક્ષીણવિત્તઃ ઇમાં વૃત્તિમ્ અગ્રહીત્ સ્વજન ઉજ્ઝિતઃ ॥ ૩૮॥

અહો એષઃ મહાસારઃ ધૃતિમાન્ ગિરિઃ આડિવ ।
મૌનેન સાધયતિ અર્થં બકવત્ દૃઢનિશ્ચયઃ ॥ ૩૯॥

ઇતિ એકે વિહસન્તિ એનમ્ એકે દુર્વાતયન્તિ ચ ।
તં બબન્ધુઃ નિરુરુધુઃ યથા ક્રીડનકં દ્વિજમ્ ॥ ૪૦॥

એવં સઃ ભૌતિકં દુઃખં દૈવિકં દૈહિકં ચ યત્ ।
ભોક્તવ્યમ્ આત્મનઃ દિષ્ટં પ્રાપ્તં પ્રાપ્તમ્ અબુધ્યત ॥ ૪૧॥

પરિભૂતઃ ઇમાં ગાથામ્ અગાયત નરાધમૈઃ ।
પાતયદ્ભિઃ સ્વધર્મસ્થઃ ધૃતિમ્ આસ્થાય સાત્વિકીમ્ ॥ ૪૨॥

દ્વિજઃ ઉવાચ ।
ન અયં જનઃ મે સુખદુઃખહેતુઃ
ન દેવતાત્મા ગ્રહકર્મકાલાઃ ।
મનઃ પરં કારણમ્ આમનન્તિ
સંસારચક્રં પરિવર્તયેત્ યત્ ॥ ૪૩॥

મનઃ ગુણાન્ વૈ સૃજતે બલીયઃ
તતઃ ચ કર્માણિ વિલક્ષણાનિ ।
શુક્લાનિ કૃષ્ણાનિ અથ લોહિતાનિ
તેભ્યઃ સવર્ણાઃ સૃતયઃ ભવન્તિ ॥ ૪૪॥

અનીહઃ આત્મા મનસા સમીહતા
હિરણ્મયઃ મત્સખઃ ઉદ્વિચષ્ટે ।
મનઃ સ્વલિઙ્ગં પરિગૃહ્ય કામાન્
જુષન્ નિબદ્ધઃ ગુણસઙ્ગતઃ અસૌ ॥ ૪૫॥

દાનં સ્વધર્મઃ નિયમઃ યમઃ ચ
શ્રુતં ચ કર્માણિ ચ સદ્વ્રતાનિ ।
સર્વે મનોનિગ્રહલક્ષણાન્તાઃ
પરઃ હિ યોગઃ મનસઃ સમાધિ ॥ ૪૬॥

સમાહિતં યસ્ય મનઃ પ્રશાન્તમ્
દાનાદિભિઃ કિં વદ તસ્ય કૃત્યમ્ ।
અસંયતં યસ્ય મનઃ વિનશ્યત્
દાનાદિભિઃ ચેત્ અપરં કિમેભિઃ ॥ ૪૭॥

મનોવશે અન્યે હિ અભવન્ સ્મ દેવાઃ
મનઃ ચ ન અન્યસ્ય વશં સમેતિ ।
ભીષ્મઃ હિ દેવઃ સહસઃ સહીયાન્
યુઞ્જ્યાત્ વશે તં સઃ હિ દેવદેવઃ ॥ ૪૮॥

તં દુર્જયં શત્રુમ્ અસહ્યવેગં
મરુન્તુદં તત્ ન વિજિત્ય કેચિત્ ।

કુર્વન્તિ અસત્ વિગ્રહમ્ અત્ર મર્ત્યૈઃ
　　મિત્રાણિ ઉદાસીન રિપૂન્ વિમૂઢાઃ ॥ ૪૯॥

દેહં મનોમાત્રમ્ ઇમં ગૃહીત્વા
　　મમ અહમ્ ઇતિ અન્ધ ધિયઃ મનુષ્યાઃ ।
એષઃ અહમ્ અન્યઃ અયમ્ ઇતિ ભ્રમેણ
　　દુરન્તપારે તમસિ ભ્રમન્તિ ॥ ૫૦॥

જનઃ તુ હેતુઃ સુખદુઃખયોઃ ચેત્
　　કિમ્ આત્મનઃ ચ અત્ર હ ભૌમયોઃ તત્ ।
જિહ્વાં ક્વચિત્ સન્દશતિ સ્વદદ્ભિઃ
　　તત્ વેદનાયાં કતમાય કુપ્યેત્ ॥ ૫૧॥

દુઃખસ્ય હેતુઃ યદિ દેવતાઃ તુ
　　કિમ્ આત્મનઃ તત્ર વિકારયોઃ તત્ ।
યત્ અઙ્ગમ્ અઙ્ગેન નિહન્યતે ક્વચિત્
　　ક્રુધ્યેત કસ્મૈ પુરુષઃ સ્વદેહે ॥ ૫૨॥

આત્મા યદિ સ્યાત્ સુખદુઃખહેતુઃ
　　કિમ્ અન્યતઃ તત્ર નિજસ્વભાવઃ ।
ન હિ આત્મનઃ અન્યત્ યદિ તત્ મૃષા સ્યાત્
　　ક્રુધ્યેત કસ્માત્ ન સુખં ન દુઃખમ્ ॥ ૫૩॥

ગ્રહાઃ નિમિત્તં સુખદુઃખયોઃ ચેત્
　　કિમ્ આત્મનઃ અજસ્ય જનસ્ય તે વૈ ।
ગ્રહૈઃ ગ્રહસ્ય એવ વદન્તિ પીડામ્
　　ક્રુધ્યેત કસ્મૈ પુરુષઃ તતઃ અન્યઃ ॥ ૫૪॥

કર્માઃ તુ હેતુઃ સુખદુઃખયોઃ ચેત્
　　કિમ્ આત્મનઃ તત્ હિ જડાજડત્વે ।
દેહઃ તુ અચિત્પુરુષઃ અયં સુપર્ણઃ
　　ક્રુધ્યેત કસ્મૈ ન હિ કર્મમૂલમ્ ॥ ૫૫॥

કાલઃ તુ હેતુઃ સુખદુઃખયોઃ ચેત્
　　કિમ્ આત્મનઃ તત્ર તત્ આત્મકઃ અસૌ ।
ન અગ્નેઃ હિ તાપઃ ન હિમસ્ય તત્ સ્યાત્
　　ક્રુધ્યેત કસ્મૈ ન પરસ્ય દ્વન્દ્વમ્ ॥ ૫૬॥

ન કેનચિત્ ક્વ અપિ કથઞ્ચન અસ્ય
    દ્વન્દ્વ ઉપરાગઃ પરતઃ પરસ્ય ।
યથાહમઃ સંસૃતિરૂપિણઃ સ્યાત્
    એવં પ્રબુદ્ધઃ ન બિભેતિ ભૂતૈઃ ॥ ૫૭॥

એતાં સઃ આસ્થાય પરાત્મનિષ્ઠામ્
    અધ્યાસિતાં પૂર્વતમૈઃ મહર્ષિભિઃ ।
અહં તરિષ્યામિ દુરન્તપારમ્
    તમઃ મુકુન્દ અઙ્ઘ્રિનિષેવયા એવ ॥ ૫૮॥

શ્રીભગવાન્ ઉવાચ ।
નિર્વિદ્ય નષ્ટદ્રવિણઃ ગતક્લમઃ
    પ્રવ્રજ્ય ગાં પર્યટમાનઃ ઇત્થમ્ ।
નિરાકૃતઃ અસદ્ભિઃ અપિ સ્વધર્માત્
    અકમ્પિતઃ અમું મુનિઃ આહ ગાથામ્ ॥ ૫૯॥

સુખદુઃખપ્રદઃ ન અન્યઃ પુરુષસ્ય આત્મવિભ્રમઃ ।
મિત્ર ઉદાસીનરિપવઃ સંસારઃ તમસઃ કૃતઃ ॥ ૬૦॥

તસ્માત્ સર્વાત્મના તાત નિગૃહાણ મનો ધિયા ।
મયિ આવેશિતયા યુક્તઃ એતાવાન્ યોગસઙ્ગ્રહઃ ॥ ૬૧॥

યઃ એતાં ભિક્ષુણા ગીતાં બ્રહ્મનિષ્ઠાં સમાહિતઃ ।
ધારયન્ શ્રાવયન્ શ્રુણ્વન્ દ્વન્દ્વૈઃ ન એવ અભિભૂયતે ॥ ૬૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
બિક્ષુગીતનિરૂપણં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૨૩॥

અથ ચતુર્વિંશોઽધ્યાઃ ।
શ્રીભગવાન્ ઉવાચ ।
અથ તે સમ્પ્રવક્ષ્યામિ સાઙ્ખ્યં પૂર્વૈઃ વિનિશ્ચિતમ્ ।
યત્ વિજ્ઞાય પુમાન્ સદ્યઃ જહ્યાત્ વૈકલ્પિકં ભ્રમમ્ ॥ ૧॥

આસીત્ જ્ઞાનમ્ અથઃ હિ અર્થઃ એકમ્ એવ અવિકલ્પિતમ્ ।
યદા વિવેકનિપુણાઃ આદૌ કૃતયુગે અયુગે ॥ ૨॥

તત્ માયાફલરૂપેણ કેવલં નિર્વિકલ્પિતમ્ ।
વાઙ્મનઃ અગોચરં સત્યં દ્વિધા સમભવત્ બૃહત્ ॥ ૩॥

તયોઃ એકતરઃ હિ અર્થઃ પ્રકૃતિઃ સોભયાત્મિકા ।
જ્ઞાનં તુ અન્યતરઃ ભાવઃ પુરુષઃ સઃ અભિધીયતે ॥ ૪॥

તમઃ રજઃ સત્ત્વમ્ ઇતિ પ્રકૃતેઃ અભવન્ ગુણાઃ ।
મયા પ્રક્ષોભ્યમાણાયાઃ પુરુષ અનુમતેન ચ ॥ ૫॥

તેભ્યઃ સમભવત્ સૂત્રં મહાન્ સૂત્રેણ સંયુતઃ ।
તતઃ વિકુર્વતઃ જાતઃ યઃ અહઙ્કારઃ વિમોહનઃ ॥ ૬॥

વૈકારિકઃ તૈજસઃ ચ તામસઃ ચ ઇતિ અહં ત્રિવૃત્ ।
તન્માત્ર ઇન્દ્રિય મનસાં કારણં ચિત્ અચિત્ મયઃ ॥ ૭॥

અર્થઃ તન્માત્રિકાત્ જજ્ઞે તામસાત્ ઇન્દ્રિયાણિ ચ ।
તૈજસાત્ દેવતાઃ આસન્ એકાદશ ચ વૈકૃતાત્ ॥ ૮॥

મયા સઞ્ચોદિતાઃ ભાવાઃ સર્વે સંહતિ અકારિણઃ ।
અણ્ડમ્ ઉત્પાદયામાસુઃ મમ આયતનમ્ ઉત્તમમ્ ॥ ૯॥

તસ્મિન્ અહં સમભવમ્ અણ્ડે સલિલસંસ્થિતૌ ।
મમ નાભ્યામ્ અભૂત્ પદ્મં વિશ્વાખ્યં તત્ર ચ આત્મભૂઃ ॥
૧૦॥

સઃ અસૃજત્ તપસા યુક્તઃ રજસા મત્ અનુગ્રહાત્ ।
લોકાન્ સપાલાન્ વિશ્વાત્મા ભૂઃ ભુવઃ સ્વઃ ઇતિ ત્રિધા ॥ ૧૧॥

દેવાનામ્ ઓકઃ આસીત્ સ્વઃ ભૂતાનાં ચ ભુવઃ પદમ્ ।
મર્ત્ય આદીનાં ચ ભૂઃ લોકઃ સિદ્ધાનાં ત્રિતયાત્ પરમ્ ॥
૧૨॥

અધઃ અસુરાણાં નાગાનાં ભૂમેઃ ઓકઃ અસૃજત્ પ્રભુઃ ।
ત્રિલોક્યાં ગતયઃ સર્વાઃ કર્મણાં ત્રિગુણ આત્મનામ્ ॥ ૧૩॥

યોગસ્ય તપસઃ ચ એવ ન્યાસસ્ય ગતયઃ અમલાઃ ।
મહઃ જનઃ તપઃ સત્યં ભક્તિયોગસ્ય મદ્ગતિઃ ॥ ૧૪॥

મયા કાલાત્મના ધાત્રા કર્મયુક્તમ્ ઇદં જગત્ ।

ગુણપ્રવાહઃ એતસ્મિન્ ઉન્મજ્જતિ નિમજ્જતિ ॥ ૧૫॥

અણુઃ બૃહત્ કૃશઃ સ્થૂલઃ યઃ યઃ ભાવઃ પ્રસિધ્યતિ ।
સર્વઃ અપિ ઉભયસંયુક્તઃ પ્રકૃત્યા પુરુષેણ ચ ॥ ૧૬॥

યઃ તુ યસ્ય આદિઃ અન્તઃ ચ સઃ વૈ મધ્યં ચ તસ્ય સન્ ।
વિકારઃ વ્યવહારાર્થઃ યથા તૈજસ પાર્થિવાઃ ॥ ૧૭॥

યત્ ઉપાદાય પૂર્વઃ તુ ભાવઃ વિકુરુતે અપરમ્ ।
આદિઃ અન્તઃ યદા યસ્ય તત્ સત્યમ્ અભિધીયતે ॥ ૧૮॥

પ્રકૃતિઃ હિ અસ્ય ઉપાદાનમ્ આધારઃ પુરુષઃ પરઃ ।
સતઃ અભિવ્યઞ્જકઃ કાલઃ બ્રહ્મ તત્ ત્રિતયં તુ અહમ્ ॥ ૧૯॥

સર્ગઃ પ્રવર્તતે તાવત્ પૌર્વ અપર્યેણ નિત્યશઃ ।
મહાન્ ગુણવિસર્ગ અર્થઃ સ્થિતિ અન્તઃ યાવત્ ઈક્ષણમ્ ॥ ૨૦॥

વિરાટ્ મયા આસાદ્યમાનઃ લોકકલ્પવિકલ્પકઃ ।
પઞ્ચત્વાય વિશેષાય કલ્પતે ભુવનૈઃ સહ ॥ ૨૧॥

અન્ને પ્રલીયતે મર્ત્યમ્ અન્નં ધાનાસુ લીયતે ।
ધાનાઃ ભૂમૌ પ્રલીયન્તે ભૂમિઃ ગન્ધે પ્રલીયતે ॥ ૨૨॥

અપ્સુ પ્રલીયન્તે ગન્ધઃ આપઃ ચ સ્વગુણે રસે ।
લીયતે જ્યોતિષિ રસઃ જ્યોતી રૂપે પ્રલીયતે ॥ ૨૩॥

રૂપં વાયૌ સઃ ચ સ્પર્શે લીયતે સઃ અપિ ચ અમ્બરે ।
અમ્બરં શબ્દતન્માત્રઃ ઇન્દ્રિયાણિ સ્વયોનિષુ ॥ ૨૪॥

યોનિઃ વૈકારિકે સૌમ્ય લીયતે મનસિ ઈશ્વરે ।
શબ્દઃ ભૂતાદિમ્ અપિ એતિ ભૂતાદિઃ મહતિ પ્રભુઃ ॥ ૨૫॥

સઃ લીયતે મહાન્ સ્વેષુ ગુણેષુ ગુણવત્તમઃ ।
તે અવ્યક્તે સમ્પ્રલીયન્તે તત્કલે લીયતે અવ્યયે ॥ ૨૬॥

કાલઃ માયામયે જીવે જીવઃ આત્મનિ મયિ અજે ।
આત્મા કેવલઃ આત્મસ્થઃ વિકલ્પ અપાય લક્ષણઃ ॥ ૨૭॥

એવમ્ અન્વીક્ષમાણસ્ય કથં વૈકલ્પિકઃ ભ્રમઃ ।
મનસઃ હૃદિ તિષ્ઠેત વ્યોમ્નિ ઇવ અર્ક ઉદયે તમઃ ॥ ૨૮॥

એષઃ સાઙ્ખ્યવિધિઃ પ્રોક્તઃ સંશયગ્રન્થિભેદનઃ ।
પ્રતિલોમ અનુલોમાભ્યાં પરાવરદૃશા મયા ॥ ૨૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
પ્રકૃતિપુરુષસાઙ્ખ્યયોગો નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૨૪॥

અથ પઞ્ચવિંશોઽધ્યાયઃ ।
શ્રીભગવાનુવાચ ।
ગુણાનામ્ અસમિશ્રાણાં પુમાન્યેન યથા ભવેત્ ।
તન્મે પુરુષવર્ય ઇઅદમ્ ઉપધારય શંસતઃ ॥ ૧॥

સમઃ દમઃ તિતિક્ષા ઈક્ષા તપઃ સત્યં દયા સ્મૃતિઃ ।
તુષ્ટિઃ ત્યાગઃ અસ્પૃહા શ્રદ્ધા હ્રીઃ દયા આદિઃ સ્વનિર્વૃતિઃ ॥ ૨॥

કામઃ ઈહા મદઃ તૃષ્ણા સ્તમ્ભઃ આશીઃ ભિદા સુખમ્ ।
મદ ઉત્સાહઃ યશઃ પ્રીતિઃ હાસ્યં વીર્યં બલ ઉદ્યમઃ ॥ ૩॥

ક્રોધઃ લોભઃ અનૃતં હિંસા યાચ્ઞા દમ્ભઃ ક્લમઃ કલિઃ ।
શોકમોહૌ વિષાદાર્તી નિદ્રા આશા ભીઃ અનુદ્યમઃ ॥ ૪॥

સત્ત્વસ્ય રજસઃ ચ એતાઃ તમસઃ ચ અનુમૂર્વશઃ ।
વૃત્તયઃ વર્ણિતપ્રાયાઃ સંનિપાતમ્ અથઃ શ્રુણુ ॥ ૫॥

સંનિપાતઃ તુ અહમ્ ઇતિ મમ ઇતિ ઉદ્ધવ યા મતિઃ ।
વ્યવહારઃ સંનિપાતઃ મનોમાત્ર ઇન્દ્રિયાસુભિઃ ॥ ૬॥

ધર્મે ચ અર્થે ચ કામે ચ યદા અસૌ પરિનિષ્ઠિતઃ ।
ગુણાનાં સંનિકર્ષઃ અયં શ્રદ્ધાઃ અતિધનાવહઃ ॥ ૭॥

પ્રવૃત્તિલક્ષણે નિષ્ઠા પુમાન્ યઃ હિ ગૃહાશ્રમે ।
સ્વધર્મે ચ અનુતિષ્ઠેત ગુણાનાં સમિતિઃ હિ સા ॥ ૮॥

પુરુષં સત્ત્વસંયુક્તમ્ અનુમીયાત્ શમ આદિભિઃ ।
કામાદિભી રજોયુક્તં ક્રોધાદ્યૈઃ તમસા યુતમ્ ॥ ૯॥

યદા ભજતિ માં ભક્ત્યા નિરપેક્ષઃ સ્વકર્મભિઃ ।
તં સત્ત્વપ્રકૃતિં વિદ્યાત્ પુરુષં સ્ત્રિયમ્ એવ વા ॥ ૧૦॥

યદા આશિષઃ આશાસ્ય માં ભજેત સ્વકર્મભિઃ ।

તં રજઃપ્રકૃતિં વિદ્યાત્ હિંસામ્ આશાસ્ય તામસમ્ ॥ ૧૧॥

સત્ત્વં રજઃ તમઃ ઇતિ ગુણાઃ જીવસ્ય ન એવ મે ।
ચિત્તજા યૈઃ તુ ભૂતાનાં સજ્જમાનઃ નિબધ્યતે ॥ ૧૨॥

યદેતરૌ જયેત્ સત્ત્વં ભાસ્વરં વિશદં શિવમ્ ।
તદા સુખેન યુજ્યેત ધર્મજ્ઞાન આદિભિઃ પુમાન્ ॥ ૧૩॥

યદા જયેત્ તમઃ સત્ત્વં રજઃ સઙ્ગં ભિદા ચલમ્ ।
તદા દુઃખેન યુજ્યેત કર્મણા યશસા શ્રિયા ॥ ૧૪॥

યદા જયેત્ રજઃ સત્ત્વં તમઃ મૂઢઃ લયં જડમ્ ।
યુજ્યેત શોકમોહાભ્યાં નિદ્રયા હિંસયા આશયા ॥ ૧૫॥

યદા ચિત્તં પ્રસીદેત ઇન્દ્રિયાણાં ચ નિર્વૃતિઃ ।
દેહે અભયં મનોસઙ્ગં તત્ સત્ત્વં વિદ્ધિ મત્પદમ્ ॥ ૧૬॥

વિકુર્વન્ ક્રિયયા ચ અધીર નિર્વૃતિઃ ચ ચેતસામ્ ।
ગાત્રાસ્વાસ્થ્યં મનઃ ભ્રાન્તં રજઃ એતૈઃ નિશામય ॥ ૧૭॥

સીદત્ ચિત્તં વિલીયેત ચેતસઃ ગ્રહણે અક્ષમમ્ ।
મનઃ નષ્ટં તમઃ ગ્લાનિઃ તમઃ તત્ ઉપધારય ॥ ૧૮॥

એધમાને ગુણે સત્ત્વે દેવાનાં બલમ્ એધતે ।
અસુરાણાં ચ રજસિ તમસિ ઉદ્ધવ રક્ષસામ્ ॥ ૧૯॥

સત્ત્વાત્ જગરણં વિદ્યાત્ રજસા સ્વપ્નમ્ આદિશેત્ ।
પ્રસ્વાપં તમસા જન્તોઃ તુરીયં ત્રિષુ સન્તતમ્ ॥ ૨૦॥

ઉપર્યુપરિ ગચ્છન્તિ સત્ત્વેન આબ્રહ્મણઃ જનાઃ ।
તમસા અધઃ અધઃ આમુખ્યાત્ રજસા અન્તરચારિણઃ ॥ ૨૧॥

સત્ત્વે પ્રલીનાઃ સ્વઃ યાન્તિ નરલોકં રજોલયાઃ ।
તમોલયાઃ તુ નિરયં યાન્તિ મામ્ એવ નિર્ગુણાઃ ॥ ૨૨॥

મદર્પણં નિષ્ફલં વા સાત્વિકં નિજકર્મ તત્ ।
રાજસં ફલસઙ્કલ્પં હિંસાપ્રાયાદિ તામસમ્ ॥ ૨૩॥

કૈવલ્યં સાત્વિકં જ્ઞાનં રજઃ વૈકલ્પિકં ચ યત્ ।
પ્રાકૃતં તામસં જ્ઞાનં મન્નિષ્ઠં નિર્ગુણં સ્મૃતમ્ ॥ ૨૪॥

વનં તુ સાત્વિકઃ વાસઃ ગ્રામઃ રાજસઃ ઉચ્યતે ।
તામસં ધૂતસદનં મન્નિકેતનં તુ નિર્ગુણમ્ ॥ ૨૫॥

સાત્વિકઃ કારકઃ અસઙ્ગી રાગાન્ધઃ રાજસઃ સ્મૃતઃ ।
તામસઃ સ્મૃતિવિભ્રષ્ટઃ નિર્ગુણઃ મદપાશ્રયઃ ॥ ૨૬॥

સાત્ત્વિકી આધ્યાત્મિકી શ્રદ્ધા કર્મશ્રદ્ધા તુ રાજસી ।
તામસ્યધર્મે યા શ્રદ્ધા મત્સેવાયાં તુ નિર્ગુણા ॥ ૨૭॥

પથ્યં પૂતમ્ અનાયઃ તમ્ આહાર્યં સાત્ત્વિકં સ્મૃતમ્ ।
રાજસં ચ ઇન્દ્રિયપ્રેષ્ઠં તામસં ચ આર્તિદ અશુચિ ॥ ૨૮॥

સાત્ત્વિકં સુખમ્ આત્મોત્થં વિષયોત્થં તુ રાજસમ્ ।
તામસં મોહદૈનોત્થં નિર્ગુણં મદપાશ્રયમ્ ॥ ૨૯॥

દ્રવ્યં દેશઃ ફલં કાલઃ જ્ઞાનં કર્મ ચ કારકાઃ ।
શ્રદ્ધા અવસ્થા આકૃતિઃ નિષ્ઠા ત્રૈગુણ્યઃ સર્વઃ એવ હિ ॥

૩૦॥

સર્વે ગુણમયાઃ ભાવાઃ પુરુષ અવ્યક્ત ધિષ્ઠિતાઃ ॥ ૩૧॥

એતાઃ સંસૃતયઃ પુંસઃ ગુણકર્મનિબન્ધનાઃ ।
યેન ઇમે નિર્જિતાઃ સૌમ્ય ગુણાઃ જીવેન ચિત્તજાઃ ।
ભક્તિયોગેન મન્નિષ્ઠઃ મદ્ભાવાય પ્રપદ્યતે ॥ ૩૨॥

તસ્માત્ અહમ્ ઇમં લબ્ધ્વા જ્ઞાનવિજ્ઞાનસંભવમ્ ।
ગુણસઙ્ગં વિનિર્ધૂય માં ભજન્તુ વિચક્ષણાઃ ॥ ૩૩॥

નિઃસઙ્ગઃ માં ભજેત્ વિદ્વાન્ અપ્રમત્તઃ જિતેન્દ્રિયઃ ।
રજઃ તમઃ ચ અભિજયેત્ સત્ત્વસંસેવયા મુનિઃ ॥ ૩૪॥

સત્ત્વં ચ અભિજયેત્ યુક્તઃ નૈરપેક્ષ્યેણ શાન્તધીઃ ।
સમ્પદ્યતે ગુણૈઃ મુક્તઃ જીવઃ જીવં વિહાય મામ્ ॥ ૩૫॥

જીવઃ જીવવિનિર્મુક્તઃ ગુણૈઃ ચ આશયસંભવૈઃ ।
મયા એવ બ્રહ્મણા પૂર્ણઃ ન બહિઃ ન અન્તરઃ ચરેત્ ॥ ૩૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
ગુણનિર્ગુણનિરૂપણં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૨૫॥

અથ ષડ્વિંશોઽધ્યાયઃ ।

શ્રીભગવાન્ ઉવાચ ।

મત્ લક્ષણમ્ ઇમં કાયં લબ્ધ્વા મદ્ધર્મઃ આસ્થિતઃ ।
આનન્દં પરમાત્માનમ્ આત્મસ્થં સમુપૈતિ મામ્ ॥ ૧॥

ગુણમય્યાઃ જીવયોન્યાઃ વિમુક્તઃ જ્ઞાનનિષ્ઠયા ।
ગુણેષુ માયામાત્રેષુ દૃશ્યમાનેષુ અવસ્તુતઃ ।
વર્તમાનઃ અપિ ન પુમાન્ યુજ્યતે અવસ્તુભિઃ ગુણૈઃ ॥ ૨॥

સઙ્ગં ન કુર્યાત્ અસતાં શિશ્ન ઉદર તૃપાં ક્વચિત્ ।
તસ્ય અનુગતઃ તમસિ અન્ધે પતતિ અન્ધ અનુગાન્ધવત્ ॥ ૩॥

ઐલઃ સમ્રાટ્ ઇમાં ગાથામ્ અગાયત બૃહચ્છ્રવાઃ ।
ઉર્વશી વિરહાત્ મુહ્યન્ નિર્વિણ્ણઃ શોકસંયમે ॥ ૪॥

ત્યક્ત્વા આત્માનં વ્રજન્તીં તાં નગ્નઃ ઉન્મત્તવત્ નૃપઃ ।
વિલપન્ અન્વગાત્ જાયે ઘોરે તિષ્ઠ ઇતિ વિક્લવઃ ॥ ૫॥

કામાન્ અતૃપ્તઃ અનુજુષન્ ક્ષુલ્લકાન્ વર્ષયામિનીઃ ।
ન વેદ યાન્તીઃ ન અયાન્તીઃ ઉર્વશી આકૃષ્ટચેઅતનઃ ॥ ૬॥

ઐલઃ ઉવાચ ।

અહો મે મોહવિસ્તારઃ કામકશ્મલચેતસઃ ।
દેવ્યાઃ ગૃહીતકણ્ઠસ્ય ન આયુઃખણ્ડાઃ ઇમે સ્મૃતાઃ ॥ ૭॥

ન અહં વેદ અભિનિર્મુક્તઃ સૂર્યઃ વા અભ્યુદિતઃ અમુયા ।
મુષિતઃ વર્ષપૂગાનાં બત અહાનિ ગતાનિ ઉત ॥ ૮॥

અહો મે આત્મસંમોહઃ યેન આત્મા યોષિતાં કૃતઃ ।
ક્રીડામૃગઃ ચક્રવર્તી નરદેવશિખામણિઃ ॥ ૯॥

સપરિચ્છદમ્ આત્માનં હિત્વા તૃણમ્ ઇવ ઈશ્વરમ્ ।
યાન્તીં સ્ત્રિયં ચ અન્વગમં નગ્નઃ ઉન્મત્તવત્ રુદન્ ॥ ૧૦॥

કુતઃ તસ્ય અનુભાવઃ સ્યાત્ તેજઃ ઈશત્વમ્ એવ વા ।
યઃ અન્વગચ્છં સ્ત્રિયં યાન્તીં ખરવત્ પાદતાડિતઃ ॥ ૧૧॥

કિં વિદ્યયા કિં તપસા કિં ત્યાગેન શ્રુતેન વા ।

કિં વિવિક્તેન મૌનેન સ્ત્રીભિઃ યસ્ય મનઃ હૃતમ્ ॥ ૧૨॥

સ્વાર્થસ્ય અકોવિદં ધિઙ્ માં મૂર્ખં પણ્ડિત માનિનમ્ ।
યઃ અહમ્ ઈશ્વરતાં પ્રાપ્ય સ્ત્રીભિઃ ગો ખરવત્ જિતઃ ॥ ૧૩॥

સેવતઃ વર્ષપૂગાત્ મે ઉર્વશ્યઃ અધરાસવમ્ ।
ન તૃપ્યતિ આત્મભૂઃ કામઃ વહ્નિઃ આહુતિભિઃ યથા ॥ ૧૪॥

પુંશ્ચલ્યા અપહૃતં ચિત્તં કોન્વન્યઃ મોચિતું પ્રભુઃ ।
આત્મારામેશ્વરમ્ ઋતે ભગવન્તમ્ અધોક્ષજમ્ ॥ ૧૫॥

બોધિતસ્ય અપિ દેવ્યા મે સૂક્તવાક્યેન દુર્મતેઃ ।
મનોગતઃ મહામોહઃ ન અપયાતિ અજિતાત્મનઃ ॥ ૧૬॥

કિમ્ એતયા નઃ અપકૃતં રજ્જ્વા વા સર્પચેતસઃ ।
રજ્જુસ્વરૂપ અવિદુષઃ યઃ અહં યત્ અજિતેન્દ્રિયઃ ॥ ૧૭॥

ક્વ અયં મલોમસઃ કાયઃ દૌર્ગન્ધિ આદિ આત્મકઃ અશુચિઃ ।
ક્વ ગુણાઃ સૌમનસ્ય આદ્યાઃ હિ અધ્યાસઃ અવિદ્યયા કૃતઃ ॥ ૧૮॥

પિત્રોઃ કિં સ્વં નુ ભાર્યાયાઃ સ્વામિનઃ અગ્નેઃ શ્વગૃધ્રયોઃ ।
કિમ્ આત્મનઃ કિં સુહૃદામ્ ઇતિ યઃ ન અવસીયતે ॥ ૧૯॥

તસ્મિન્ કલેવરે અમેધ્યે તુચ્છનિષ્ઠે વિષજ્જતે ।
અહો સુભદ્રં સુનસં સુસ્મિતં ચ મુખં સ્ત્રિયઃ ॥ ૨૦॥

ત્વઙ્ માંસ રુધિર સ્નાયુ મેદો મજ્જા અસ્થિ સંહતૌ ।
વિણ્મૂત્રપૂયે રમતાં કૃમીણાં કિયત્ અન્તરમ્ ॥ ૨૧॥

અથ અપિ ન ઉપસજ્જેત સ્ત્રીષુ સ્ત્રૈણેષુ ચ અર્થવિત્ ।
વિષય ઇન્દ્રિય સંયોગાત્ મનઃ ક્ષુભ્યતિ ન અન્યથા ॥ ૨૨॥

અદૃષ્ટાત્ અશ્રુતાત્ ભાવાત્ ન ભાવઃ ઉપજાયતે ।
અસમ્પ્રયુઞ્જતઃ પ્રાણાન્ શામ્યતિ સ્તિમિતં મનઃ ॥ ૨૩॥

તસ્માત્ સઙ્ગઃ ન કર્તવ્યઃ સ્ત્રીષુ સ્ત્રૈણેષુ ચ ઇન્દ્રિયૈઃ ।
વિદુષાં ચ અપિ અવિશ્રબ્ધઃ ષડ્વર્ગઃ કિમુ માદૃશામ્ ॥

૨૪॥

શ્રીભગવાન્ ઉવાચ ।

એવં પ્રગાયન્ નૃપદેવદેવઃ
    સઃ ઉર્વશીલોકમ્ અથઃ વિહાય ।
આત્માનમ્ આત્મનિ અવગમ્ય માં વૈ
    ઉપારમત્ જ્ઞાનવિધૂતમોહઃ ॥ ૨૫॥

તતઃ દુઃસઙ્ગમ્ ઉત્સૃજ્ય સત્સુ સજ્જેત બુદ્ધિમાન્ ।
સન્તઃ એતસ્ય છિન્દન્તિ મનોવ્યાસઙ્ગમુક્તિભિઃ ॥ ૨૬॥

સન્તઃ અનપેક્ષાઃ મચ્ચિત્તાઃ પ્રશાન્તાઃ સમદર્શિનઃ ।
નિર્મમાઃ નિરહઙ્કારાઃ નિર્દ્વન્દ્વાઃ નિષ્પરિગ્રહાઃ ॥ ૨૭॥

તેષુ નિત્યં મહાભાગઃ મહાભાગેષુ મત્કથાઃ ।
સંભવન્તિ હિતા નૃણાં જુષતાં પ્રપુનન્તિ અઘમ્ ॥ ૨૮॥

તાઃ યે શ્રુણ્વન્તિ ગાયન્તિ હિ અનુમોદન્તિ ચ અદૃતાઃ ।
મત્પરાઃ શ્રદ્ધાનાઃ ચ ભક્તિં વિન્દન્તિ તે મયિ ॥ ૨૯॥

ભક્તિં લબ્ધવતઃ સાધોઃ કિમ્ અન્યત્ અવશિષ્યતે ।
મયિ અનન્તગુણે બ્રહ્મણિ આનન્દ અનુભવ આત્મનિ ॥ ૩૦॥

યથા ઉપશ્રયમાણસ્ય ભગવન્તં વિભાવસુમ્ ।
શીતં ભયં તમઃ અપિ એતિ સાધૂન્ સંસેવતઃ તથા ॥ ૩૧॥

નિમજ્જ્ય ઉન્મજ્જ્યતાં ઘોરે ભવાબ્ધૌ પરમ અયનમ્ ।
સન્તઃ બ્રહ્મવિદઃ શાન્તાઃ નૌઃ દૃઢ ઇવ અપ્સુ મજ્જતામ્ ॥ ૩૨॥

અન્નં હિ પ્રાણિનાં પ્રાણઃ આર્તાનાં શરણં તુ અહમ્ ।
ધર્મઃ વિત્તં નૃણાં પ્રેત્ય સન્તઃ અર્વાક્ બિભ્યતઃ અરણમ્ ॥

૩૩॥

સન્તઃ દિશન્તિ ચક્ષૂંષિ બહિઃ અર્કઃ સમુત્થિતઃ ।
દેવતાઃ બાન્ધવાઃ સન્તઃ સન્તઃ આત્મા અહમ્ એવ ચ ॥ ૩૪॥

વૈતસેનઃ તતઃ અપિ એવમ્ ઉર્વશ્યા લોકનિઃસ્પૃહઃ ।
મુક્તસઙ્ગઃ મહીમ્ એતામ્ આત્મારામઃ ચચાર હ ॥ ૩૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
ઐલગીતં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૨૬॥

અથ સપ્તવિંશોઽધ્યાયઃ ।

ઉદ્ધવઃ ઉવાચ ।

ક્રિયાયોગં સમાચક્ષ્વ ભવત્ આરાધનં પ્રભો ।

યસ્માત્ ત્વાં યે યથા અર્ચન્તિ સાત્વતાઃ સાત્વતર્ષભ ॥ ૧॥

એતત્ વદન્તિ મુનયઃ મુહુઃ નિઃશ્રેયસં નૃણામ્ ।

નારદઃ ભગવાન્ વ્યાસઃ આચાર્યઃ અઙ્ગિરસઃ સુતઃ ॥ ૨॥

નિઃસૃતં તે મુખામ્ભોજાદ્યત્ આહ ભગવાન્ અજઃ ।

પુત્રેભ્યઃ ભૃગુમુખ્યેભ્યઃ દેવ્યૈ ચ ભગવાન્ ભવઃ ॥ ૩॥

એતત્ વૈ સર્વવર્ણાનામ્ આશ્રમાણાં ચ સંમતમ્ ।

શ્રેયસામ્ ઉત્તમં મન્યે સ્ત્રીશૂદ્રાણાં ચ માનદ ॥ ૪॥

એતત્ કમલપત્રાક્ષ કર્મબન્ધવિમોચનમ્ ।

ભક્તાય ચ અનુરક્તાય બ્રૂહિ વિશ્વેશ્વર ઈશ્વર ॥ ૫॥

શ્રીભગવાન્ ઉવાચ ।

નહિ અન્તઃ અનન્તપારસ્ય કર્મકાણ્ડસ્ય ચ ઉદ્ધવ ।

સંક્ષિપ્તં વર્ણયિષ્યામિ યથાવત્ અનુપૂર્વશઃ ॥ ૬॥

વૈદિકઃ તાન્ત્રિકઃ મિશ્રઃ ઇતિ મે ત્રિવિધઃ મખઃ ।

ત્રયાણામ્ ઈપ્સિતેન એવ વિધિના માં સમર્ચયેત્ ॥ ૭॥

યદા સ્વનિગમેન ઉક્તં દ્વિજત્વં પ્રાપ્ય પૂરુષઃ ।

યથા યજેત માં ભક્ત્યા શ્રદ્ધયા તત્ નિબોધ મે ॥ ૮॥

અર્ચાયાં સ્થણ્ડિલે અગ્નૌ વા સૂર્યે વા અપ્સુ હૃદિ દ્વિજઃ ।

દ્રવ્યેણ ભક્તિયુક્તઃ અર્ચેત્ સ્વગુરું મામ્ અમાયયા ॥ ૯॥

પૂર્વં સ્નાનં પ્રકુર્વીત ધૌતદન્તઃ અઙ્ગશુદ્ધયે ।

ઉભયૈઃ અપિ ચ સ્નાનં મન્ત્રૈઃ મૃદ્ગ્રહણાદિના ॥ ૧૦॥

સન્ધ્યા ઉપાસ્તિ આદિ કર્માણિ વેદેન અચોદિતાનિ મે ।

પૂજાં તૈઃ કલ્પયેત્ સમ્યક્ સઙ્કલ્પઃ કર્મપાવનીમ્ ॥ ૧૧॥

શૈલી દારુમયી લૌહી લેપ્યા લેખ્યા ચ સૈકતી ।

મનોમયી મણિમયી પ્રતિમા અષ્ટવિધા સ્મૃતા ॥ ૧૨॥

ચલ અચલ ઇતિ દ્વિવિધા પ્રતિષ્ઠા જીવમન્દિરમ્ ।

ઉદ્વાસ આવાહને ન સ્તઃ સ્થિરાયામ્ ઉદ્ધવ અર્ચને ॥ ૧૩॥

અસ્થિરાયાં વિકલ્પઃ સ્યાત્ સ્થણ્ડિલે તુ ભવેત્ દ્વયમ્ ।
સ્નપનં તુ અવિલેપ્યાયામ્ અન્યત્ર પરિમાર્જનમ્ ॥ ૧૪॥

દ્રવ્યૈઃ પ્રસિદ્ધ્યૈઃ મત્ યાગઃ પ્રતિમાદિષુ અમાયિનઃ ।
ભક્તસ્ય ચ યથાલબ્ધૈઃ હૃદિ ભાવેન ચ એવ હિ ॥ ૧૫॥

સ્નાન અલઙ્કરણં પ્રેષ્ઠમ્ અર્ચાયામ્ એવ તુ ઉદ્ધવ ।
સ્થણ્ડિલે તત્ત્વવિન્યાસઃ વહ્નૌ આજ્યપ્લુતં હવિઃ ॥ ૧૬॥

સૂર્યે ચ અભ્યર્હણં પ્રેષ્ઠં સલિલે સલિલ આદિભિઃ ।
શ્રદ્ધયા ઉપાહૃતં પ્રેષ્ઠં ભક્તેન મમ વારિ અપિ ॥ ૧૭॥

ભૂર્યપિ અભક્ત ઉપહૃતં ન મે તોષાય કલ્પતે ।
ગન્ધઃ ધૂપઃ સુમનસઃ દીપઃ અન્ન આદ્ય ચ કિં પુનઃ ॥ ૧૮॥

શુચિઃ સંભૃતસંભારઃ પ્રાક્ દર્ભૈઃ કલ્પિત આસનઃ ।
આસીનઃ પ્રાક્ ઉદક્ વા અર્ચેત્ અર્ચાયામ્ અથ સંમુખઃ ॥ ૧૯॥

કૃતન્યાસઃ કૃતન્યાસાં મદર્ચાં પાણિના મૃજેત્ ।
કલશં પ્રોક્ષણીયં ચ યથાવત્ ઉપસાધયેત્ ॥ ૨૦॥

તત્ અદ્ભિઃ દેવયજનં દ્રવ્યાણિ આત્માનમ્ એવ ચ ।
પ્રોક્ષ્ય પાત્રાણિ ત્રીણિ અદ્ભિઃ તૈઃ તૈઃ દ્રવ્યૈઃ ચ સાધયેત્ ॥ ૨૧॥

પાદ્ય અર્ઘ આચમનીયાર્થં ત્રીણિ પાત્રાણિ દૈશિકઃ ।
હૃદા શીર્ષ્ણા અથ શિખયા ગાયત્ર્યા ચ અભિમન્ત્રયેત્ ॥

૨૨॥

પિણ્ડે વાયુ અગ્નિ સંશુદ્ધે હૃત્પદ્મસ્થાં પરાં મમ ।
અણ્વીં જીવકલાં ધ્યાયેત્ નાદ અન્તે સિદ્ધભાવિતામ્ ॥ ૨૩॥

તયા આત્મભૂતયા પિણ્ડે વ્યાપ્તે સમ્પૂજ્ય તન્મયઃ ।
આવાહ્ય અર્ચ આદિષુ સ્થાપ્ય ન્યસ્ત અઙ્ગં માં પ્રપૂજયેત્ ॥

૨૪॥

પાદ્ય ઉપસ્પર્શ અર્હણ આદીન્ ઉપચારાન્ પ્રકલ્પયેત્ ।
ધર્માદિભિઃ ચ નવભિઃ કલ્પયિત્વા આસનં મમ ॥ ૨૫॥

પદ્મમ્ અષ્ટદલં તત્ર કર્ણિકાકેસર ઉજ્જ્વલમ્ ।
ઉભાભ્યાં વેદતન્ત્રાભ્યાં મહ્યં તુ ઉભયસિદ્ધયે ॥ ૨૬॥

સુદર્શનં પાઞ્ચજન્યં ગદાસીષુધનુઃ હલાન્ ।
મુસલં કૌસ્તુભં માલાં શ્રીવત્સં ચ અનુપૂજયેત્ ॥ ૨૭॥

નન્દં સુનન્દં ગરુડં પ્રચણ્ડં ચણ્ડમ્ એવ ચ ।
મહાબલં બલં ચ એવ કુમુદં કુમુદેક્ષણમ્ ॥ ૨૮॥

દુર્ગાં વિનાયકં વ્યાસં વિષ્વક્સેનં ગુરૂન્ સુરાન્ ।
સ્વે સ્વે સ્થાને તુ અભિમુખાન્ પૂજયેત્ પ્રોક્ષણ આદિભિઃ ॥ ૨૯॥

ચન્દન ઉશીર કર્પૂર કુઙ્કુમ અગરુ વાસિતૈઃ ।
સલિલૈઃ સ્નાપયેત્ મન્ત્રૈઃ નિત્યદા વિભવે સતિ ॥ ૩૦॥

સ્વર્ણઘર્મ અનુવાકેન મહાપુરુષવિદ્યયા ।
પૌરુષેણ અપિ સૂક્તેન સામભીઃ રાજનાદિભિઃ ॥ ૩૧॥

વસ્ત્ર ઉપવીત આભરણ પત્ર સ્રક્ ગન્ધ લેપનૈઃ ।
અલઙ્કુર્વીત સપ્રેમ મદ્ભક્તઃ માં યથા ઉચિતમ્ ॥ ૩૨॥

પાદ્યમ્ આચમનીયં ચ ગન્ધં સુમનસઃ અક્ષતાન્ ।
ધૂપ દીપ ઉપહાર્યાણિ દદ્યાત્ મે શ્રદ્ધયા અર્ચકઃ ॥ ૩૩॥

ગુડપાયસસર્પીષિ શષ્કુલિ આપૂપ મોદકાન્ ।
સંયાવ દધિ સૂપાં ચ નૈવેદ્યં સતિ કલ્પયેત્ ॥ ૩૪॥

અભ્યઙ્ગ ઉન્મર્દન આદર્શ દન્તધૌ અભિષેચનમ્ ।
અન્નદ્ય ગીત નૃત્યાદિ પર્વણિ સ્યુઃ ઉતાન્વહમ્ ॥ ૩૫॥

વિધિના વિહિતે કુણ્ડે મેખલાગર્તવેદિભિઃ ।
અગ્નિમ્ આધાય પરિતઃ સમૂહેત્ પાણિના ઉદિતમ્ ॥ ૩૬॥

પરિસ્તીર્ય અથ પર્યુક્ષેત્ અન્વાધાય યથાવિધિ ।
પ્રોક્ષણ્યા આસાદ્ય દ્રવ્યાણિ પ્રોક્ષ્યાગ્નૌ ભાવયેત મામ્ ॥ ૩૭॥

તમજામ્બૂનદપ્રખ્યં શઙ્ખચક્રગદામ્બુજૈઃ ।
લસત્ ચતુર્ભુજં શાન્તં પદ્મકિઞ્જલ્કવાસસમ્ ॥ ૩૮॥

સ્ફુરત્ કિરીટ કટક કટિસૂત્રવર અઙ્ગદમ્ ।
શ્રીવત્સવક્ષસં ભ્રાજત્ કૌસ્તુભં વનમાલિનમ્ ॥ ૩૯॥

ધ્યાયન્ અભ્યર્ચ્ય દારૂણિ હવિષા અભિઘૃતાનિ ચ ।
પ્રાસ્ય આજ્યભાગૌ આઘારૌ દત્ત્વા ચ આજ્યપ્લુતં હવિઃ ॥ ૪૦॥

જુહુયાત્ મૂલમન્ત્રેણ ષોડશર્ચ અવદાનતઃ ।
ધર્માદિભ્યઃ યથાન્યાયં મન્ત્રૈઃ સ્વિષ્ટિકૃતં બુધઃ ॥ ૪૧॥

અભ્યર્ચ્ય અથ નમસ્કૃત્ય પાર્ષદેભ્યઃ બલિં હરેત્ ।
મૂલમન્ત્રં જપેત્ બ્રહ્મ સ્મરન્ નારાયણ આત્મકમ્ ॥ ૪૨॥

દત્ત્વા આચમનમ્ ઉચ્છેષં વિષ્વક્સેનાય કલ્પયેત્ ।
મુખવાસં સુરભિમત્ તામ્બૂલાદ્યમ્ અથ અર્હયેત્ ॥ ૪૨॥

ઉપગાયન્ ગૃણન્ નૃત્યન્ કર્માણિ અભિનયન્ મમ ।
મત્કથાઃ શ્રાવયન્ શ્રુણ્વન્ મુહૂર્તં ક્ષણિકઃ ભવેત્ ॥ ૪૪।
સ્તવૈઃ ઉચ્ચાવચૈઃ સ્તોત્રૈઃ પૌરાણૈઃ પ્રકૃતૈઃ અપિ ।
સ્તુત્વા પ્રસીદ ભગવન્ ઇતિ વન્દેત દણ્ડવત્ ॥ ૪૫॥

શિરઃ મત્ પાદયોઃ કૃત્વા બાહુભ્યાં ચ પરસ્પરમ્ ।
પ્રપન્નં પાહિ મામ્ ઈશ ભીતં મૃત્યુગ્રહ અર્ણવાત્ ॥ ૪૬॥

ઇતિ શેષાં મયા દત્તાં શિરસિ આધાય સાદરમ્ ।
ઉદ્વાસયેત્ ચેત્ ઉદ્વાસ્યં જ્યોતિઃ જ્યોતિષિ તત્ પુનઃ ॥ ૪૭॥

અર્ચાદિષુ યદા યત્ર શ્રદ્ધા માં તત્ર ચ અર્ચયેત્ ।
સર્વભૂતેષુ આત્મનિ ચ સર્વ આત્મા અહમ્ અવસ્થિતઃ ॥ ૪૮॥

એવં ક્રિયાયોગપથૈઃ પુમાન્ વૈદિકતાન્ત્રિકૈઃ ।
અર્ચન્ ઉભયતઃ સિદ્ધિં મત્તઃ વિન્દતિ અભીપ્સિતામ્ ॥ ૪૯॥

મદર્ચાં સમ્પ્રતિષ્ઠાપ્ય મન્દિરં કારયેત્ દૃઢમ્ ।
પુષ્પ ઉદ્યાનાનિ રમ્યાણિ પૂજા યાત્રા ઉત્સવ આશ્રિતાન્ ॥ ૫૦॥

પૂજાદીનાં પ્રવાહાર્થં મહાપર્વસુ અથ અન્વહમ્ ।
ક્ષેત્રાપણપુરગ્રામાન્ દત્ત્વા મત્ સાર્ષ્ટિતામ્ ઇયાત્ ॥ ૫૧॥

પ્રતિષ્ઠયા સાર્વભૌમંસદ્મના ભુવનત્રયમ્ ।
પૂજાદિના બ્રહ્મલોકં ત્રિભિઃ મત્ સામ્યતામ્ ઇયાત્ ॥ ૫૨॥

મામ્ એવ નૈરપેક્ષ્યેણ ભક્તિયોગેન વિન્દતિ ।

ભક્તિયોગં સઃ લભતે એવં યઃ પૂજયેત મામ્ ॥ ૫૩॥

યઃ સ્વદત્તાં પરૈઃ દત્તં હરેત સુરવિપ્રયોઃ ।
વૃત્તિં સઃ જાયતે વિડ્ભુક્ વર્ષાણામ્ અયુતાયુતમ્ ॥ ૫૪॥

કર્તુઃ ચ સારથેઃ હેતોઃ અનુમોદિતુઃ એવ ચ ।
કર્મણાં ભાગિનઃ પ્રેત્ય ભૂયઃ ભૂયસિ તત્ફલમ્ ॥ ૫૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે શ્રીકૃષ્ણોદ્ધવસંવાદે
સપ્તવિંશોઽધ્યાયઃ ॥ ૨૭॥

અથ અષ્ટવિંશઃ અધ્યાયઃ ।
શ્રીભગવાન્ ઉવાચ ।
પરસ્વભાવકર્માણિ ન પ્રશંસેત્ ન ગર્હયેત્ ।
વિશ્વમ્ એકાત્મકં પશ્યન્ પ્રકૃત્યા પુરુષેણ ચ ॥ ૧॥

પરસ્વભાવકર્માણિ યઃ પ્રશંસતિ નિન્દતિ ।
સઃ આશુ ભ્રશ્યતે સ્વાર્થાત્ અસત્ય અભિનિવેશતઃ ॥ ૨॥

તૈજસે નિદ્રયા આપન્ને પિણ્ડસ્થઃ નષ્ટચેતનઃ ।
માયાં પ્રાપ્નોતિ મૃત્યું વા તદ્વત્ નાનાર્થદૃક્ પુમાન્ ॥ ૩॥

કિં ભદ્રં કિમ્ અભદ્રં વા દ્વૈતસ્ય અવસ્તુનઃ કિયત્ ।
વાચા ઉદિતં તત્ અનૃતં મનસા ધ્યાતમ્ એવ ચ ॥ ૪॥

છાયાપ્રત્યાહ્વયાભાસા હિ અસન્તઃ અપિ અર્થકારિણઃ ।
એવં દેહાદયઃ ભાવાઃ યચ્છન્તિ આમૃત્યુતઃ ભયમ્ ॥ ૫॥

આત્મા એવ તત્ ઇદં વિશ્વં સૃજ્યતે સૃજતિ પ્રભુઃ ।
ત્રાયતે ત્રાતિ વિશ્વાત્મા હ્રિયતે હરતિ ઈશ્વરઃ ॥ ૬॥

તસ્માત્ નહિ આત્મનઃ અન્યસ્માત્ અન્યઃ ભાવઃ નિરૂપિતઃ ।
નિરૂપિતેયં ત્રિવિધા નિર્મૂલા ભાતિઃ આત્મનિ ।
ઇદં ગુણમયં વિદ્ધિ ત્રિવિધં માયયા કૃતમ્ ॥ ૭॥

એતત્ વિદ્વાન્ મદુદિતં જ્ઞાનવિજ્ઞાનનૈપુણમ્ ।
ન નિન્દતિ ન ચ સ્તૌતિ લોકે ચરતિ સૂર્યવત્ ॥ ૮॥

પ્રત્યક્ષેણ અનુમાનેન નિગમેન આત્મસંવિદા ।

આદિ અન્તવત્ અસત્ જ્ઞાત્વા નિઃસઙ્ગઃ વિચરેત્ ઇહ ॥ ૯॥

ઉદ્ધવઃ ઉવાચ ।
ન એવ આત્મનઃ ન દેહસ્ય સંસૃતિઃ દ્રષ્ટૃદૃશ્યયોઃ ।
અનાત્મસ્વદૃશોઃ ઈશ કસ્ય સ્યાત્ ઉપલભ્યતે ॥ ૧૦॥

આત્મા અવ્યયઃ અગુણઃ શુદ્ધઃ સ્વયઞ્જ્યોતિઃ અનાવૃતઃ ।
અગ્નિવત્ દારુવત્ દેહઃ કસ્ય ઇહ સંસૃતિઃ ॥ ૧૧॥

શ્રીભગવાન્ ઉવાચ ।
યાવત્ દેહ ઇન્દ્રિય પ્રાણૈઃ આત્મનઃ સંનિકર્ષણમ્ ।
સંસારઃ ફલવાન્ તાવત્ અપાર્થઃ અપિ અવિવેકિનઃ ॥ ૧૨॥

અર્થે હિ અવિદ્યમાને અપિ સંસૃતિઃ ન નિવર્તતે ।
ધ્યાયતઃ વિષયાન્ અસ્ય સ્વપ્ને અનર્થ આગમઃ યથા ॥ ૧૩॥

યથા હિ અપ્રતિબુદ્ધસ્ય પ્રસ્વાપઃ બહુ અનર્થભૃત્ ।
સઃ એવ પ્રતિબુદ્ધસ્ય ન વૈ મોહાય કલ્પતે ॥ ૧૪॥

શોક હર્ષ ભય ક્રોધ લોભ મોહ સ્પૃહાદયઃ ।
અહઙ્કારસ્ય દૃશ્યન્તે જન્મ મૃત્યુઃ ચ ન આત્મનઃ ॥ ૧૫॥

દેહ ઇન્દ્રિય પ્રાણ મનઃ અભિમાનઃ
    જીવઃ અન્તરાત્મા ગુણકર્મ મૂર્તિઃ ।
સૂત્રં મહાન્ ઇતિ ઉરુધા ઇવ ગીતઃ
    સંસારઃ આધાવતિ કાલતન્ત્રઃ ॥ ૧૬॥

અમૂલમ્ એતત્ બહુરૂપ રૂપિતં
    મનોવચઃપ્રાણશરીરકર્મ ।
જ્ઞાનાસિના ઉપાસનયા શિતેન
    છિત્ત્વા મુનિઃ ગાં વિચરતિ અતૃષ્ણઃ ॥ ૧૭॥

જ્ઞાનં વિવેકઃ નિગમઃ તપઃ ચ
    પ્રત્યક્ષમ્ ઐતિહ્યમ્ અથ અનુમાનમ્ ।
આદિ અન્તયોઃ અસ્ય યત્ એવ કેવલમ્
    કાલઃ ચ હેતુઃ ચ તત્ એવ મધ્યે ॥ ૧૮॥

યથા હિરણ્યં સ્વકૃતં પુરસ્તાત્
    પશ્ચાત્ ચ સર્વસ્ય હિરણ્મયસ્ય ।

તત્ એવ મધ્યે વ્યવહાર્યમાણમ્
　　નાનાપદેશૈઃ અહમ્ અસ્ય તદ્વત્ ॥ ૧૯॥

વિજ્ઞાનમ્ એતત્ ત્રિયવસ્તમ્ અઙ્ગ
　　ગુણત્રયં કારણ કાર્ય કર્તૃ ।
સમન્વયેન વ્યતિરેકતઃ ચ
　　યેન એવ તુર્યેણ તત્ એવ સત્યમ્ ॥ ૨૦॥

ન યત્ પુરસ્તાત્ ઉત યત્ ન પશ્ચાત્
　　મધ્યે ચ તત્ ન વ્યપદેશમાત્રમ્ ।
ભૂતં પ્રસિદ્ધં ચ પરેણ યદ્યત્
　　તત્ એવ તત્ સ્યાત્ ઇતિ મે મનીષા ॥ ૨૧॥

અવિદ્યમાનઃ અપિ અવભાસતે યઃ
　　વૈકારિકઃ રાજસસર્ગઃ એષઃ ।
બ્રહ્મ સ્વયઞ્જ્યોતિઃ અતઃ વિભાતિ
　　બ્રહ્મ ઇન્દ્રિય અર્થ આત્મ વિકાર ચિત્રમ્ ॥ ૨૨॥

એવં સ્ફુટં બ્રહ્મવિવેકહેતુભિઃ
　　પરાપવાદેન વિશારદેન ।
છિત્ત્વા આત્મસન્દેહમ્ ઉપારમેત
　　સ્વાનન્દતુષ્ટઃ અખિલ કામુકેભ્યઃ ॥ ૨૩॥

ન આત્મા વપુઃ પાર્થિવમ્ ઇન્દ્રિયાણિ
　　દેવાઃ હિ અસુઃ વાયુજલં હુતાશઃ ।
મનઃ અન્નમાત્રં ધિષણા ચ સત્ત્વમ્
　　અહંકૃતિઃ ખં ક્ષિતિઃ અર્થસામ્યમ્ ॥ ૨૪॥

સમાહિતૈઃ કઃ કરણૈઃ ગુણાત્મભિઃ
　　ગુણઃ ભવેત્ મત્સુવિવિક્તધામ્નઃ ।
વિક્ષિપ્યમાણૈઃ ઉત કિં ન દૂષણમ્
　　ઘનૈઃ ઉપેતૈઃ વિગતૈઃ રવેઃ કિમ્ ॥ ૨૫॥

યથા નભઃ વાયુ અનલ અમ્બુ ભૂ ગુણૈઃ
　　ગતાગતૈઃ વર્તુગુણૈઃ ન સજ્જતે ।
તથા અક્ષરં સત્ત્વ રજઃ તમઃ મલૈઃ
　　અહંમતેઃ સંસૃતિહેતુભિઃ પરમ્ ॥ ૨૬॥

તથાપિ સઙ્ગઃ પરિવર્જનીયઃ
      ગુણેષુ માયારચિતેષુ તાવત્ ।
મદ્ભક્તિયોગેન દૃઢેન યાવત્
      રજઃ નિરસ્યેત મનઃકષાયઃ ॥ ૨૭॥

યથા આમયઃ અસાધુ ચિકિત્સિતઃ નૃણામ્
      પુનઃ પુનઃ સન્તુદતિ પ્રરોહન્ ।
એવં મનઃ અપક્વ કષય કર્મ
      કુયોગિનં વિધ્યતિ સર્વસઙ્ગમ્ ॥ ૨૮॥

કુયોગિનઃ યે વિહિત અન્તરાયૈઃ
      મનુષ્યભૂતૈઃ ત્રિદશ ઉપસૃષ્ટૈઃ ।
તે પ્રાક્તન અભ્યાસબલેન ભૂયઃ
      યુઞ્જન્તિ યોગં ન તુ કર્મતન્ત્રમ્ ॥ ૨૯॥

કરોતિ કર્મ ક્રિયતે ચ જન્તુઃ
      કેનાપિ અસૌ ચોદિતઃ આનિપાતાત્ ।
ન તત્ર વિદ્વાન્પ્રકૃતૌ સ્થિતઃ અપિ
      નિવૃત્ત તૃષ્ણઃ સ્વસુખ અનુભૂત્યા ॥ ૩૦॥

તિષ્ઠન્તમ્ આસીનમ્ ઉત વ્રજન્તમ્
      શયાનમ્ ઉક્ષન્તમ્ અદન્તમ્ અન્નમ્ ।
સ્વભાવમ્ અન્યત્ કિમ્ અપિ ઇહમાનમ્
      આત્માનમ્ આત્મસ્થમતિઃ ન વેદ ॥ ૩૧॥

યદિ સ્મ પશ્યતિ અસત્ ઇન્દ્રિય અથ
      નાના અનુમાનેન વિરુદ્ધમ્ અન્યત્ ।
ન મન્યતે વસ્તુતયા મનીષી
      સ્વાપ્નં યથા ઉત્થાય તિરોદધાનમ્ ॥ ૩૨॥

પૂર્વં ગૃહીતં ગુણકર્મચિત્રમ્
      અજ્ઞાનમ્ આત્મનિ અવિવિક્તમ્ અઙ્ગ ।
નિવર્તતે  તત્ પુનઃ ઈક્ષયા એવ
      ન ગૃહ્યતે ન અપિ વિસૃજ્ય આત્મા ॥ ૩૩॥

યથા હિ ભાનોઃ ઉદયઃ નૃચક્ષુષામ્

તમઃ નિહન્યાત્ ન તુ સદ્વિધત્તે ।
એવં સમીક્ષા નિપુણા સતી મે
હન્યાત્ તમિસ્રં પુરુષસ્ય બુદ્ધેઃ ॥ ૩૪॥

એષઃ સ્વયઞ્જ્યોતિઃ અજઃ અપ્રમેયઃ
મહાનુભૂતિઃ સકલાનુભૂતિઃ ।
એકઃ અદ્વિતીયઃ વચસાં વિરામે
યેન ઈશિતા વાક્ અસવઃ ચરન્તિ ॥ ૩૫॥

એતાવાન્ આત્મસંમોહઃ યત્ વિકલ્પઃ તુ કેવલે ।
આત્મન્ નૃતે સ્વમાત્માનમ્ અવલમ્બઃ ન યસ્ય હિ ॥ ૩૬॥

યત્ નામ આકૃતિભિઃ ગ્રાહ્યં પઞ્ચવર્ણમ્ અબાધિતમ્ ।
વ્યર્થેન અપિ અર્થવાદઃ અયં દ્વયં પણ્ડિતમાનિનામ્ ॥ ૩૭॥

યોગિનઃ અપક્વયોગસ્ય યુઞ્જતઃ કાયઃ ઉત્થિતૈઃ ।
ઉપસર્ગૈઃ વિહન્યેત તત્ર અયં વિહિતઃ વિધિઃ ॥ ૩૮॥

યોગધારણયા કાંશ્ચિત્ આસનૈઃ ધારણ અન્વિતૈઃ ।
તપોમન્ત્રૌષધૈઃ કાંશ્ચિત્ ઉપસર્ગાન્ વિનિર્દહેત્ ॥ ૩૯॥

કાંશ્ચિત્ મમ અનુધ્યાનેન નામસઙ્કીર્તન આદિભિઃ ।
યોગેશ્વર અનુવૃત્ત્યા વા હન્યાત્ અશુભદાન્ શનૈઃ ॥ ૪૦॥

કેચિત્ દેહમ્ ઇમં ધીરાઃ સુકલ્પં વયસિ સ્થિરમ્ ।
વિધાય વિવિધ ઉપાયૈઃ અથ યુઞ્જન્તિ સિદ્ધયે ॥ ૪૧॥

ન હિ તત્ કુશલાત્ દૃત્યં તત્ આયાસઃ હિ અપાર્થકઃ ।
અન્તવત્ત્વાત્ શરીરસ્ય ફલસ્ય ઇવ વનસ્પતેઃ ॥ ૪૨॥

યોગં નિષેવતઃ નિત્યં કાયઃ ચેત્ કલ્પતામ્ ઇયાત્ ।
તત્ શ્રદ્દધ્યાત્ ન મતિમાન્ યોગમ્ ઉત્સૃજ્ય મત્પરઃ ॥ ૪૩॥

યોગચર્યામ્ ઇમાં યોગી વિચરન્ મત્ વ્યપાશ્રયઃ ।
ન અન્તરાયૈઃ વિહન્યેત નિઃસ્પૃહઃ સ્વસુખાનુભૂઃ ॥ ૪૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
પરમાર્થનિર્ણયો નામ અષ્ટાવિંશોઽધ્યાયઃ ॥ ૨૮॥

અથ એકોનત્રિંશઃ અધ્યાયઃ ।

સુદુસ્તરામ્ ઇમાં મન્યે યોગચર્યામ્ અનાત્મનઃ ।
યથા અઞ્જસા પુમાન્ સિધ્યેત્ તત્ મે બ્રૂહિ અઞ્જસા અચ્યુત ॥ ૧॥

પ્રાયશઃ પુણ્ડરીકાક્ષ યુઞ્જન્તઃ યોગિનઃ મનઃ ।
વિષીદન્તિ અસમાધાનાત્ મનોનિગ્રહકર્શિતાઃ ॥ ૨॥

અથ અતઃ આનન્દદુઘં પદામ્બુજમ્
હંસાઃ શ્રયેરન્ અરવિન્દલોચન ।
સુખં નુ વિશ્વેશ્વર યોગકર્મભિઃ
ત્વત્ માયયા અમી વિહતાઃ ન માનિનઃ ॥ ૩॥

કિં ચિત્રમ્ અચ્યુત તવ એતત્ અશેષબન્ધઃ
દાસેષુ અનન્યશરણેષુ યત્ આત્મ સાત્ત્વમ્ ।
યઃ અરોચયત્સહ મૃગૈઃ સ્વયમ્ ઈશ્વરાણામ્
શ્રીમત્ કિરીટ તટ પીડિત પાદ પીઠઃ ॥ ૪॥

તં ત્વા અખિલ આત્મદયિત ઈશ્વરમ્ આશ્રિતાનામ્
સર્વ અર્થદં સ્વકૃતવિત્ વિસૃજેત કઃ નુ ।
કઃ વા ભજેત્ કિમ્ અપિ વિસ્મૃતયે અનુ ભૂત્યૈ
કિં વા ભવેત્ ન તવ પાદરજોજુષાં નઃ ॥ ૫॥

ન એવ ઉપયન્તિ અપચિતિં કવયઃ તવ ઈશ
બ્રહ્માયુષા અપિ કૃતમ્ ઋધમુદઃ સ્મરન્તઃ ।
યઃ અન્તર્બહિઃ તનુભૃતામ્ અશુભં વિધુન્વન્
આચાર્યચૈત્યવપુષા સ્વગતં વ્યનક્તિ ॥ ૬॥

શ્રીશુકઃ ઉવાચ ।
ઇતિ ઉદ્ધવેન અતિ અનુરક્ત ચેતસા
પૃષ્ટઃ જગત્ક્રીડનકઃ સ્વશક્તિભિઃ ।
ગૃહીત મૂર્તિત્રયઃ ઈશ્વર ઈશ્વરઃ
જગાદ સપ્રેમ મનોહરસ્મિતઃ ॥ ૭॥

શ્રીભગવાન્ ઉવાચ ।
હન્ત તે કથયિષ્યામિ મમ ધર્માન્ સુમઙ્ગલામ્ ।
યાન્ શ્રદ્ધયા આચરન્ મર્ત્યઃ મૃત્યું જયતિ દુર્જયમ્ ॥ ૮॥

કુર્યાત્ સર્વાણિ કર્માણિ મદર્થં શનકૈઃ સ્મરન્ ।
મયિ અર્પિત મનઃ ચિત્તઃ મત્ ધર્મ આત્મમનોરતિઃ ॥ ૯॥

દેશાન્ પુણ્યાન્ આશ્રયેત મદ્ભક્તૈઃ સાધુભિઃ શ્રિતાન્ ।
દેવ આસુર મનુષ્યેષુ મદ્ભક્ત આચરિતાનિ ચ ॥ ૧૦॥

પૃથક્ સત્રેણ વા મહ્યં પર્વયાત્રા મહોત્સવાન્ ।
કારયેત્ ગીતનૃત્ય આદ્યૈઃ મહારાજ વિભૂતિભિઃ ॥ ૧૧॥

મામ્ એવ સર્વભૂતેષુ બહિઃ અન્તઃ અપાવૃતમ્ ।
ઈક્ષેત આત્મનિ ચ આત્માનં યથા ખમ્ અમલ આશયઃ ॥ ૧૨॥

ઇતિ સર્વાણિ ભૂતાનિ મદ્ભાવેન મહાદ્યુતે ।
સભાજયન્ મન્યમાનઃ જ્ઞાનં કેવલમ્ આશ્રિતઃ ॥ ૧૩॥

બ્રાહ્મણે પુલ્કસે સ્તેને બ્રહ્મણ્યે અર્કે સ્ફુલિઙ્ગકે ।
અક્રૂરે ક્રૂરકે ચ એવ સમદૃક્ પણ્ડિતઃ મતઃ ॥ ૧૪॥

નરેષુ અભીક્ષ્ણં મદ્ભાવં પુંસઃ ભાવયતઃ અચિરાત્ ।
સ્પર્ધા અસૂયા તિરસ્કારાઃ સાહઙ્કારાઃ વિયન્તિ હિ ॥ ૧૫॥

વિસૃજ્ય સ્મયમાનાન્ સ્વાન્ દૃશં વ્રીડાં ચ દૈહિકીમ્ ।
પ્રણમેત્ દણ્ડવત્ ભૂમૌ આશ્વ ચાણ્ડાલ ગો ખરમ્ ॥ ૧૬॥

યાવત્ સર્વેષુ ભૂતેષુ મદ્ભાવઃ ન ઉપજાયતે ।
તાવત્ એવમ્ ઉપાસીત વાઙ્ મન કાય વૃત્તિભિઃ ॥ ૧૭॥

સર્વં બ્રહ્માત્મકં તસ્ય વિદ્યયા આત્મ મનીષયા ।
પરિપશ્યન્ ઉપરમેત્ સર્વતઃ મુક્ત સંશયઃ ॥ ૧૮॥

અયં હિ સર્વકલ્પાનાં સધ્રીચીનઃ મતઃ મમ ।
મદ્ભાવઃ સર્વભૂતેષુ મનોવાક્કાયવૃત્તિભિઃ ॥ ૧૯॥

ન હિ અઙ્ગ ઉપક્રમે ધ્વંસઃ મદ્ધર્મસ્ય ઉદ્ધવ અણુ અપિ ।
મયા વ્યવસિતઃ સમ્યક્ નિર્ગુણત્વાત્ અનાશિષઃ ॥ ૨૦॥

યઃ યઃ મયિ પરે ધર્મઃ કલ્પ્યતે નિષ્ફલાય ચેત્ ।
તત્ આયાસઃ નિરર્થઃ સ્યાત્ ભયાદેઃ ઇવ સત્તમ ॥ ૨૧॥

એષા બુદ્ધિમતાં બુદ્ધિઃ મનીષા ચ મનીષિણામ્ ।
યત્ સત્યમ્ અનૃતેન ઇહ મર્ત્યેન આપ્નોતિ મા અમૃતમ્ ॥ ૨૨॥

એષ તે અભિહિતઃ કૃત્સ્નઃ બ્રહ્મવાદસ્ય સઙ્ગ્રહઃ ।
સમાસવ્યાસવિધિના દેવાનામ્ અપિ દુર્ગમઃ ॥ ૨૩॥

અભીક્ષ્ણશઃ તે ગદિતં જ્ઞાનં વિસ્પષ્ટયુક્તિમત્ ।
એતત્ વિજ્ઞાય મુચ્યેત પુરુષઃ નષ્ટસંશયઃ ॥ ૨૪॥

સુવિવિક્તં તવ પ્રશ્નં મયા એતત્ અપિ ધારયેત્ ।
સનાતનં બ્રહ્મગુહ્યં પરં બ્રહ્મ અધિગચ્છતિ ॥ ૨૫॥

યઃ એતત્ મમ ભક્તેષુ સમ્પ્રદદ્યાત્ સુપુષ્કલમ્ ।
તસ્ય અહં બ્રહ્મદાયસ્ય દદામિ આત્માનમ્ આત્મના ॥ ૨૬॥

યઃ એતત્ સમધીયીત પવિત્રં પરમં શુચિ ।
સઃ પૂયેત અહઃ અહઃ માં જ્ઞાનદીપેન દર્શયન્ ॥ ૨૭॥

યઃ એતત્ શ્રદ્ધયા નિત્યમ્ અવ્યગ્રઃ શ્રુણુયાત્ નરઃ ।
મયિ ભક્તિં પરાં કુર્વન્ કર્મભિઃ ન સઃ બધ્યતે ॥ ૨૮॥

અપિ ઉદ્ધવ ત્વયા બ્રહ્મ સખે સમવધારિતમ્ ।
અપિ તે વિગતઃ મોહઃ શોકઃ ચ અસૌ મનોભવઃ ॥ ૨૯॥

ન એતત્ ત્વયા દામ્ભિકાય નાસ્તિકાય શઠાય ચ ।
અશુશ્રૂષોઃ અભક્તાય દુર્વિનીતાય દીયતામ્ ॥ ૩૦॥

એતૈઃ દોષૈઃ વિહીનાય બ્રહ્મણ્યાય પ્રિયાય ચ ।
સાધવે શુચયે બ્રૂયાત્ ભક્તિઃ સ્યાત્ શૂદ્ર યોષિતામ્ ॥ ૩૧॥

ન એતત્ વિજ્ઞાય જિજ્ઞાસોઃ જ્ઞાતવ્યમ્ અવશિષ્યતે ।
પીત્વા પીયૂષમ્ અમૃતં પાતવ્યં ન અવશિષ્યતે ॥ ૩૨॥

જ્ઞાને કર્મણિ યોગે ચ વાર્તાયાં દણ્ડધારણે ।
યાવાન્ અર્થઃ નૃણાં તાત તાવાન્ તે અહં ચતુર્વિધઃ ॥ ૩૩॥

મર્ત્યઃ યદા ત્યક્ત સમસ્તકર્મા
    નિવેદિતાત્મા વિચિકીર્ષિતઃ મે ।
તદા અમૃતત્વં પ્રતિપદ્યમાનઃ
    મયા આત્મભૂયાય ચ કલ્પતે વૈ ॥ ૩૪॥

શ્રીશુકઃ ઉવાચ ।

સઃ એવમ્ આદર્શિત યોગમાર્ગઃ
    તદા ઉત્તમ શ્લોકવચઃ નિશમ્ય ।
બદ્ધ અઞ્જલિઃ પ્રીતિ ઉપરુદ્ધ કણ્ઠઃ
    ન કિઞ્ચિત્ ઊચેઃ અશ્રુ પરિપ્લુત અક્ષઃ ॥ ૩૫॥

વિષ્ટભ્ય ચિત્તં પ્રણય અવઘૂર્ણમ્
    ધૈર્યેણ રાજન્ બહુ મન્યમાનઃ ।
કૃતાઞ્જલિઃ પ્રાહ યદુપ્રવીરમ્
    શીર્ષ્ણા સ્પૃશન્ તત્ ચરણ અરવિન્દમ્ ॥ ૩૬॥

ઉદ્ધવઃ ઉવાચ ।
વિદ્રાવિતઃ મોહ મહા અન્ધકારઃ
    યઃ આશ્રિતઃ મે તવ સન્નિધાનાત્ ।
વિભાવસોઃ કિં નુ સમીપગસ્ય
    શીતં તમઃ ભીઃ પ્રભવન્તિ અજ અદ્ય ॥ ૩૭॥

પ્રત્યર્પિતઃ મે ભવતા અનુકમ્પિના
    ભૃત્યાય વિજ્ઞાનમયઃ પ્રદીપઃ ।
હિત્વા કૃતજ્ઞઃ તવ પાદમૂલમ્
    કઃ અન્યત્ સમીયાત્ શરણં ત્વદીયમ્ ॥ ૩૮॥

વૃક્ણઃ ચ મે સુદૃઢઃ સ્નેહપાશઃ
    દાશાર્હ વૃષ્ણિ અન્ધક સાત્વતેષુ ।
પ્રસારિતઃ સૃષ્ટિવિવૃદ્ધયે ત્વયા
    સ્વમાયયા હિ આત્મ સુબોધ હેતિના ॥ ૩૯॥

નમઃ અસ્તુ તે મહાયોગિન્ પ્રપન્નમ્ અનુશાધિ મામ્ ।
યથા ત્વત્ ચરણ અમ્ભોજે રતિઃ સ્યાત્ અનપાયિની ॥ ૪૦॥

શ્રીભગવાન્ ઉવાચ ।
ગચ્છ ઉદ્ધવ મયા આદિષ્ટઃ બદરિ આખ્યં મમ આશ્રમમ્ ।
તત્ર મત્ પાદ તીર્થોદે સ્નાન ઉપસ્પર્શનૈઃ શુચિઃ ॥ ૪૧॥

ઈક્ષયા અલકનન્દાયા વિધૂત અશેષ કલ્મષઃ ।
વસાનઃ વલ્કલાનિ અઙ્ગ વન્યભુક્ સુખ નિઃસ્પૃહઃ ॥ ૪૨॥

તિતિક્ષૌઃ દ્વન્દ્વમાત્રાણાં સુશીલઃ સંયતેન્દ્રિયઃ ।

શાન્તઃ સમાહિતધિયા જ્ઞાનવિજ્ઞાનસંયુતઃ ॥ ૪૩॥

મત્તઃ અનુશિક્ષિતં યત્ તે વિવિક્તમનુભાવયન્ ।
મયિ આવેશિત વાક્ ચિત્તઃ મદ્ધર્મ નિરતઃ ભવ ।
અતિવ્રજ્ય ગતીઃ તિસ્રઃ મામ્ એષ્યસિ તતઃ પરમ્ ॥ ૪૪॥

શ્રીશુકઃ ઉવાચ ।
સઃ એવમ્ ઉક્તઃ હરિમેધસા ઉદ્ધવઃ
  પ્રદક્ષિણં તં પરિસૃત્ય પાદયોઃ ।
શિરઃ નિધાય અશ્રુકલાભિઃ આર્દ્રધીઃ
  ન્યષિઞ્ચત્ અદ્વન્દ્વપરઃ અપિ ઉપક્રમે ॥ ૪૫॥

સુદુસ્ત્યજ સ્નેહ વિયોગ કાતરઃ
  ન શક્નુવન્ તં પરિહાતુમ્ આતુરઃ ।
કૃચ્છ્રં યયૌ મૂર્ધનિ ભર્તૃપાદુકે
  બિભ્રન્ નમસ્કૃત્ય યયૌ પુનઃ પુનઃ ॥ ૪૬॥

તતઃ તમ્ અન્તર્હૃદિ સંનિવેશ્ય
  ગતઃ મહાભાગવતઃ વિશાલામ્ ।
યથા ઉપદિષ્ટાં જગત્ એકબન્ધુના
  તતઃ સમાસ્થાય હરેઃ અગાત્ ગતિમ્ ॥ ૪૭॥

યઃ એઅતત્ આનન્દ સમુદ્ર સંભૃતમ્
  જ્ઞાનામૃતં ભાગવતાય ભાષિતમ્ ।
કૃષ્ણેણ યોગેશ્વર સેવિતાઙ્ઘ્રિણા
  સચ્છ્રદ્ધયા આસેવ્ય જગત્ વિમુચ્યતે ॥ ૪૮॥

ભવભય અપહન્તું જ્ઞાનવિજ્ઞાનસારમ્
  નિગમકૃત્ ઉપજહે ભૃઙ્ગવત્ વેદસારમ્ ।
અમૃતમ્ ઉદધિતઃ ચ અપાયયત્ ભૃત્યવર્ગાન્
  પુરુષમ્ ઋષભમ્ આદ્યં કૃષ્ણસઞ્જ્ઞં નતઃ અસ્મિ ॥ ૪૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
પરમાર્થપ્રાપ્તિસુગમોપાયકથનોદ્ધવબદરિકાશ્રમપ્રવેશો
નામ એકોનત્રિંશોઽધ્યાયઃ ॥ ૨૯॥

અથ ત્રિંશઃ અધ્યાયઃ ।
રાજા ઉવાચ ।
તતઃ મહાભાગવતે ઉદ્ધવે નિર્ગતે વનમ્ ।
દ્વારવત્યાં કિમ્ અકરોત્ ભગવાન્ ભૂતભાવનઃ ॥ ૧॥

બ્રહ્મશાપ ઉપસંસૃષ્ટે સ્વકુલે યાદવર્ષભઃ ।
પ્રેયસીં સર્વનેત્રાણાં તનું સઃ કથમ્ અત્યજત્ ॥ ૨॥

પ્રત્યાક્રષ્ટું નયનમ્ અબલા યત્ર લગ્નં ન શેકુઃ
કર્ણાવિષ્ટં ન સરતિ તતઃ યત્ સતામ્ આત્મલગ્નમ્ ।
યત્ શ્રીઃ વાચાં જનયતિ રતિં કિં નુ માનં કવીનામ્
દૃષ્ટ્વા જિષ્ણોઃ યુધિ રથગતં યત્ ચ તત્ સામ્યમ્
ઈયુઃ ॥ ૩॥

ઋષિઃ ઉવાચ ।
દિવિ ભુવિ અન્તરિક્ષે ચ મહોત્પાતાન્ સમુત્થિતાન્ ।
દૃષ્ટ્વા આસીનાન્ સુધર્માયાં કૃષ્ણઃ પ્રાહ યદૂન્ ઇદમ્ ॥ ૪॥

શ્રીભગવાન્ ઉવાચ ।
એતે ઘોરાઃ મહોત્પાતાઃ દ્વાર્વત્યાં યમકેતવઃ ।
મુહૂર્તમ્ અપિ ન સ્થેયમ્ અત્ર નઃ યદુપુઙ્ગવાઃ ॥ ૫॥

સ્ત્રિયઃ બાલાઃ ચ વૃદ્ધાઃ ચ શઙ્ખોદ્ધારં વ્રજન્ત્વિતઃ ।
વયં પ્રભાસં યાસ્યામઃ યત્ર પ્રત્યક્ સરસ્વતી ॥ ૬॥

તત્ર અભિષિચ્ય શુચય ઉપોષ્ય સુસમાહિતાઃ ।
દેવતાઃ પૂજયિષ્યામઃ સ્નપન આલેપન અર્હણૈઃ ॥ ૭॥

બ્રાહ્મણાન્ તુ મહાભાગાન્ કૃતસ્વસ્ત્યયના વયમ્ ।
ગો ભૂ હિરણ્ય વાસોભિઃ ગજ અશ્વરથ વેશ્મભિઃ ॥ ૮॥

વિધિઃ એષઃ હિ અરિષ્ટઘ્નઃ મઙ્ગલ આયનમ્ ઉત્તમમ્ ।
દેવ દ્વિજ ગવાં પૂજા ભૂતેષુ પરમઃ ભવઃ ॥ ૯॥

ઇતિ સર્વે સમાકર્ણ્ય યદુવૃદ્ધાઃ મધુદ્વિષઃ ।
તથા ઇતિ નૌભિઃ ઉત્તીર્ય પ્રભાસં પ્રયયૂ રથૈઃ ॥ ૧૦॥

તસ્મિન્ ભગવતા આદિષ્ટં યદુદેવેન યાદવા ।
ચક્રુઃ પરભયા ભક્ત્યા સર્વશ્રેય ઉપબૃંહિતમ્ ॥ ૧૧॥

તતઃ તસ્મિન્ મહાપાનં પપુઃ મૈરેયકં મધુ ।
દિષ્ટ વિભ્રંશિત ધિયઃ યત્ દ્રવૈઃ ભ્રશ્યતે મતિઃ ॥ ૧૨॥

મહાપાન અભિમત્તાનાં વીરાણાં દૃપ્તચેતસામ્ ।
કૃષ્ણમાયા વિમૂઢાનાં સઙ્ઘર્ષઃ સુમહાન્ અભૂત્ ॥ ૧૩॥

યુયુધુઃ ક્રોધસંરબ્ધા વેલાયામ્ આતતાયિનઃ ।
ધનુભિઃ અસિભિઃ મલ્લૈઃ ગદાભિઃ તામ્ અરર્ષ્ટિભિઃ ॥ ૧૪॥

પતત્પતાકૈ રથકુઞ્જરાદિભિઃ
ખર ઉષ્ટ્ર ગોભિઃ મહિષૈઃ નરૈઃ અપિ ।
મિથઃ સમેત્ય અશ્વતરૈઃ સુદુર્મદા
ન્યહન્ શરર્દદ્ભિઃ ઇવ દ્વિપા વને ॥ ૧૫॥

પ્રદ્યુમ્ન સામ્બૌ યુધિ રૂઢમત્સરૌ
અક્રૂર ભોજૌ અનિરુદ્ધ સાત્યકી ।
સુભદ્ર સઙ્ગ્રામજિતૌ સુદારુણૌ
ગદૌ સુમિત્રા સુરથૌ સમીયતુઃ ॥ ૧૬॥

અન્યે ચ યે વૈ નિશઠ ઉલ્મુક આદયઃ
સહસ્રજિત્ શતજિત્ ભાનુ મુખ્યાઃ ।
અન્યોન્યમ્ આસાદ્ય મદાન્ધકારિતા
જઘ્નુઃ મુકુન્દેન વિમોહિતા ભૃશમ્ ॥ ૧૭॥

દાશાર્હ વૃષ્ણિ અન્ધક ભોજ સાત્વતા
મધુ અર્બુદા માથુરશૂરસેનાઃ ।
વિસર્જનાઃ કુકુરાઃ કુન્તયઃ ચ
મિથઃ તતઃ તે અથ વિસૃજ્ય સૌહૃદમ્ ॥ ૧૮॥

પુત્રાઃ અયુધ્યન્ પિતૃભિઃ ભ્રાતૃભિઃ ચ
સ્વસ્રીય દૌહિત્ર પિતૃવ્યમાતુલૈઃ ।
મિત્રાણિ મિત્રૈઃ સુહૃદઃ સુહૃદ્ભિઃ
જ્ઞાતીંસ્ત્વહન્ જ્ઞાતયઃ એવ મૂઢાઃ ॥ ૧૯॥

શરેષુ ક્ષીયમાણેષુ ભજ્યમાનેષુ ધન્વસુ ।
શસ્ત્રેષુ ક્ષીયમાણેષુ મુષ્ટિભિઃ જહ્રુઃ એરકાઃ ॥ ૨૦॥

તાઃ વજ્રકલ્પાઃ હિ અભવન્ પરિઘાઃ મુષ્ટિનાઃ ભૃતાઃ ।
જઘ્નુઃ દ્વિષઃ તૈઃ કૃષ્ણેન વાર્યમાણાઃ તુ તં ચ તે ॥ ૨૧॥

પ્રત્યનીકં મન્યમાનાઃ બલભદ્રં ચ મોહિતાઃ ।
હન્તું કૃતધિયઃ રાજન્ આપન્નાઃ આતતાયિનઃ ॥ ૨૨॥

અથ તૌ અપિ સઙ્ક્રુદ્ધૌ ઉદ્યમ્ય કુરુનન્દન ।
એરકા મુષ્ટિ પરિઘૌ જરન્તૌ જઘ્નતુઃ યુધિ ॥ ૨૩॥

બ્રહ્મશાપ ઉપસૃષ્ટાનાં કૃષ્ણમાયાવૃત આત્મનામ્ ।
સ્પર્ધાક્રોધઃ ક્ષયં નિન્યે વૈણવઃ અગ્નિઃ યથા વનમ્ ॥ ૨૪॥

એવં નષ્ટેષુ સર્વેષુ કુલેષુ સ્વેષુ કેશવઃ ।
અવતારિતઃ ભુવઃ ભારઃ ઇતિ મેને અવશેષિતઃ ॥ ૨૫॥

રામઃ સમુદ્રવેલાયાં યોગમ્ આસ્થાય પૌરુષમ્ ।
તત્ ત્યાજ લોકં માનુષ્યં સંયોજ્ય આત્માનમ્ આત્મનિ ॥ ૨૬॥

રામનિર્યાણમ્ આલોક્ય ભગવાન્ દેવકીસુતઃ ।
નિષસાદ ધરોપસ્થે તૂષ્ણીમ્ આસાદ્ય પિપ્પલમ્ ॥ ૨૭॥

બિભ્રત્ ચતુર્ભુજં રૂપં ભ્રાજિષ્ણુ પ્રભયા સ્વયા ।
દિશઃ વિતિમારાઃ કુર્વન્ વિધૂમઃ ઇવ પાવકઃ ॥ ૨૮॥

શ્રીવત્સાઙ્કં ઘનશ્યામં તપ્ત હાટક વર્ચસમ્ ।
કૌશેય અમ્બર યુગ્મેન પરિવીતં સુમઙ્ગલમ્ ॥ ૨૯॥

સુન્દર સ્મિત વક્ત્ર અબ્જં નીલ કુન્તલ મણ્ડિતમ્ ।
પુણ્ડરીક અભિરામાક્ષં સ્ફુરન્ મકર કુણ્ડલમ્ ॥ ૩૦॥

કટિસૂત્ર બ્રહ્મસૂત્ર કિરીટ કટક અઙ્ગદૈઃ ।
હાર નૂપુર મુદ્રાભિઃ કૌસ્તુભેન વિરાજિતમ્ ॥ ૩૧॥

વનમાલા પરીતાઙ્ગં મૂર્તિમદ્ભિઃ નિજ આયુધૈઃ ।
કૃત્વા ઉરૌ દક્ષિણે પાદમ્ આસીનં પઙ્કજ અરુણમ્ ॥ ૩૨॥

મુસલૌ અશેષાયઃ ખણ્ડકૃતેષુઃ લુબ્ધકઃ જરાઃ ।
મૃગાસ્ય આકારં તત્ ચરણં વિવ્યાધ મૃગશઙ્કયા ॥ ૩૩॥

ચતુર્ભુજં તં પુરુષં દૃષ્ટ્વા સઃ કૃત કિલ્બિષઃ ।
ભીતઃ પપાત શિરસા પાદયોઃ અસુરદ્વિષઃ ॥ ૩૪॥

અજાનતા કૃતમ્ ઇદં પાપેન મધુસૂદન ।
ક્ષન્તુમ્ અર્હસિ પાપસ્ય ઉત્તમશ્લોકઃ મે અનઘ ॥ ૩૫॥

યસ્ય અનુસ્મરણં નૃણામ્ અજ્ઞાન ધ્વાન્ત નાશનમ્ ।
વદન્તિ તસ્ય તે વિષ્ણો મયા અસાધુ કૃતં પ્રભો ॥ ૩૬॥

તત્ મા આશુ જહિ વૈકુણ્ઠ પાપ્માનં મૃગ લુબ્ધકમ્ ।
યથા પુનઃ અહં તુ એવં ન કુર્યાં સત્ અતિક્રમમ્ ॥ ૩૭॥

યસ્ય આત્મ યોગ રચિતં ન વિદુઃ વિરિઞ્ચઃ
    રુદ્ર આદયઃ અસ્ય તનયાઃ પતયઃ ગિરાં યે ।
ત્વત્ માયયા પિહિત દૃષ્ટયઃ એતત્ અઞ્જઃ
    કિં તસ્ય તે વયમ્ અસત્ ગતયઃ ગૃણીમઃ ॥ ૩૮॥

શ્રીભગવાન્ ઉવાચ ।
મા ભૈઃ જરે ત્વમ્ ઉત્તિષ્ઠ કામઃ એષઃ કૃતઃ હિ મે ।
યાહિ ત્વં મત્ અનુજ્ઞાતઃ સ્વર્ગં સુકૃતિનાં પદમ્ ॥ ૩૯॥

ઇતિ આદિષ્ટઃ ભગવતા કૃષ્ણેન ઇચ્છા શરીરિણા ।
ત્રિઃ પરિક્રમ્ય તં નત્વા વિમાનેન દિવં યયૌ ॥ ૪૦॥

દારુકઃ કૃષ્ણપદવીમ્ અન્વિચ્છન્ અધિગમ્યતામ્ ।
વાયું તુલસિકામોદમ્ આઘ્રાય અભિમુખં યયૌ ॥ ૪૧॥

તં તત્ર તિગ્મદ્યુભિઃ આયુધૈઃ વૃતમ્
    હિ અશ્વત્થમૂલે કૃતકેતનં પતિમ્ ।
સ્નેહપ્લુતાત્મા નિપપાત પાદયો
    રથાત્ અવપ્લુત્ય સબાષ્પલોચનઃ ॥ ૪૨॥

અપશ્યતઃ ત્વત્ ચરણ અમ્બુજં પ્રભો
    દૃષ્ટિઃ પ્રણષ્ટા તમસિ પ્રવિષ્ટા ।
દિશઃ ન જાને ન લભે ચ શાન્તિમ્
    યથા નિશાયમ્ ઉડુપે પ્રણષ્ટે ॥ ૪૩॥

ઇતિ બ્રુવતે સૂતે વૈ રથઃ ગરુડલાઞ્છનઃ ।
ખમ્ ઉત્પપાત રાજેન્દ્ર સાશ્વધ્વજઃ ઉદીક્ષતઃ ॥ ૪૪॥

તમ્ અન્વગચ્છન્ દિવ્યાનિ વિષ્ણુપ્રહરણાનિ ચ ।

તેન અતિ વિસ્મિત આત્માનં સૂતમ્ આહ જનાર્દનઃ ॥ ૪૫॥

ગચ્છ દ્વારવતીં સૂત જ્ઞાતીનાં નિધનં મિથઃ ।
સઙ્કર્ષણસ્ય નિર્યાણં બન્ધુભ્યઃ બ્રૂહિ મત્ દશામ્ ॥ ૪૬॥

દ્વારકાયાં ચ ન સ્થેયં ભવદ્ભિઃ ચ સ્વબન્ધુભિઃ ।
મયા ત્યક્તાં યદુપુરીં સમુદ્રઃ પ્લાવયિષ્યતિ ॥ ૪૭॥

સ્વં સ્વં પરિગ્રહં સર્વે આદાય પિતરૌ ચ નઃ ।
અર્જુનેન આવિતાઃ સર્વ ઇન્દ્રપ્રસ્થં ગમિષ્યથ ॥ ૪૮॥

ત્વં તુ મત્ ધર્મમ્ આસ્થાય જ્ઞાનનિષ્ઠઃ ઉપેક્ષકઃ ।
મન્માયા રચનામ્ એતાં વિજ્ઞાય ઉપશમં વ્રજ ॥ ૪૯॥

ઇતિ ઉક્તઃ તં પરિક્રમ્ય નમસ્કૃત્ય પુનઃ પુનઃ ।
તત્ પાદૌ શીર્ષ્ણિ ઉપાધાય દુર્મનાઃ પ્રયયૌ પુરીમ્ ॥ ૫૦॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે યદુકુલસઙ્ક્ષયો નામ
ત્રિંશોઽધ્યાયઃ ॥ ૩૦॥

અથ એકત્રિંશઃ અધ્યાયઃ ।
શ્રીશુકઃ ઉવાચ ।
અથ તત્ર આગમત્ બ્રહ્મા ભવાન્યા ચ સમં ભવઃ ।
મહેન્દ્રપ્રમુખાઃ દેવાઃ મુનયઃ સપ્રજેશ્વરાઃ ॥ ૧॥

પિતરઃ સિદ્ધગન્ધર્વાઃ વિદ્યાધર મહોરગાઃ ।
ચારણાઃ યક્ષરક્ષાંસિ કિંનર અપ્સરસઃ દ્વિજાઃ ॥ ૨॥

દ્રષ્ટુકામાઃ ભગવતઃ નિર્વાણં પરમ ઉત્સુકાઃ ।
ગાયન્તઃ ચ ગૃણન્તઃ ચ શૌરેઃ કર્માણિ જન્મ ચ ॥ ૩॥

વવર્ષુઃ પુષ્પવર્ષાણિ વિમાન આવલિભિઃ નભઃ ।
કુર્વન્તઃ સઙ્કુલં રાજન્ ભક્ત્યા પરમયા યુતાઃ ॥ ૪॥

ભગવાન્ પિતામહં વીક્ષ્ય વિભૂતિઃ આત્મનઃ વિભુઃ ।
સંયોજ્ય આત્મનિ ચ આત્માનં પદ્મનેત્રે ન્યમીલયત્ ॥ ૫॥

લોકાભિરામાં સ્વતનું ધારણા ધ્યાન મઙ્ગલમ્ ।
યોગધારણયા આગ્નેય્યા અદગ્ધ્વા ધામ આવિશત્ સ્વકમ્ ॥ ૬॥

દિવિ દુન્દુભયઃ નેદુઃ પેતુઃ સુમનઃ ચ ખાત્ ।
સત્યં ધર્મઃ ધૃતિઃ ભૂમેઃ કીર્તિઃ શ્રીઃ ચ અનુ તં વયુઃ ॥ ૭॥

દેવ આદયઃ બ્રહ્મમુખ્યાઃ ન વિશન્તં સ્વધામનિ ।
અવિજ્ઞાતગતિં કૃષ્ણં દદૃશુઃ ચ અતિવિસ્મિતાઃ ॥ ૮॥

સૌદામન્યાઃ યથા આકાશે યાન્ત્યાઃ હિત્વા અભ્રમણ્ડલમ્ ।
ગતિઃ ન લક્ષ્યતે મર્ત્યૈઃ તથા કૃષ્ણસ્ય દૈવતૈઃ ॥ ૯॥

બ્રહ્મ રુદ્ર આદયઃ તે તુ દૃષ્ટ્વા યોગગતિં હરેઃ ।
વિસ્મિતાઃ તાં પ્રશંસન્તઃ સ્વં સ્વં લોકં યયુઃ તદા ॥ ૧૦॥

રાજન્ પરસ્ય તનુભૃત્ જનનાપ્યયેહા
 માયાવિડમ્બનમ્ અવેહિ યથા નટસ્ય ।
સૃષ્ટ્વા આત્મના ઇદમ્ અનુવિશ્ય વિહૃત્ય ચ અન્તે
 સંહૃત્ય ચ આત્મ મહિના ઉપરતઃ સઃ આસ્તે ॥ ૧૧॥

મર્ત્યેન યઃ ગુરુસુતં યમલોકનીતમ્
 ત્વાં ચ આનયત્ શરણદઃ પરમ અસ્ત્ર દગ્ધમ્ ।
જિગ્યે અન્તક અન્તકમ્ અપિ ઈશમ્ અસૌ અવનીશઃ
 કિં સ્વાવને સ્વરનયન્ મૃગયું સદેહમ્ ॥ ૧૨॥

તથા અપિ અશેશા સ્થિતિ સમ્ભવ અપિ
 અયેષુ અનન્ય હેતુઃ યત્ અશેષ શક્તિધૃક્ ।
ન ઇચ્છત્ પ્રણેતું વપુઃ અત્ર શેષિતમ્
 મર્ત્યેન કિં સ્વસ્થગતિં પ્રદર્શયન્ ॥ ૧૩॥

યઃ એતાં પ્રાતઃ ઉત્થાય કૃષ્ણસ્ય પદવીં પરામ્ ।
પ્રયતઃ કીર્તયેત્ ભક્ત્યા તામ્ એવ આપ્નોતિ અનુત્તમામ્ ॥ ૧૪॥

દારુકઃ દ્વારકામ્ એત્ય વસુદેવ ઉગ્રસેનયોઃ ।
પતિત્વા ચરણાવસ્રૈઃ ન્યષિઞ્ચત્ કૃષ્ણવિચ્યુતઃ ॥ ૧૫॥

કથયામાસ નિધનં વૃષ્ણીનાં કૃત્સ્નશઃ નૃપ ।
તત્ શ્રુત્વા ઉદ્વિગ્ન હૃદયાઃ જનાઃ શોક વિમૂર્ચ્છિતાઃ ॥ ૧૬॥

તત્ર સ્મ ત્વરિતા જગ્મુઃ કૃષ્ણ વિશ્લેષ વિહ્વલાઃ ।
વ્યસવાઃ શેરતે યત્ર જ્ઞાતયઃ ઘ્નન્તઃ આનનમ્ ॥ ૧૭॥

દેવકી રોહિણી ચ એવ વસુદેવઃ તથા સુતૌ ।
કૃષ્ણ રામ અવપશ્યન્તઃ શોક આર્તાઃ વિજહુઃ સ્મૃતિમ્ ॥ ૧૮॥

પ્રાણાન્ ચ વિજહુઃ તત્ર ભગવત્ વિરહ આતુરાઃ ।
ઉપગુહ્ય પતીન્ તાત ચિતામ્ આરુરુહુઃ સ્ત્રિયઃ ॥ ૧૯॥

રામપત્ન્યઃ ચ તત્ દેહમ્ ઉપગુહ્ય અગ્નિમ્ આવિશન્ ।
વસુદેવપત્ન્યઃ તત્ ગાત્રં પ્રદ્યુમ્ન આદીન્ હરેઃ સ્નુષાઃ ।
કૃષ્ણપત્ન્યઃ આવિશન્ અગ્નિં રુક્મિણિ આદ્યાઃ તદાત્મિકાઃ ॥ ૨૦॥

અર્જુનઃ પ્રેયસઃ સખ્યુઃ કૃષ્ણસ્ય વિરહ આતુરઃ ।
આત્માનં સાન્ત્વયામાસ કૃષ્ણગીતૈઃ સદુક્તિભિઃ ॥ ૨૧॥

બન્ધૂનાં નષ્ટગોત્રાણામ્ અર્જુનઃ સામ્પરાયિકમ્ ।
હતાનાં કારયામાસ યથાવત્ અનુપૂર્વશઃ ॥ ૨૨॥

દ્વારકાં હરિણા ત્યક્તા સમુદ્રઃ અપ્લાવયત્ ક્ષણાત્ ।
વર્જયિત્વા મહારાજ શ્રીમત્ ભગવત્ આલયમ્ ॥ ૨૩॥

નિત્યં સંનિહિતઃ તત્ર ભગવાન્ મધુસૂદનઃ ।
સ્મૃત્યા અશેષા અશુભહરં સર્વ મઙ્ગલમ્ અમઙ્ગલમ્ ॥ ૨૪॥

સ્ત્રી બાલ વૃદ્ધાન્ આદાય હતશેષાન્ ધનઞ્જયઃ ।
ઇન્દ્રપ્રસ્થં સમાવેશ્ય વજ્ર તત્ર અભ્યષેચયત્ ॥ ૨૫॥

શ્રુત્વા સુહૃત્ વધં રાજન્ અર્જુનાત્ તે પિતામહાઃ ।
ત્વાં તુ વંશધરં કૃત્વા જગ્મુઃ સર્વે મહાપથમ્ ॥ ૨૬॥

યઃ એતત્ દેવદેવસ્ય વિષ્ણોઃ કર્માણિ જન્મ ચ ।
કીર્તયેત્ શ્રદ્ધયા મર્ત્યઃ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૭॥

ઇત્થં હરેઃ ભગવતઃ રુચિર અવતાર
    વીર્યાણિ બાલચરિતાનિ ચ શન્તમાનિ ।
અન્યત્ર ચ ઇહ ચ શ્રુતાનિ ગૃણન્ મનુષ્યઃ
    ભક્તિં પરાં પરમહંસગતૌ લભેત ॥ ૨૮॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે મૌસલોપાખ્યાનં નામ
એકત્રિંશોઽધ્યાયઃ ॥ ૩૧॥

॥ ઇતિ ઉદ્ધવગીતા નામ એકાદશસ્કન્ધઃ સમાપ્તઃ ॥

Encoded by Sunder Hattangadi

Portion of adhyAyas 7, 8 and 9 are also known as avadhUtagItam

*Uddhava Gita*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*